'श्रीमद्भार्गवोपपुराणम्'

अध्ययनं सम्पादनञ्च

डॉ॰ बृजेशकुमारशुक्लः

प्रवक्ता

लखनऊविश्वविद्यालयस्थसंस्कृतप्राकृतभाषाविभागे

लखनऊ

NAG PUBLISHERS

नाग प्रकाशक

११/ए॰, यू॰ ए॰, जवाहर नगर, दिल्ली-७

प्रथमोऽध्यायः

श्रीमते रामानुजाय नमः।

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम्[1] । विघ्नान्निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये ।।१।।

श्रीशौनकादय[2] ऊचुः

सर्वधर्मार्थतत्त्वज्ञ ! सर्वशास्त्रविशारद! तत्त्वार्थविदुषां श्रेष्ठ! सूत! द्वैपायनप्रिय ।।२।।
यानि कर्माणि लोकेषु चरित्राण्यपि शार्ङ्गिणः। तव प्रसादादस्माभिः श्रुतानि वदतां वर ।।३।।
कृतकृत्या वयं स्याम[3] पवित्रीकृतचेतसः। योगिनां तु चरित्राणि भगवद्दास्यभोगिनाम्[4] ।।४।।
नोक्तान्यमृतकल्पानि त्वया धर्मोपदेशिना। न तृप्तिं यान्ति चेतांसि तस्मात्तानि वदस्व नः ।।५।।

सूत उवाच

साधु पृष्टोऽस्मि मुनयो भवद्भिर्मोक्षकाङ्क्षिभिः। चिरकालादिदं वक्तुं भवतां वष्टि मे मनः ।।६।।
भवन्त एव पृच्छन्ति मामिदं मुनिपुङ्गवाः। आसीत्परमहर्षोऽयमधुना मम चेतसि ।।७।।
वक्ष्यामि सर्वमेतद्वः शृणुध्वं तत्समाधिना। लोके स्थितानां सर्वेषां क्षेत्राणामुत्तमं वरम् ।।८।।
बदर्याख्यं महापुण्यं स्मरणादेव मुक्तिदम्। सर्वर्तुकुसुमोपेतं वनराजिविराजितम् ।।९।।
प्रफुल्लस्वर्णकमलसरोवरविभासितम्। तस्मिन् दिव्याश्रमे रम्ये चन्द्रकान्तशिलातले ।।१०।।
समासीनौ जगन्नाथौ नरनारायणावुभौ।। भूलोकजनरक्षार्थमवतीर्णौ[5] महामुनी ।।११।।
नानाविधाः कथाः सर्वा ब्रुवन्तावासतुस्तथा। तस्मिन् काले महात्मानं नारायणमुनीश्वरम् ।।१२।।
हर्षेण महता युक्तो नरो वाक्यं तमब्रवीत् ।

नर उवाच

नारायण! मुनिश्रेष्ठ! त्वमेव शरणं मम ।।१३।।
रहस्यं परिपृच्छामि लोकानां मुक्तिसिद्धये। अस्मिन् मायामये गर्त्ते भ्रमन्ते जीवराशयः ।।१४।।
तेषां प्रतिक्रिया नास्ति मुक्त्यर्थं सुलभा भुवि। समस्तजीवकोटीनां मग्नानां भवसागरे ।।१५।।
मोक्षमार्गस्य[6] सौलभ्यं वेत्सि[7] चेत्तं[8] वद प्रभो। श्रुत्वा नरस्य तद् वाक्यमभिपूज्य[9] महायशाः ।।१६।।
तेन वाक्येन संहृष्टः प्रत्युवाच नरं हरिः।

श्रीनारायण[10] उवाच

इममेव पुरा प्रश्नं वैकुण्ठनगरे हरिम् ।।१७।।
सर्वेश्वरी जगन्माता पप्रच्छ कमलालया। त्रिपाद्विभूतौ वैकुण्ठे विरजायाः परे तटे ।।१८।।
या देवानां पूरयोध्या ह्यमृतेनावृता पुरी। मणिप्राकारपरिखासान्द्रै[11]र्मणिमयैर्गृहैः ।।१९।।
हर्म्यैर्विमानैः प्रासादैस्तोरणैर्गोपुरैः शुभैः। तस्यामन्तःपुरवरं कोटिसूर्यसमप्रभम् ।।२०।।

१–परः शतम् –घ
२–श्रीशौनक उवाच–क, शौनकादय ऊचुः –घ
३– श्यामः –क,ख,ग,घ
४–भगवद्वास्यभोगिनाम् –क
५– जनरक्षार्थम् अवतीर्णौ –घ
६–मोक्षमार्गस्तु सौलभ्यो –क,ख,ग
७–वेत्ति –क,ख,ग
८–त्वं –ग, घ
९–वाक्यम अभिपूज्य –क
१०–नारायण उवाच –क,ख
११–परिखासौवर्णमणिमयैर्गृहैः–क, परिखासान्द्रामणि –घ

तन्मध्ये मण्डपं दिव्यं माणिक्यस्तम्भशोभितम्। तस्मिन् बालार्कसङ्काशे दिव्यसिंहासने शुभे ।।२१।।
कमले दलसाहस्रे[१२] शोभिते सूर्य्यसन्निभे। कर्णिकायां समासीनो देवदेवो जनार्दनः ।।२२।।
विश्वस्य पतिरात्मेशः श्रीमन्नारायणः[१३] प्रभुः। श्रिया भूम्या च सहितो नीलया[१४] सह देवराट् ।।२३।।
तदम्भोरुहसाहस्रदलाग्रेषु समाहितैः। विमलाद्यैः[१५] सहस्रैश्च चामरैः परिवीजितः[१६] ।।२४।।
नित्यमुक्तैरनन्ताद्यैरनन्तैः परिसेवितः[१७]। एवं स्थिते सदा देवे कदाचिद् विष्णुमीश्वरम् ।।२५।।
पप्रच्छ कमलादेवी सर्वजीवदयापरा।

श्रीरुवाच

त्वमेव सर्वलोकानां सृष्टिस्थित्यन्तकारणम्[१८]।। २६।।

चतुर्मुखः शङ्करश्च त्वदाज्ञापरिपालकौ त्वत्कटाक्षवशादेव प्राप्तौ सृष्ट्यन्तकर्तृताम् ।।२७।।
सर्वासां जीवकोटीनां विकर्मफलपाकतः[१९-२०] । सृष्ट्यादौ तांश्च देवादीन् करोषि कृपया हरे ।।२८।।
तेषां विज्ञानसिद्ध्यर्थं शास्त्राणि कृतवानसि। श्रुतयश्चोपनिषदः स्थापिता वत्सल![२१]! त्वया ।।२९।।
एतेष्वनादरास्सन्तो[२२] ज्ञानहीना भवन्ति ये। तेषां संरक्षणार्थं[२३] त्वं रामकृष्णादिरूपधृक् ।।३०।।
एवं हितकरो नृणामति[२४]सौलभ्यभावतः। सदा[२५] त्वं वर्त्तसे[२६] देव! जीवानां मोक्षहेतवे ।।३१।।
मुक्त्यर्थं सर्वजीवानामेवं[२७]सङ्कल्पिते त्वयि [२८] सर्वे भवाम्बुधौ मग्ना[२९] मुक्ता[३०] जीवाः क्वचित् क्वचित् ।।३२।।

एष[३१] मायाप्रभावस्ते प्रथितः[३२] कुत्र ते कृपा? त्वमेव सत्यसङ्कल्पः सत्यकाम इति श्रुतिः ।।३३।।
तदन्यथा[३३]भवत्येवं श्रुतीनां मान्यतां[३४] कुरु। त्वत्प्रसादादेवदेव! प्रार्थये परमं पदम् ।।३४।।
अशेषजीवकोटीनां ददस्व मम काङ्क्षितम्[३५]। किमेषा[३६] भेदबुद्धिस्ते श्रीहरे सर्वशेषिणः[३७] ।।३५।।
केचिद्बद्धाश्च लोकेऽस्मिन् केचिन्मुक्ताश्च किं वद। एवं मा कुरु देवेश सर्वेषां मुक्तिदो भव ।।३६।।
एवं संप्रार्थ्यमानस्तां[३८] श्रियं दृष्ट्वा जगत्पतिः। अत्यादरेण कृपया तामुवाच परात्परः ।।३७।।

श्रीविष्णुरुवाच[३९]

लोके पितुर्दया मातुरधिका हि प्रवर्त्तते । तस्माद्दयाऽधिका ते श्रीर्जीवेषु मम[४०] नास्ति सा ।।३८।।
त्वदुक्तंसत्यमेवैतन्न[४१]मे भेदः कदाचन। तेषां तेषां कर्मगत्या भेदधीर्मम वर्त्तते ।।३९।।

१२–दलसाहस्रे –ग,
१३–श्रीमान्नारायणः –घ
१४–लीलया –ग, घ
१५–विमलादिसहस्रैश्च –घ
१६–परियोजितः –क
१७– परिसेवितैः –क
१८–स्थित्यन्तकारणः –क, ख्ग
१९–पक्वरः –क
२०– तत एतैस्तु सृष्ट्यादीन् करोषि कृपया हरे –घ, तांस्तु सृष्ट्या सर्वादीन् –क
२१–वत्सला –क
२२–एतष्वनादरात्सन्तो–घ, त एतेष्वनादरास्सन्तो–क
२३–संरक्षनार्थाय –क
२४–नृणां मुनीनां लभ्यभावतः– घ
२५–तदा –ग, क
२६–वत्तते –क
२७–सर्वदेवानामेतम् –क
२८–त्वया –क, घ
२९–मग्नाः– घ
३०–मुक्तिजीवाः– क
३१–एषा मया प्रभावस्ते –क
३२–प्रार्थितः– क
३३–तदन्यर्था भवेत्वेव –क
३४–मन्यताम् –ग
३५–काङ्क्षतां –क
३६–किमेषां –घ
३७–सर्वशेषिनः– क
३८–संप्रार्थ्यमानाम् –क, ग
३९–कस्यांश्चिदपि पाण्डुलिपौ न वर्तते।
४०–ममतास्ति सा –क
४१–सत्यमेवैतत् न–घ

ये[४२] जीवा ह्येतदारभ्य[४३] कीर्त्तयन्ति गुणांस्तव। अहं तेभ्यः प्रदास्यामि क्षिप्रं मुक्तिं न संशयः ।।४०।।
विकर्मपरिहारार्थं जनानां मम सेवया। रामकृष्णादिरूपाणि धारयामि युगे युगे ।।४१।।
श्रीरङ्गादिषु दिव्येषु[४४] क्षेत्रेषु च वसाम्यहम् । ग्रामे ग्रामे प्रतिगृहे चाऽर्चाविग्रहरूपवान्[४५] ।।४२।।
मय्येवं[४६] संस्थिते देवि! भुवि कर्मवशाज्जनाः[४७]। मत्पदं नाभिगच्छेयुः किं करोमि गुणालये ।।४३।।
सर्वासां जीवकोटीनां सुलभं[४८] मोक्षसाधनम् । यदि चेन्मन्यसे त्वं हि प्रीतिरात्यन्तिकी[४९] मम ।।४४।।
सर्वलोकोपकारार्थं त्वद्बुद्धिरसितेक्षणे। वर्त्तते यदि चोपायं वक्ष्यामि श्रूयतां त्वया[५०] ।।४५।।
त्वं[५०] च भूमिश्च नीला[५१] च चक्रं शार्ङ्गं च नन्दकः[५२] । कौमोदकी पाञ्चजन्यो विष्वक्सेनो मम प्रियः[५३] ।।४६।।
अनन्तो गरुडश्चैव कुमुदाद्या[५४] मम प्रियाः। यूयं सर्वेऽशभागेन[५५] भूलोकेऽवतरिष्यथ[५६] ।।४७।।
जनित्वा योगिवंशेषु नृणां सर्वाधिकारिणाम्[५७] सकृन्निष्ठावशादेव सुलभं[५८] मोक्षदं भुवि ।।४८।।
रहस्योपनिषत्प्रोक्तं गुह्याद्[५९] गुह्यतमं शुभम् । परमं न्यासयोगं च[६०] रहस्यत्रयसंस्थितम् ।।४९।।
उपदेक्ष्यथ[६१] सर्वेषां सर्वबन्धविमुक्तये। सर्ववर्णाधिकारार्थं सङ्गृह्य निगमाशयान् ।।५०।।
करिष्यथ प्रबन्धांश्च भाषया द्राविडाख्यया। दुर्मतच्छेदनं कृत्वा प्रबन्धैस्तैर्महागुणैः ।।५१।।
स्वाश्रितान् सात्त्विकान् कृत्वा मत्तत्त्वं बोधयिष्यथ। एवमाज्ञापिते[६२] देवे श्रीर्भूनीलादयस्तथा[६३] ।।५२।।
अनन्ताद्याः पारिषद्या वसुधायां प्रजज्ञिरे। जनित्वा सर्वदेशेषु[६४] हरिवाक्यानुसारतः ।।५३।।
सर्वेषामुपदिश्याथ[६५] न्यासयोगमनुत्तमम् । सरहस्यं महात्मानो मोक्षदा अभवन् भुवि ।।५४।।
एवं प्रतिद्वापरान्ते, एते प्रतिमहायुगे । जायन्ते बहुधा भूमौ जनानां मुक्तिहेतवे ।।५५।।
तदुक्तं न्यासयोगं तं ये गृह्णन्ति जना भुवि।। सकृद् गृहीतमात्रेण[६६] यान्त्येव परमां गतिम् ।।५६।।
तदारभ्य तु लोकेऽस्मिन् न्यासयोगः प्रकाशितः। वर्तते भगवद्भक्तैः सर्वेषां मुक्तिदो हरिः ।।५७।।
एवं नारायणेनोक्तं वचः श्रुत्वाऽमृतोपमम् । नरः प्रीतिसमायुक्तः प्रणिपत्य तमब्रवीत् ।।५८।।

४२–जो –क
४३–ऽपि सदारभ्य –क,ऽपि तदारभ्य –ग
४४–विवेषु –क
४५–प्रतिगृहे अर्चाविग्रहरूपवान् –ग,घ
४६– यद्येवम् –क
४७–कर्मवशा जनाः– ग
४८–सुलभा –क
४९–प्रीतिरत्यन्तिका –क,ग
५०–त्वया –क
५१–लीला –ग,घ
५२–नन्दकम् –क
५३–प्रियाः– घ
५४–कुमुदाद्याः– क
५५–सर्वांशऽभागेन –क, सर्वेशभावेन –ग
५६–ह्यवतरिष्यथ –क,ग
५७–सर्वाधिकारणाम् –क
५८–सुलभा –क
५९–गुह्यात् –ग,घ
६०–तम् –क
६१–उपदेष्यथ –क, उपदेश्याथ –ग
६२–एवमाज्ञापिता देवी –घ
६३–श्रीभूलीलादयस्तथा –घ
६४–सर्वदेवेषु –क
६५–सर्वेषामुपदेश्याथ –क मुपदेशार्थं –ग
६६–गृहीतिमात्रेण –घ

नर उवाच

यत्र यत्र[६७] यथा लोके सञ्जाता नित्यसूरिणः। कथं [६८] कुर्वन्ति वर्त्तन्ते कथं मुक्तिं विशन्ति ते ।।५९।।
महाभागवतानां तु चरित्रमघनाशनम्। विस्तरेण समाचक्ष्व[६९] परमं मोक्षसाधनम् ।।६०।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
प्रथमोऽध्यायः ।।१।।

६७–तत्र –क
६८–कथं वर्त्तन्ति कुर्वन्ति –क, कथं च ते प्रवर्त्तन्ते –घ
६९–ममावक्ष्व –ग, घ

द्वितीयो ऽध्यायः

सूत[1] उवाच

इति तद्वचनं श्रुत्वा नारायणमुनिस्तदा । तेन संहृष्टसर्वाङ्गः प्रत्युवाच नरं वचः ।।१।।

श्रीनारायण उवाच

अथ काले गते तस्मिन्नादौ वैवस्वतान्तरे । द्वापरान्तं समारभ्य भगवत्पञ्चहेतयः[2] ।।२।।
श्रीश्च भूमिश्च नीला[3] च सेनेशाद्या अजीजनन्[4]। रम्य[5]द्राविडदेशेषु मोक्षसाधनहेतुषु ।।३।।
काञ्चीपुरीति विख्याता भुक्तिमुक्तिप्रदायिनी। दिव्योद्यानयुतैः खेयैरगाधैश्चोपवेष्टिता ।।४।।
सौवर्णवप्रसंयुक्ता सर्वासां सम्पदां[6] निधिः। सुमेरुतुल्यैः प्रासादैः सर्वतः संयुतोज्ज्वला ।।५।।
तस्यां हस्तिगिरीशस्य पुरतः कमलाकरम् । हेमाम्बुरुहसङ्कीर्णं द्विजालिकुलनादितम् ।।६।।
तस्मिन् सरसि हेमाब्जे बालसूर्यसमप्रभः। अभवत्पाञ्चजन्यांशो[7] मुक्तर्थं सर्वदेहिनाम् ।।७।।
प्रविश्य हरिपादाब्जमकरन्दनिरूपणात् । सद्यो वर्द्धितसर्वाङ्गः प्रजज्ञे भगवत्प्रियः ।।८।।
आश्विने विष्णुनक्षत्रे द्वापरान्ते शुभे दिने। देवदुन्दुभयो नेदुः पुष्पवर्षो महानभूत्[8] ।।९।।
ननृतुश्चाप्सरःसङ्घास्तस्मिंजाते महात्मनि। तदा सर्वेश्वरो देवो वरदः सर्वभूतकृत् ।।१०।।
पुण्डरीकविशालाक्षः शङ्खचक्रगदाधरः । नीलमेघनिभः श्यामः कोटिसूर्यसमप्रभः ।।११।।
दिव्यपीताम्बरधरो वनमालाविराजितः । हारकेयूरमुकुटकङ्कणाङ्गदशोभितः ।।१२।।
काञ्चीगुणेन महता नूपुरैश्चोपशोभितः। पन्नगाशनमारुह्य लक्ष्म्या सह जगत्पतिः ।।१३।।
श्वेतचामरपर्यन्तः श्वेतच्छत्रविराजितः[9]। दयार्द्रमानसो भूत्वा सरस्तीरमुपागमत् ।।१४।।
तमादाय शिशुं प्रेम्णा शिर आघ्राय देवराट् । वेदरूपैः स्वनिश्वासैस्तस्मै[10] वेदान् प्राबोधयत् ।।१५।।
नामधेयं ततः कृत्वा सरोयोगीति लोककृत् । बाहुभ्यां सम्परिष्वज्य प्रियायै प्रददौ प्रभुः ।।१६।।
सा श्रीर्वात्सल्यभावेन स्तन्यं सुस्रावितं ददौ । पुत्रभावेन तं दृष्ट्वा पुपोष प्रीतिसंयुता ।।१७।।
सोऽपि संवर्द्धितो भूत्वा तयोरङ्घ्रितलाम्बुजे । प्रणामं दण्डवत्कृत्वा तुष्टाव जगतां पतिम् ।।१८।।
तेन संस्तूयमानः सन् सुप्रीतो वरदस्तथा। तं समाहूय देवेशो न्यासयोगमनुत्तमम् ।।१९।।
निःश्रेयसपदं नित्यमगम्यमपि योगिनाम् । ददेश मुनिवर्याय सरोभूताय योगिने ।।२०।।
सोऽपि तद्दिव्य[11]-पादाब्जे नमस्कृत्य विनीतवान् ।साक्षात् तद्वदनाम्भोजान्न्यासं [12] सङ्गृह्य पार्श्वतः ।।२१।।
कृतार्थं मन्यमानः सन् आत्मानं मुनिसत्तम । कृताञ्जलिपुटो [13] देवं न्यासार्थं काङ्क्षतोऽब्रवीत् ।। २२।।

१–क,ग मातृकयोर्नेदं लिखितम्
२–हेतवः– क
३–नीलाश्च –क, लीला –ग,घ
४–अजीजनत् –क, अजायत –घ
५–रम्येषु –क
६–संप्रदा –क
७–सुगवत् –क, सुमहत् –घ
८–महान्नभूत –ख
९–श्वेतछत्र –क,ग,घ
१०–तस्य वेदान् प्रवर्द्धय –क, तस्मै वेदान् प्रबोधयत् –ग, तस्य वेदान् प्रबर्द्धयन् –घ
११–तद्दिव्यया पादाब्जेन –घ
१२–साक्षात्तद्वनाम्भोजव्यासं सङ्गृह्य पार्श्वतः –क
१३–कृतांचलिपरो –ग

सरोमुनिरुवाच

त्वयोक्तन्यासयोगस्य तात्पर्यं बहुविस्तरम् । सरहस्यं समाचक्ष्व[१४] सर्वं तत्करुणानिधे ।।२३।।

श्रीभगवानुवाच

न्यासस्तु द्विविधः प्रोक्तो वाचिको मानसो मुने। सम्यगुच्चारितो वाचा[१५] वाचिकस्त्विति[१६] कीर्त्तितः।।२४।। एकोच्चारणमात्रेण ददाति परमं पदम् । मानसस्तु मनोनिष्ठा द्विधैव[१७] परिकीर्त्तितः[१८] ।।२५।। भरन्यासस्तु[१९] तत्राद्य आत्मन्यासो द्वितीयकः। भरन्यासस्तु[२०] पञ्चाङ्गस्तस्याङ्गानि वदाम्यहम् ।।२६।। सङ्कल्पश्चानुकूल्यस्य प्रातिकूल्यस्य वर्जनम् । रक्षिष्यतीति[२१] विश्वासो गोप्तृत्ववरणं तथा ।।२७।। कार्पण्यं चैव योगीन्द्र! पञ्चाऽस्याङ्गान्यनुक्रमात् । आत्मन्यासो गुह्यतमः शेषत्वमिति लक्ष्यते ।।२८।। भोगः[२२] शेष इति प्रोक्तो भोगी शेषीति कथ्यते। जीवात्मानमहं पूर्वं निर्लेपमगुणामलम् ।।२९।।[२३] अमरं कौस्तुभमणिं स्वरूपं भूषणप्रियम् । तस्माज्जीवश्[२४] शेषभूतस्त्वहं शेषीति विश्रुतः ।।३०।। आत्मानं[२५] कौस्तुभ इति न्यसनं मम वक्षसि[२६]। आत्मन्यास इति प्रोक्तो मुनिभिस्तत्त्ववेदिभिः।।३१।। प्रधानं बुद्धितत्त्वं च गदारूपेण धार्यते । भूतादिमिन्द्रियादिं च शङ्खरूपमधारयम् ।।३२।। अभरं शार्ङ्गरूपेण त्रिधाऽहङ्कारमुत्तमम् । अदधा[२७]-च्चक्ररूपेण मनस्तत्त्वं महामुने ।।३३।। इन्द्रियाणि दशेमानि[२८] बाणरूपैर्धृतानि च। विद्यामयं तु यज्ञा[२९]-नमसिरूपेण मे धृतम् ।।३४।। अविद्यामयमज्ञानं चर्म[३०]-रूपेण संभृतम् । धृतानि पञ्चभूतानि वैजयन्तीस्वरूपतः ।।३५।। इत्थं प्रधानं बुद्धिं च भूतादि[३१]-मखिलात्मकम् । इन्द्रिया[३२]-दिमहङ्कारं मनः सर्वेन्द्रियाणि च ।।३६।। विद्याविद्ये च[३३] भूम्यादिभूतानि मुनिसत्तम ![३४]! एतानि मत्कराब्जेषु संन्या[३५]-सं ज्ञानचिन्तया ।।३७।। आत्मसंन्यास इत्युक्तो न्यासयोग[३६] – विशारदैः। एवं कौस्तुभरूपेण स्वात्मानं मम वक्षसि ।।३८।। संन्यस्य वक्षस्यानन्दसुधारसमहर्निशम् । पिबन् पर[३७]-वशो भूत्वा तत्त्वैरायुधरूपकैः ।।३९।। मम हस्ताब्जमाधुर्यमकरन्दं निषेवयन् । बहिर्विषयवैमुख्य आत्मन्यास इति स्मृतः ।।४०।। ज्ञात्वा सम्यक् सर्वमेव[३८] मयि सर्वेश्वरेश्वरे । समाधिना रमस्व त्वं सर्वदानन्दवर्त्मनि ।।४१।। स एवमुक्त्वा[३९] संवीक्ष्य करुणार्द्र[४०] – विलोकनैः। मन्त्रिवासाऽखिलक्षेत्र [४१]-यात्रां कुरु महामते ।।४२।। तत्र स्थितानां त्वं शुद्धं चेतनानामनुत्तमम् । न्यासयोगमुपादिश्य[४२] सर्वेषां मोक्षदो भव ।।४३।।

१४–ममाचक्ष्व –क
१५–येन– घ
१६–वाचकस्त्विति –ग, घ
१७–द्विधैवापि –क, द्वैधेना –घ
१८–प्रकीर्त्तितः – क, घ
१९–करन्यासस्तु –क
२०–करन्यासस्तु –क
२१–रक्ष्यष्यतीति– क, रक्षयिष्यतीति– ख
२२–भोगम् – क, भोगशेष इति –ख
२३–मातृकायां "प्रधानं बुद्धितत्त्वं –" श्लोक एतदनन्तरं प्राप्यते।
२४–जीवशेषभूतस् –क, ख
२५–आत्माहं –घ
२६–वक्ष्यसि –क, ग
२७–अदधृच्चक्र – क, ख, अदधां –ग, घ
२८–दशेमाणि –क
२९–यद्ज्ञानम् –क, यद्ज्ञानं –ग, यत् ज्ञानं असिरूपेण –घ
३०–वर्मरूपेण –ख
३१–भूतादिमखिलात्मकम् –क, भूतादिनखिलात्मकम् –ख
३२–इन्द्रियाण्यहङ्कारम् –ख, तत्र –क
३३–तत्र –क
३४–मुनिसत्तमाः –ख
३५–संन्यस्य –घ
३६–न्यास योगमुनिशादरैः– ख
३७–पदवशो –क
३८–सर्वमेतम् –क, घ
३९–एव मुनिं संवीक्ष्य –ख
४०–करुणार्द्रावलोकनैः– क, ख
४१–ऽखिलक्षेत्रे –ख
४२–योगमुपदिश्य –क

एवमाज्ञाप्य योगीन्द्रं प्रियया सह देवराट् । अनन्ताद्यैर्नित्यमुक्तैः स्वस्थानं पुनरागमत् ।। ४४ ।।
एवं गते देवराजे स योगी योगिनां[४३] वरः[४४]। प्रहर्षमतलं गत्वा क्षेत्रयात्रा[४५]–परोऽभवत् ।।४५।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
द्वितीयोऽध्यायः ।।२।।

———

४३–जोगिनां –क
४४–इयं पङ्क्तिः– ख, मातृकायां नोपलभ्यते।
४५–यात्रापुरोऽभवत् –क

तृतीयोऽध्यायः

श्रीनारायण उवाच[1]

ततो मल्लपुरे[2] रम्ये सुपुष्पित–वनावृते। सौधप्राकारललिते पद्माकरशतैर्युते ।।१।।
मुक्तामणिसमाकीर्णे मुक्तिदे सर्वदेहिनाम् । विमलाम्बुजकल्हारकुमुदोत्पलसंयुते ।।२।।
दिव्ये सरसि कस्मिंश्चिद् राजहंसविनादिते। इन्द्रनीलोत्पले दिव्ये नीलोत्पलवरे[3] शुभे ।।३।।
कौमोदक्यंशतो[4] भूतस्तत्त्वज्ञानाऽधिको महान् । प्रविश्य हरिपादाब्ज[5]–ध्यानामृतविवर्द्धितः ।।४।।
पवित्राश्वयुजे[6] मासे धनिष्ठायां शुभे दिने[7]। प्रादुर्बभूव योगीशो जीवानां मुक्तिहेतवे[8] ।।५।।
सर्वेश्वरस्तदा देवः कोटिसूर्यसमप्रभः। कोटिकन्दर्पसौन्दर्यकोमलावयवोज्ज्वलः ।।६।।
चतुर्भुजः शङ्खचक्रगदापद्मविराजितः। सुनासः[9] सुमुखः[10] सुभ्रूः पुण्डरीकनिभेक्षणः ।।७।।
विद्रुमोष्ठः[11]सुदन्ताढ्यः सुश्रोत्रः[12] सुललाटवान् । सुगण्डचिबुक[13]–ग्रीवः सुवक्षाः सुविभूषणः ।।८।।
दिव्यचन्दनलिप्ताङ्गः पुष्पमालाविराजितः। दिव्यपीताम्बरधरो जगन्मात्रा श्रिया सह ।।९।।
नित्यमुक्तैः परिवृतः सरस्तीरमुपागमत् । नीलोत्पलान्तरस्थं तं गृहीत्वा शिशुमुत्तमम् ।।१०।।
प्रियाया हस्तकमले ददौ संपोषितुं[14] हरिः । सा समादाय तं शीघ्रं स्पृशन्ती हर्षमानसा ।।११।।
ददौ स्तन्यसुधां देवी[15] सोऽपि सद्यः प्रवर्द्धितः[16]। तदा स देवप्रवरो भूतनामाऽकरोन्मुनेः ।।१२।।
न्यासाख्ययोगं[17] परमं सरहस्यं सविस्तरम् । भक्ताय योगिवर्याय तस्मा[18] उपदिदेश सः ।।१३।।
विदित्वा न्यासयोगस्य रहस्यं मुनिसत्तमः[19] । सम्बन्धज्ञानभेदां[20]– स्तानपृच्छन्मुनिपुङ्गवः [21] ।।१४।।

श्रीभगवानुवाच

सम्बन्धज्ञानभेदेषु सम्बन्धो भर्तृभार्ययोः। श्रेष्ठ इत्युच्यते लोके तस्माद् वक्ष्यामि तं मुने ।।१५।।
मम रामावतारस्य चरित्रं परमाद्भुतम् । एतद्विज्ञान[22]– सिद्ध्यर्थमेवं पूर्वं प्रवर्तितम् ।।१६।।
न तु रावण[23] नाशार्थमेतद् बुध्यस्व[24] मानसे । रामोऽहं परमात्मा वै सीता जीव इति स्मृता ।।१७।।
अयोध्या मम वैकुण्ठं प्रपञ्चं दण्डकं[25] वनम् । तस्मिन्[26] प्रविष्टममलं लीलार्थं परमात्मनः ।।१८।।

१–सूत उवाच –ख
२–मध्वपुरे –क
३–नीलोत्पलवरशुभे –क
४–कौमोदक्या भवन्नंशस्तत्त्व –क,ख,ग
५–हरिपादाब्जम् –ख
६–पवित्राश्वतुलामासे –ख
७–पवित्राश्वयुजे मासे प्रजज्ञे वसुभे शुभे –ग,घ
८–पङ्क्तिरियं क,ग,घ, मातृकासु न दृश्यते।
९–सुनाससुमुखः– क,ख,ग
१०–सुनससुमुखः– क,ख,ग
११–विद्रुमोष्ठस्सुदन्ताढ्यः– क,ख
१२–सुश्रोत्रस्सुललाटवान्– क,ख,ग
१३–चुबुक– क
१४–संपोषि –क,घ
१५–देवि –क
१६–विवर्द्धितः –ख
१७–न्यासाख्यं योगपरमं –क,ख,ग
१८–तस्मे –क,ख,ग
१९–मुनिसत्तमाः –ख
२०–ज्ञानभेदश्चस्तो पृच्छनमुनिपुङ्गव –क
ज्ञानभेदांश्च सोऽपृच्छत् मुनिपुङ्गवः– ख
२१–मुनिपुङ्गव –क
२२–विग्यान–सिद्धयर्थ –क
२३–रावन–नासार्थ –क
२४–बुद्धस्व –ख
२५–दण्डकावनम् –ग
२६–तस्य –क,घ

सीतासदृशमात्मानं मनःसदृशरावणः। मत्सकाशादपाहृत्य[२७] प्रकृत्या मृगरूपया ।।१९।।
देहाख्यलङ्कामाविश्य वने विज्ञानसञ्ज्ञके। बध्वा[२८] स्वराज्यं[२९] बुभुजे शिरोभिर्विषयात्मकैः[३०] ।।२०।।
तदा सीता[३१] वने तस्मिन् विग्रहानुभवं मम। कुर्वती संस्थिता यद्वत्तथा[३२] त्वं ज्ञानवान् भव[३३] ।।२१।।
एवं सम्बन्धविज्ञानं संबुध्य मुनिसत्तम! मम स्वरूपानुभवं रूपानुभवमुत्तमम् ।।२२।।
मद्गुणानुभवं चापि विभूत्यनुभवं परम्[३४]। कुरुष्व प्रत्यहं योगिन्! स्थिरेण सुसमाधिना ।।२३।।
संसाराब्धि[३५] – निमग्नानां देहिनां कृपया मम । तत्त्वं संबोधय सदा त्वामहं चानुवर्त्तये ।।२४।।
क्षेत्राणि मम दिव्यानि सञ्चरस्व यथासुखम् । भूमौ सञ्चरणं कुर्वन्[३६] त्वत्पादस्पर्शनाद् भुवम् ।।२५।।
पवित्रां कुरु योगीश! त्वदङ्गस्पर्शवायुना । मत्तत्त्वाभिमुखाः[३७] सर्वे भवेयु[३८] – र्मत्समाश्रिताः ।।२६।।
इत्येतद्वचनं श्रुत्वा मुनि[३९]–र्भगवतस्तदा । विनयावनतो भूत्वा प्रणिपत्य जनार्दनम् ।।२७।।
तेन सम्यगनुज्ञातो यात्रां प्रति ययौ मुदा ।।२८।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
तृतीयोऽध्यायः ।।३।।

२७–मत्सकाणदयो –क मत्सकाशादयो –ख,ग
२८–मध्ये –घ
२९–सुराज्यं –ग, स राज्यं –घ
३०–वियात्मकैः– ख
३१–कुर्वन्ति–क,ख, कुर्वन्ती –ग,घ
३२–तदा –क
३३–कुर्वन्ती सा स्थिताऽत्र यद्वत् तद्वत्त्वं ज्ञानवान् भव –घ
३४–मद् गुणानुभवश्चापि विभूत्यानुभवं परम् –क
मद्गुणानुभवश्चापि विभूत्यनुभवं –ख
३५–संसाराध्विनि –क
३६–कुर्वस्–क
३७–मत्तत्त्वाभिमुषास् –क, मत्तत्त्वाभिमुखाः– घ
३८–भवेयुरुषसत्समाश्रिताः– क,
भवेयुः मत्समाश्रिताः –ख, भवेयुस्त्वासमाश्रिताः– ग,
भवेयुस्त्वां समाश्रिताः– घ
३९–मुनिर्भिर्भगवतस्तदा– क

चतुर्थोऽध्यायः

श्रीनारायण उवाच

ततो मयूरनगरे हेमप्राकारवेष्टिते । प्रासादशत[1] – सङ्कीर्णे दिवः[2] – खण्डमिव स्थिते ।।१।।
कलहंसक्वण[3] – त्क्रौंचमत्तभृङ्ग[4] – निषेविते । लताह्रदाख्य[5] – सरसि शरत्कैरवमध्यमे[6] ।।२।।
प्रविश्य नन्दकस्यांशस्त[7] – न्मासे शतभे शुभे। सञ्जातो दिव्यवपुषा शुभ[8] – लग्ने शुभे दिने ।।३।।
तदा स श्रीश्वरो देवः श्रिया कारुण्यशीलया। तटे[9] नीलाम्बुद इव प्रादुरासीत् कृपानिधिः ।।४।।
तं दृष्ट्वा सहसा तस्मिन् शिशौ[10] बालार्कसन्निभे। आसारकरुणावर्षं ववर्ष प्रियया सह ।।५।।
तेन संवर्द्धिततनुः[11] सद्यो[12] यौवनमागतः। हर्षेण तं परिष्वज्य महतां त्वं महान् भव ।।६।।
इति तस्य महन्नाम[13] चक्रे स[14] पुरुषोत्तमः। एवमन्वर्थनाम्नश्च श्रीकान्तस्य महात्मनः ।।७।।
उपादिशन्[15] न्यासयोगं भगवान् पुनरब्रवीत् । तत्त्वत्रयं प्रवक्ष्यामि शृणुष्व मुनिपुङ्गव! ।।८।।
चिदचिच्चेश्वरश्चेति त्रिधा तत्त्वं प्रवर्त्तते। चित्स्वरूपमणु[16] ज्ञेयं निर्विकारं निरञ्जनम् ।।९।।
ज्ञानानन्दमयं शान्तं शाश्वतं त्वजमव्ययम् । स्वस्मै स्वयं प्रकाशाख्यं व्याप्तिशीलं च निर्मलम् ।।१०।।
अहमर्थं च निर्लेपं महास्यैकप्रियं सदा। भिन्नत्वेन प्रतिक्षेत्रं गतमष्टगुणात्मकम् ।।११।।
अचिन्त्यं नित्य[17]मव्यक्तमिति [18] चिद्रूपमुच्यते। पञ्चभूतान्यहङ्कारो विषयाणां च पञ्चकम् ।।१२।।
इन्द्रियाणि दशैकं च बुद्धिरव्यक्तमेव च। चतुर्विंशतितत्त्वानि ह्येतानि मुनिपुङ्गव ।।१३।।
अचिद्रूपमिति ज्ञेयं त्रैगुण्यं विषमं जडम्[19]। ईश्वरस्त्वहमेवाऽत्र सर्वेशस्तु सनातनः ।।१४।।
सर्वव्याप्तावबोधाम[20]–लानन्दाकारसंयुतः। अनन्तः[21] सगुणः साक्षी शास्ता सर्वस्य धारकः ।।१५।।
स्वाधीनसर्वव्यापारः श्रीभूनीला[22]– धिपः प्रभुः। दिव्यलावण्य[23]– सौन्दर्यसंयुक्तः शुभविग्रहः ।।१६।।
अस्मिन् पदार्थत्रितये त्रिपदार्थात्मकं[24] जगत् । मच्छरीरमिति ज्ञेयं शरीरी चाऽहमीश्वरः ।।१७।।
बुध्यस्वैतन्मुनिवर! सम्बन्धज्ञानमुत्तमम् । एतज्ज्ञात्वा[25] जनाः सर्वे यास्यन्ति[26] परमं पदम् ।।१८।।

१–सतसङ्कीर्णे –ग
२–दिवखण्डमिव –क,ख
३–क्वनत् –ख,ग
४–मत्तभृङ्गनिषेविते –ग,घ
५–लताकुन्दाख्य –क,ख
६–शरत्कैरवमध्यगः– घ
७–नन्दकस्यांशतुला मासे शते शुभे –ख
८–शुभे लग्ने –ख
९–तटिनीलाम्बुद इव –क, तटनीलाम्बुद इव –ख
१०–शिशौ–क
११–संवर्द्धिततनयः– ख, संवर्द्धित तनुम् –घ
१२–यौवनमागतम् –क,घ
१३–ममम् –क
१४–च–क, ख
१५–उपदिश्यन् –क,ख,ग
१६–मनुज्ञेयम् –क
१७–चिन्त्यम् –क, ग
१८–मव्यक्तं इति –ख
१९–विषमण्डजम् –क
२०–सर्वव्याप्तावबोधात्मणा –क
व्याप्तावबोधात्मा आनन्दकर –ख
२१–अनन्तसगुनसाक्षीसास्ता –क,
अनन्तस्सगुण साक्षी –ख,
अनन्तस्सगुणश्शाक्षी सास्ता० –ग
२२–लीलाधिपः– ख,ग,घ
२३–दिव्यसारापसौन्दर्य
२४–द्विपदार्थात्मकम् –ख
२५–एतद् ज्ञात्वा –क,ग, एतत् ज्ञात्वा –घ
२६–प्राश्यन्ति –क,ग,घ

एवमुक्त्वा रहस्यार्थं सर्वं तस्मै महात्मने[२७]। संबोधयन्निदं ज्ञानं सर्वेषां त्वं शरीरिणाम् ।।१९।।
कुरु भूचरणं नित्यमेवमाज्ञाप्य केशवः। तस्य हृत्कर्णिकामध्ये प्रविवेश श्रिया सह ।।२०।।
ततस्त्रयो योगिनस्ते सरो भूतो[२८] महानपि। हरेराज्ञानुसारेण चरन्तः पृथिवीं सदा ।।२१।।
पवित्र[२९]यन्तस्तीर्थानि क्षपास्वद्रि[३०]–निकेतनाः। धरित्रीं पावयन्तस्तु कीर्तयन्तो हरेर्गुणान् ।।२२।।
भगवद्दास्यभोगैकभोग्य[३१]– सत्सङ्ग[३२]काङ्क्षिणः। एकाकिनोऽभिन्नमार्गा न्यासयोगानुभाविनः[३३] ।।२३।।
नित्यमुक्तैकभोग्यश्रीश्रीशाङ्घ्रिद्वयभावनाः [३४]। विनिवृत्तान्नपानाद्या क्षुत्तृट्[३५]–श्रमविवर्जिताः ।।२४।।
पुष्टाङ्गास्तुष्टहृदयाः पवित्रीकृतभूजनाः। नित्यं सार्य[३६]–गृहास्तुल्यशीतोष्णसुखदुःखिनः ।।२५।।
शरीरादिषु निर्मोहा भगवच्चरणार्थिनः। भोगासक्तजनाद् भीता भगवत्प्रियबान्धवाः[३७] ।।२६।।
क्वचित्ते[३८] मिलिताः सर्वे परमानन्दसम्भृताः। प्रणामान् दण्डवत्कृत्वा दूरतो भुवि संश्रिताः ।।२७।।
तद्दर्शनमहाह्लादपुलकीकृतविग्रहाः । अन्योऽन्यालिङ्गनकरा आनन्दाश्रुविलोचनाः ।।२८।।
पुनः पुनः प्रकुर्वाणा[३९] दृष्टि[४०] चाऽनिमिषं चिरम् । पौनःपुन्याञ्जलिपुटा[४१] विनम्रीकृतमस्तकाः ।।२९।।
धन्योऽस्मीति वदन्तस्ते निषीदन्तस्समीपतः[४२]। वर्द्धन्तो [४३] विनयोपेताः पृच्छन्तस्ते[४४] परस्परम् ।।३०।।
परतत्त्वं भगवतः शेषशेषित्वलक्षणम् । न्यासयोगं रहस्यं च शृण्वन्तश्च परस्परात्[४५] ।।३१।।
अन्योऽन्यसत्सङ्गवशात् परमानन्दसंयुताः।[४६] पुनः पुनः पृथग्भिन्नाश्चरन्तो वसुधां सदा ।।३२।।
कदाचिद् वामनक्षेत्रं संप्राप्तास्ते यदृच्छया। तत्पुरस्योपकण्ठे[४७] तु संप्राप्तेषु च योगिषु ।।३३।।
भगवानपि सर्वात्मा हरियोंगीश्वरेश्वरः। जिज्ञासुः करुणां तेषां विदित्वापि[४८] सतां पतिः ।।३४।।
अकालवृष्टिं [४९] महतीं स चकार निरन्तराम्[५०]। विद्युद्भिरशनिभिश्च [५१] सर्वत्रातिभयङ्कराम् ।।३५।।
तदा सुनिविड[५२] – ध्वान्ते कासारो[५३] वर्षपीडितः। पुरं प्रविश्य देहल्यां कस्य[५४] – चित्पुण्यभागिनः ।।३६।।
प्रविवेश महायोगी भगवद्[५५] – ध्यानतत्परः। अनन्तरं भूतयोगी[५६] देहलीमेव तां गतः ।।३७।।
तस्याः[५७] सङ्कुचितिं दृष्ट्वा बहिरेव स्थितो मुनिः। तं बहिः स्थितमाश्वास्य वर्षेणात्यन्तपीडितम् ।।३८।।
स्थलं ददौ सरो योगी[५८] सर्वजीवदयापरः। तस्मिन् सङ्कुचितस्थाने स्थित्वा तौ मुनिसत्तमौ ।।३९।।
श्रीशपादाम्बुज[५९]– ध्यानसंलग्नहृदयौ स्थितौ। तदा महामुनिस्तत्र वर्षवारि [६०]– परिप्लुतः ।।४०।।

२७–महामुने –क
२८–सरोभूतमहानपि –क,ख
२९–पवित्रयन्ति –क,ख,ग
३०–क्षपाष्वद्रिनिकेतनाः– ख
३१–भोग –क
३२–मत्सङ्ग –क
३३–न्यासयोगान् भागिनः– ख
३४–त्रितीयमुत्तैरुपभोग्य श्रीशाङ्घ्रिद्वयभावना –घ
३५–तृष्णा –क, तृषा –ख
३६–शायं –क,ख
३७–बन्धवः– घ
३८–क्वचिदिदृशे कृताः– क,ख
३९–प्रकुर्वाना –क
४०–दृष्टिमनिषं –क,ग
४१–पुण्यांजलिमहा –क, पुण्यांजलिमर्ह –ग
४२–समापदः– क,ग, समंपदे –घ
४३–वीर्द्धते –क, धीर्द्धने –ग
४४–पृच्छन्ते स्म –क
४५–मातृकायां श्लोकोऽयं नोपलभ्यते –क
४६–वशातपरमानन्द प्रेमाह्लादसंयुतः– क
४७–तु संप्राप्ता योगिपुङ्गवाः– क
४८–विदित्वाप सदापतिः– क,
विदित्वापि सदंपतिः– ग
४९–अकालदृष्टिं –क
५०–निरन्तरम् –क,ग
५१–रसानभिश्च –क रशनीभिश्च –ग,घ
५२–तदाशुनिविड –ग
५३–कासारे –क
५४–कश्यचित् –क
५५–भगवत् –घ
५६–योगि –क
५७–तस्य सङ्कुचितं –क,ग
५८–योगि –क
५९–पदाम्बुज –क,ग
६०–वर्षेणातिपरिप्लुतः –घ

तां देहलीं समागम्य तौ दृष्ट्वा विनिवर्त्तितः। गच्छन्तं महदाख्यं तौ दृष्ट्वोत्थाय कृताञ्जली ।।४१।।
बलान्त्रिगृह्य हस्ताभ्यां देहलीं विविशुस्त्रयः। एकस्यां हस्त[६१]–मात्रायां परदुःखासहिष्णवः ।।४२।।
देहल्यां योगिनः सर्वे भृशं सङ्कुचिताः स्थिताः।
निरुच्छ्वासा [६२]निश्चलाङ्गा [६३]निष्पन्दा भृश [६४] – कर्षिताः ।।४३।।
तूष्णीमूचु[६५]–र्हरिध्यानामृतपानसुनिर्वृताः [६६]। तदा विश्वेश्वरो देवः[६७] प्रहसन् देहलीं गतः ।।४४।।
तन्मध्येऽतिवृद्धोऽभूत् तत्क्षमाचलनेच्छया। तेन संबर्द्धमानेन जगन्नाथेन योगिनः ।।४५।।
दारुयन्त्रेण संपिष्टा इक्षुखण्डा इव स्थिताः। तदा ते विस्मिताः[६८] सन्तो नापश्यन् क्लेशकारिणम् ।।४६।।
चतुर्थं तत्र संविष्टं ज्ञानदृष्ट्या समीक्ष्य तु[६९]। भगवानिति तं ज्ञात्वा सरोयोगी हरिप्रियः ।।४७।।
स्थालीं[७०] कृत्वा तदा भूमि[७१]–माज्यमधिजलं मुदा। अंशुमन्तं[७२] ज्वलद्दीपमेवं नीराजनं हरेः ।।४८।।
कृतवान् योगिनामिन्द्रः संतुष्टोऽभूज्जनार्दनः। भूतयोगी तथा प्रेमस्थालीं[७३] कृत्वा कृताञ्जलिः ।।४९।।
भक्तिमाज्यं सुहृत्कोशं[७४] वर्त्तिं कृत्वा समाधिना। सुज्ञानदीपं सङ्कल्प्य[७५] मुनिस्तस्मै समर्पयत् ।।५०।।
तेन दीपप्रदानेन सर्वं नष्टमभूत्तमः। ततो हरिर्देवदेवः प्रादुरासीन्महात्मनः ।।५१।।
पुरतो महदाख्यस्य श्रिया भूम्या सह प्रभुः। तमपश्यन्महायोगी शङ्खचक्रगदाधरम् ।।५२।।
आजानुबाहुं सुमुखं तप्तजाम्बूनदप्रभम् । दिव्यपीताम्बरधरं दिव्यचन्दनलेपितम् ।।५३।।
दिव्यस्रङ्मालिनं [७६] पूर्ण[७७] पीनवक्षोविराजितम् । पीनवृत्तायतभुजं पुण्डरीकायतेक्षणम् ।।५४।।
कोटिसूर्यप्रतीकाशं कोटिमन्मथसुन्दरम् । किरीटहारकेयूरकुण्डलाङ्गदधारिणम् ।।५५।।
स दृष्ट्वा परमात्मानं महायोगी प्रणम्य तम् ।। विनयावनतो भूत्वा संप्रहृष्ट[७८]–तनूरुहः ।।५६।।
आनन्दोदीर्णवाष्पाम्बुलोचनः सत्कृताञ्जलिः। पुनः पुनः प्रणम्याह हर्षगद्गदया गिरा ।।५७।।
भजे हिरण[७९]मयीं लक्ष्मीं महिषीं ते जगत्प्रसूम्[८०]। भजामि विमलां मूर्त्तिं कोटिसूर्यसमप्रभाम् ।।५८।।
करतल[८१]म्बुजाकारां रत्ननूपुरशोभिताम् । शङ्खचक्रध्वजाम्भोजवज्रच्छत्राङ्कुशाङ्कितम् ।।५९।।
भजामि चरणद्वन्द्वं जगतां शरणं वरम् । बालसूर्यांशुसङ्काशां भजामि कनकाम्बराम् ।।६०।।
दिव्यरत्नोज्ज्वल[८२] त्काञ्चीं भजे किङ्किणिनिस्वनाम् । वात्सल्यतत्त्वं श्रीवत्सं भजामि तव वक्षसि ।।६१।।
शङ्खचक्रगदापद्मधरान् करिकरो[८३]–त्तमान् । बाहून्[८४] भजामि देवेश ! क्वणत्कङ्कणशोभितान्[८५] ।।६२।।
शरच्चन्द्रसमं वक्त्रं भजामि स्मित[८६]–शोभितम् । विशदाम्भोजविस्तीर्णे भजे तव विलोचने ।।६३।।

६१–एकस्यावासमात्रायाम् –क, ग
६२–निरुत्थासा–क
६३–निश्चलना–ग
६४–भृशंकर्शिता–क, ख, घ
६५–भूता –क
६६–सुनिष्ठिताः– क
६७–देवोप्रसन्नः– ग
६८–विस्मितास्सन्तो–ग
६९–तम् –क
७०–स्थालिं–क
७१–भूमिं आज्यमधि–घ
७२–अंसुमंतम् –क
७३–स्थालिं–क
७४–शुकोशं –क
७५–सङ्कल्प –क
७६–दिव्यस्रग्मालिनं–क, ग
७७–पूर्वम् –क
७८–संपृष्टतनुरुहः– क
७९–हिरन्यमयीं –क
८०–जगत्प्रभुः– क
८१–करद्दलाम्बुजा –ग, स्फुट इवाम्बुजाकारं–घ, करदलाम्बुजाकार –क
८२–रत्नज्वलत् –क
८३–करकोत्तमान् –क
८४–बहून –क
८५–शोभितम् –क
८६–स्मितशोभितम् –क

चंचद्[८७]–गण्डस्थले विद्युच्चलत्कुण्डलमण्डिते। माणिक्यमुकुटं दिव्यं भजामि महदुज्ज्वलम् ।।६४।।
दिगन्तलग्नकोटीरमणिकान्तिविराजितम् । भजामि मे पूर्वजन्मकृताशेषतपः – फलम् ।।६५।।
लक्ष्मीशं सर्वलोकानां प्रभुं मज्जनकं हरिम् । भवाब्धिलङ्घनोपायमचिन्त्यं गुरुमव्ययम् ।।६६।।
धन्योऽस्मि कृतकृत्योऽस्मि चरणौ शरणं भजे। मुकुन्ददर्शनाह्लादपरिपूर्णरसात्मकौ[८८] ।।६७।।
आनन्दगद्गदग्रीवौ[८९] वाक्यमेवमुदीरतौ[९०]। कासारो भूतयोगी च तौ दृष्ट्वा जगदीश्वरम् ।।६८।।
तद्दर्शनामितानन्दसंभृताङ्गरुहाञ्चितौ[९१]। प्रियमेतद्[९२] हि संस्मृत्य[९३] पारवश्यं[९४] गतौ मुनी[९५] ।।६९।।

तथा पूर्णधियां तेषां त्रयाणां सर्वगो हरिः। अचिन्त्यमप्रमेयं तद्विश्वरूपमदर्शयत् ।।७०।।
त्रयः[९६] सर्वमयं रूपं दृष्ट्वाऽऽनन्दमयं शुभम् । प्रणम्यानन्दमग्नास्ते तुष्टुवु[९७]–र्योगिशेखराः ।।७१।।
जय द्विसप्तलोकस्य श्रीसाम्राज्य[९८] – धुरन्धर । जय सर्वसुरस्तोम सार्वभौमाखिलेश्वर ।।७२।।
जय भक्तजनालोकसाफल्यमय – विग्रह। जय नीलधनश्याम जय रुक्माम्बराञ्चितम् ।।७३।।
जय पद्मा[९९]–पदन्यासचारुवक्षःस्थल प्रभो[१००]। जय सर्वाघहरणनामसङ्कीर्त्तनाच्युत ।।७४।।
जय योगि[१०१] –हृदम्भोजकर्णिकामध्यसंस्थित ! जयामलसिताम्भोजपत्रविस्तीर्णलोचन ।।७५।।
जय खण्डितसंदुष्टक्षपाचरपराक्रम। जय सर्वजगद् – व्यापिन् जय वेदान्तगोचर ।।७६।।
जय पद्मासहाय त्वं जय कृष्ण जनार्दन। वयं त्वदङ्घ्रिकमलं[१०२] ब्रजामः शरणं परम् ।।७७।।
एवं स्तुत्वा हृषी[१०३]केशं महायोगीश्वरेश्वराः। त्रीन्[१०४] प्रबन्धान् तथा[१०५] चक्रुर्वेदसारार्थसङ्ग्रहान् ।।७८।।
मुक्तिमण्डपसोपानान्मुक्तिचिन्तामणीन् शुभान्। ततो विश्वमयो देवो वेदवेद्यो दयापरः ।।७९।।
तेषां योगीश्वराणां तु हृत्पद्मेषु[१०६] सदावसत्[१०७]।

योगिनाथास्त्रयो[१०८] दिव्या[१०९] योग[११०]–साम्राज्यवैभवम् ।।८०।।

सम्भुज्यमानाः सततं चरन्तो भुवि संस्थिताः ।।८१।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
चतुर्थोऽध्यायः ।।४।।

———

८७–चिंचिद्गण्डस्थले–क, चंचत्गण्डस्थले –घ
८८–रसात्मके –क,घ
८९–आनन्दगद्गदगिरो–क, आनन्दगद्गद्ग्रीव –घ
९०–मंदीरते –क, मुदीरतः– ग
९१–रुहान्वितौ–क
९२–मेतं हि–घ
९३–विसृज्य–क
९४–स्वारवत्यां–क
९५–गतो मुनिः– क,घ
९६–त्रयस्सर्वमयं –क
९७–तुष्टुवुर्योगेश्वरेश्वराः– क
९८–सम्राज्यस्य धुरन्धर–क,ग
९९–पद्मपदन्यास–क
१००–प्रभु –क
१०१–जोगिहृदाम्भोज–क, हृदाम्भोज –ग
१०२–कमले–क
१०३–हृषिकेशं–ग
१०४–तत् –क
१०५–तदा –क
१०६–हृत्पद्मे –ख
१०७–सदावसन् –क,ख
१०८–योगिनाशा–क
१०९–दिव्य–ग,घ
११०–योगिसाम्राज्य- क,ख

पञ्चमोऽध्यायः

श्रीनारायण उवाच

ततस्ते योगिनः सर्वे चरन्तः पुण्यभूमिषु। एतदाश्रममागत्य ममा[1]न्तिकमुपागताः ।।१।।
नत्वा मां संस्तवैर्दिव्यैश्चक्रिरे[2] स्तोत्रमुत्तमम् । स्थित्वात्र कञ्चित्[3] कालं ते मम पूजापरायणाः ।।२।।
अत्र स्थितानां मर्त्यानां तत्त्वत्रयमनुत्तमम् । विज्ञानमुपदिश्याथ योगार्थं चक्रिरे [4] मनः [5] ।।३।।
मनोहरविशालासु गुहासु तिसृषु स्थिताः। सम्यक् पद्मासनासीनाश्चैला[6] – जिनकुशोत्तरे ।।४।।
आसने प्राङ्मुखाः[7] सन्तः प्राणायामपरायणाः। अष्टाक्षरेण मन्त्रेण रेचकं पूरकं ततः ।।५।।
कुम्भकञ्च तथा चक्रुर्मन्दं मन्द[8]मनुक्रमात् । हृत्पद्ममुन्मुखीकृत्य कुम्भकोद्भववायुना ।।६।।
सम्फुल्लयन्त[9] स्तत्पद्मं विज्ञानरविणा[10] हृदि। तत्कर्णिकोपरितले तप्तजाम्बूनदप्रभे ।।७।।
वामाङ्कार्द्धे [11] श्रिया सार्धं विभ्रच्छृङ्गार[12]– शोभया । भूमिनीला[13]– समायुक्तं तरुणार्क[14]– समप्रभम् ।।८।।
किरीटिनं दिव्यहिरण्मयाकृर्ति[15] पीताम्बरं चन्दनदामभूषितम् ।

सुपीन[16]वृत्तायतबाहुभिः शुभैः केयूरत्त्रिाङ्गद[17] कङ्कणाञ्चितैः ।।९।।
अब्जासि [18]–खेटै:[19]– सगदेषुशार्ङ्ग –[20]युतैर्भुजैरष्टभि [21]– रूर्जिताङ्गम् ।

बालार्कमण्युज्ज्वल[22]–वत्प्रभाभि–र्हारैश्च विद्योत[23]– विशाल[24]–वक्षसम् ।।१०।।
वज्रेन्द्रनीलादिमणिप्रभाभं [25] काञ्ची [26] – गुणौज्ज्वल्यकटिप्रदेशम् ।

करीन्द्रहस्तप्रतिमोरुयुग्मम् आदर्शरम्याकृतिजानुयुग्मम् ।।११।।
रक्ता[27]रविन्दाञ्चितपादपद्मं विद्युच्चलत्कुण्डलकर्णयुग्मम् ।

भ्रूयुग्मसौन्दर्यतिरस्कृताभ [28]– प्रसूनचापं सुकपोलयुग्मम् ।।१२।।
सद्वीक्षणोल्लोलविनीतशुभ्र [29]– ताराविशालायतकञ्जनेत्रम् ।

सुनासिकं सुन्दरदन्तस्फुरत्[30]–प्रवालशोभारुणबिम्बमोष्ठम्[31] ।।१३।।

१–मामन्तिकं–ख २–चकुस्ते –घ
३–कश्चित् –क ४–चक्रिरे –क
५ –मुनेः –क, मुने –ख ६–चेलाजिन –ख
७– ाङ्मुखास्सन्तः– क
८–म दंमध्यमनुक्रमात् –क, ग,घ
९–सं ल्लयं –क १०–रविना –क,ख
११–वा ांकायाश्रिया सार्द्ध –क, वामाङ्काया श्रिया सार्द्ध –ख, व ांकार्द्धिश्रिया सार्द्ध –ग
१२–विलस संगातु शोभया–क, विभृतश्रृङ्गारश भया–ख, विभृत्सृंगार–शोभया–ग, विभुसङ्गातिशो या–घ
१३–लीला –ा घ
१४–तरुणी कुश रप्रभम् –क
१५–हिरन्मयावृत्ति– ;
१६–सपीनवळा यत - क, र ीनवृत्तायत –ख
१७–हाराचित्रांगदभूषणान्वितैः– घ
१८–अब्जारी –ग,घ
१९–खेट –क,ख,ग
२०–शाङ्गिणैकैर्युतै –क, शाङ्गिकैर्युतै –ख,ग
२१–रष्टभिर्भुजे –ग
२२–मण्युज्वलेवत् –क, मण्वज्वित –ख, मण्युज्ज्वलमणि –ग, मालागुणोज्वल्यमणिप्रभाभि–घ
२३–विद्योति –घ २४–विलास–ग
२५–प्रभावं –क, प्रकाशं –ख
२६–कांचिणोज्वल्य–ख
२७–रत्नारविन्दा–क,घ
२८–तिरस्कृताश्री–ख,ग, तिरस्कृतप्रसूनेषुचापम्–क
२९–शुभू –ग, शुभ्र –घ, सुप्रभा –ख
३०–विस्फुरत् –क,ख,ग,घ
३१–बिम्ब ओष्ठम् –ख, विद्रुमोष्ठम् –ग,घ

चञ्चच्छरच्चन्द्रलसन्मुखाम्बुजं शुचिस्मितं सान्द्रकृपावलोकनम् ।।१४।।
एवं ध्यात्वा हृषीकेशं[३२] तस्य देवस्य वक्षसि। प्रत्यगात्मानमत्यन्तज्वलत्कौस्तुभरूपिणम् ।।१५।।
कृत्वाऽनन्तस्य[३३] तद्वक्षःस्थलानन्दाब्धिसंप्लुताः। पादारविन्दमाधुर्यमकरन्दरसामृतम् ।।१६।।
अपिवन्ना[३४]दिदम्पत्योः सदा परवश[३५]–ङ्गताः। ततत्वैरस्त्रस्वरूपैस्तत्करपद्मेषु संस्थिताः[३६] ।।१७।।
मकरन्दानन्दरस[३७] मास्वाद्यानन्दनिर्भराः। एवं समाधिना युक्ताः कृत्वैतद्योगमुत्तमम्[३८] ।।१८।।
बाह्यप्रपञ्चं विस्मृत्य चिरकाल[३९] समं[४०] स्थिताः। आश्रितानां सदा तेषां समीप्सित[४१]–प्रदानदाः ।।१९।
मद्विश्लेषा[४२]–सहास्ते वै मद्भक्ता एव मे प्रियाः। कदाचिद् विश्वसृग्ब्रह्मारुद्रेन्द्र[४३]–प्रमुखैर्वृताः ।।२०।
सनकाद्यैर्मुनिवरैर्ममाश्रममुपागमत् । त्वया मया च रहितं दृष्ट्वाश्रममिदं मुनीन् ।।२१।
अपृष्ट्वा[४४] तैः समाख्यातो ममान्तिकमुपागमत् । नत्वा मां स्तुतिभिः स्तुत्वा विनयेन समन्वितः ।।२२।
उवाच प्राञ्जलिर्ब्रह्मा वाक्यं वाक्यविशारदः[४५]।

ब्रह्मोवाच

अत्र स्थितः किमर्थं त्वमुत्सृज्य स्वपदं हि तत् ।।२३।।

श्रीनारायण[४६] उवाच

अत्रैते मद्भक्तवर्या धृत्वा योगमनुत्तमम् । वसन्ति[४७] मत्प्राण[४८] – भूतास्तस्मादत्र वसाम्यहम् ।।२४।
एतेषां दर्शनं ब्रह्मन्! योग[४९]–विद्यानुकाङ्क्षिणाम् [५०]। आवश्यकं मया प्रार्थ्यं[५१] कर्त्तव्यः सत्समागमः ।।२५।
तस्मादहं वसाम्यत्र क्षणार्द्धं[५२] त्रा सुरोत्तम । पावनं[५३] मम भक्तानां सङ्गमं मोक्षसाधनम् ।।२६।

ब्रह्मोवाच

कथमेते योगसिद्धा[५४]– स्वद्भक्ताः पुरुषोत्तम! मां चैते नावलोकेयुस्त्वाम[५५] – प्यद्य वदस्व किम् ।।२७।

श्रीनारायण[५६] उवाच

ब्रह्मानन्दानुभाविनां [५७] महायोगधृतात्मनाम् । प्रपञ्चातीतदृष्टीनां किमर्थं वो[५८]ऽवलोकनम् ।।२८।

ब्रह्मोवाच

परीक्षे[५९] विविधोपायैरेतेषां योगनिश्चलम्[६०]। अनुज्ञां देहि मे देव प्रत्यक्षं भवतु प्रभो ।।२९।
एतेषां[६१] चैव माहात्म्यं[६२] प्रकटीकरवाण्यहो[६३]। प्रहृष्टो धर्षणे[६४] तेषामनुज्ञां समदामहम्[६५] ।।३०।

३२–हृषिकेशं –ग
३३–कृत्वानन्तास्य–क, कृत्वा विन्यस्य–ख, कृत्वानम्यास्य –घ
३४–अधिपंन्नाधिदम्पत्यौ –क, अवपन्नादि दम्पत्योः– ख
३५–वसंगता –क ३६–संस्थितं –ग
३७–रसमास्याद्यानन्द –क, रसमास्वादानन्द –ग
३८–योगमनुत्तमम् –क ३९–चिरकालैव –क
४०–संस्थिताः– क, हिसंस्थिताः– ख
४१–समीप्सितदानदा–क, समीशित–ख, समीपेस्थितवानहम्–घ
४२–मत्त विश्लेषा सह –क, मद् विश्लेषा सहाते वै–ख, भक्तविश्लेषमसहन् –घ ४३–महेन्द्रप्रमुखै –ख
४४–अपृष्ट्वा तोन् –क, तैस्समाख्यातो –ख
४५–विसारदः– क ४६–नारायण –क,ख
४७–वशंति –ग ४८–प्राणभृता –क, प्राणभृतस् –
४९–योगि –क
५०––नुकांक्षिभिः–ग, –भिकांक्षिभिः– घ
५१–प्रार्थि –क, चापि–ग,घ
५२–क्षणार्ध –ग,घ ५३–पारनं –क
५४–योगसिद्धाः– क,ख,ग,घ
५५–कारणं तद् –ख ५६–नाराया उवाच –क,ख
५७–नुभविनां –क,घ, भवीनां –ख
५८–नौ –ख ५९–परीक्ष्ये –क,ख,ग
६०–निश्चलाम् –क ६१–एतेनैषां तु –क
६२–योगमाहात्म्यं –ख, तु माहात्म्यं च –ग
६३–कुरुवामिति –क, करवामीति –ख, कुरुतामिति –
६४–द्वर्षणे –क,ख, दर्शणे –घ
६५–समदाम्यहं –क, समादाम्यहं –ख

मयैव[६६] समनुज्ञातः[६७] परमेष्ठी चतुर्मुखः। आहूय पुष्पधन्वानं साप्स[६८] – रोगणमब्रवीत् ।।३१।।
त्वं गत्वा मदनामीषां[६९] योगविघ्ने प्रयत्नवान् । अप्सरोभिः कुरुष्वाद्य तेनैव[७०] सम्प्रचोदितः ।।३२।।
ताभिः परिवृतो गत्वा योगिनस्तान् दृढव्रतान् । नृत्यैर्गेयैः सुसम्पूर्णैरुपायैर्विविधैरपि[७१] ।।३३।।
न शेकु[७२] – रुन्मीलयितुं नेत्राण्येषां महात्मनाम् । पुनर्विश्वसृजं गत्वा यथावृत्तं न्यवेदयन्[७३] ।।३४।।
ततः शार्दूलसिंहादीन्गजांश्च[७४] शरभानपि[७५]। सृष्ट्वा वर्षं ततश्चक्रे विच्छिन्न[७६]– करकैः सह ।।३५।।
वर्षे भयङ्करे तस्मिन् मृगा वर्षेण पीडिताः। तद्गुहां त्वरितं[७७] प्राप्य निविडाः सर्वतोऽभवन् ।।३६।।
गुहासु तासु योगस्थान् शिलीभूतान्[७८] मुनीश्वरान् । मृगास्ते मर्दयामासुः पादक्षेपैः[७९] सुदारुणैः ।।३७।।
तेषां तु केचिच्छरभाः[८०] क्षुधासंपरिपीडिताः। बभक्षु[८१]– र्योगिवर्यास्तान् दन्तघट्टनपीडनैः[८२] ।।३८।।
तत्कुक्षौ संस्थिताः सर्वे ध्यानामृतसुपूरिताः। तेनैव पोषिताः सन्तः सुखेनैवोपतस्थिरे[८३] ।।३९।।
अजीर्णाहार[८४]– दोषेण शरभा[८५] विहता[८६] भृशम् । कृशीभूता निरुच्छ्वासाः[८७] प्राणान्तकमुपागमन्[८८] ।।४०।।
एवं मृगान् हतान् दृष्ट्वा निश्चलांस्तान् मुनीनपि। ब्रह्मा सुविस्मितो भूत्वा प्रशशंस[८९] मुनीश्वरान् ।।४१।।
दिव्यज्योतिर्मयान् देहान् तेषां दृष्ट्वाऽब्जसम्भवः। प्रदक्षिणा[९०]– नमस्कारान् कृत्वा देवैर्महर्षिभिः ।।४२।।
योगप्रभावं तं ज्ञात्वा प्रशशंस[९१] पुनः पुनः। एवं ज्ञात्वा[९२] तत्प्रभावं योगदार्ढ्यमनुत्तमम् ।।४३।।
मामागत्य[९३] नमस्कृत्य[९४] तेषां योगस्य लक्षणम् । पृष्ट्वा[९५] मां प्रार्थयामास स योगो दीयतामिति[९६] ।।४४।।
ततो[९७]ऽहमददां तस्मै शेषशेषित्वलक्षणम् । योगं गुह्यतमं लोके देवानां योगिनामपि ।।४५।।
ततो ब्रह्मा सुसंहृष्टो देवैः सह महर्षिभिः। अनुज्ञातो मया प्रीत्या स्वधाम परमं ययौ ।।४६।।
ततः काले बहुतिथे[९८] त्रयस्ते योगिसत्तमाः। समाप्य योगनिष्ठां तां मत्समीपमुपागताः ।।४७।।
प्रणम्य स्तुतिभिः स्तुत्वा मया सम्प्रेषिताः[९९] प्रियात् । सुपुण्यं नैमिषारण्यं[१००] प्रापुस्ते मुनिपुङ्गवाः ।।४८।।
तत्र स्थितं हरिं देवं संदृष्ट्वा कृतवन्दनाः। तत्रस्थानां[१०१] च सर्वेषां न्यासयोगमुपादिशन्[१०२] ।।४९।।
हरिक्षेत्रं ततो गत्वा शालग्रामं[१०३] हरिं विभुम् । कृतकृत्या वयं स्यामेत्यकुर्वन्त प्रणामकम्[१०४] ।।५०।।

६६–मयैवं –घ
६७–समनुज्ञातं –ख
६८–सामरोणम् –क
६९–मदनमीष –क, मदनाद्यैया –घ
७०–तेनैव –क,ख
७१–सुराः– घ
७२–मशेकुरु –क
७३–निवेदयेत् –ख, न्यवेदयत् –क,ग
७४–ज्वनृगंजांश्च –क
७५–सरभानपि –क
७६–विभिन्न –घ
७७–गुहान्तरितं –क,ग
७८–शिलाभूतान् –ग
७९–पादापैस्सुदारुणैः– ख
८०–केचित्सरभाः– क, केचिच्छरभाः– ख,ग
८१–वभक्ष –क, भक्षयन् –घ
८२–घटण –क
८३–सुषेनैवापतस्थिरे –क
८४–अजीर्णहार –ख
८५–सरभा –क
८६–खिदिता –क, तुदिता–ख, षेदिता–ग
८७–निरुद्धास्वासाः–क, निरुत्स्वासाः–ख
८८–प्राणान्तं समुपागमन् –घ
८९–प्रासंस तं –क, प्राशंसत –ख, प्रशंस तान् –ग
९०–प्रदक्षिणनमस्कारान् –क,ख,ग
९१–प्रशसंस –क, प्रशंस –ख
९२–एवं प्रभावं तत्प्रभां –क
९३–ममागत्य –क,ख
९४–नमस्कृत्वा –क,ख,ग
९५–दृष्ट्वा –ख,घ
९६–दिव्यतामिति –क
९७–ततोऽप्यथ योगमुत्तमं –क, ततोयोगमदात् –ख
९८–बहुतिथौ–क,ख
९९–संप्रेक्षिताः– ख,ग,घ
१००–प्राप्नुयुः– क,ख,ग
१०१–तत्रस्थितानां –ख
१०२–मुपादिशत् –क
१०३–सालग्रांम –ग
१०४–प्रणेमु तं –ख

अयोध्यां समनुप्राप्य ते पश्यन्तो[१०५] रघूत्तमम्[१०६]। अभिवन्द्य सुसंहृष्टाः स्तोत्रं चक्रुर्मुनीश्वराः ।।५१।।
तत्रस्थानां पुरुषाणां[१०७] प्रददु[१०८]र्योगिनां वराः। दुर्लभं भर्तृभार्याभि[१०९] सम्बन्धज्ञानमुत्तमम् ।।५२।।
वासं चक्रुश्चिरं[११०] कालं सुरम्ये सरयूतटे। दरिद्राय द्विजायाथ[१११] शीलिने [११२] तत्र[११३] वासिने ।।५३।।
कस्मैचिद् याचमानाय[११४] प्रददुर्बहुसम्पदः। ततस्ते मथुरां प्राप्ता बालकृष्णं हरिं प्रभुम् ।।५४।।
संस्तुत्य प्रणिपत्याथ मायापुरमधि[११५]– ष्ठितम् । मधुसूदनदेवं तं पूजां कृत्वा यथाविधि ।।५५।।
ततो वाराणसीं[११६] गत्वा दृष्ट्वा[११७] तु भुजगेशयम् । उपदिश्य न्यासयोगं नृणां तत्र निवासिनाम् ।।५६।।
अवन्त्यामवनीनाथं दृष्ट्वा सम्पूज्य भक्तितः। द्वारावत्यां स्थितं देवं यादवेन्द्रमपूजयन्[११८] ।।५७।।
ततो नन्दव्रजे नत्वा[११९] गोपीजनसखं हरिम् । पश्चाद् वृन्दावने नन्दसूनुमभ्यर्च्य योगिनः ।।५८।।
प्रणेमुर्भक्तमन्दारं गोविन्दं कालिय[१२०]– ह्रदे। गोवर्द्धनाद्रिशिखरे[१२१] गोपवेश[१२२] प्रणम्य[१२३] ते ।।५९।।
भवघ्ने पद्म[१२४]– नेत्रस्य सेवां कृत्वा ततः परम् । गोमन्तपर्वते रम्ये शौरिं [१२५] संस्तुत्य यत्नतः[१२६] ।।६०।।
अभ्यर्चयन् हरिद्वारे जगत्पतिमनन्तरम् । प्रयागे देवदेवेश[१२७]– मानर्चुर्माधवं मुदा ।।६१।।
कञ्चित्कालं[१२८] स्थितास्तत्र गयां प्रतियययुस्ततः। तस्यां गदाधरं स्तुत्वा गङ्गासागरसङ्गमे ।।६२।।
विष्णुं प्रणम्य तत्रस्थान् विष्णुभक्तिपरायणान् । कृत्वा स्थित्वा चिरं कालं चित्रकूटमुपागताः[१२९] ।।६३।।
उपास्य राघवं तत्र नन्दिग्रामे मनोहरे। राक्षसघ्नं नमस्कृत्य प्रभासे सर्वपावने[१३०] ।।६४।।
विष्णु[१३१] –रूपिणमभ्यर्च्य श्रीकूर्मे कूर्मरूपिणम्। देवं [१३२] संसेव्य तदनु नीलाद्रिं जग्मुरुत्तमम् ।।६५।।
दूरतः शिखरं दृष्ट्वा प्रणमन्तो[१३३] गुहुर्मुहुः। तत्क्षेत्रं सम्प्रविश्याथ ददृशुः पुरुषोत्तमम् ।।६६।।
इन्द्रनीलमणि [१३४]श्यामं पीतकौशेयवाससम्। किरीटहारकेयूरकङ्कणाङ्गदशोभितम्[१३५] ।।६७।।
ग्रैवेयकाञ्चीकटककुण्डलाद्यैर्विभूषितम् । पुण्डरीकविशालाक्षं पीनायतभुजद्वयम् ।।६८।।
बिम्बोष्ठं विपुलोरस्कं शरच्चन्द्रो[१३६]–ज्वलन्मुखम्[१३७]। रक्तारविन्दसङ्काश[१३८]–पादपद्मोपशोभितम्[१३९] ।।६९।।
दिव्यगन्धविलिप्ताङ्गं वैजयन्त्या विराजितम्। कौस्तुभेन विराजन्तं[१४०] श्रीवत्सकृतलक्षणम् ।।७०।।

१०५–पश्यन्त –घ
१०६–रघुत्तमम् –ग
१०७–पूरुषाणां –घ
१०८–प्रददौ –क
१०९–भर्तृभार्याभिः– ख,घ, भर्तृभर्यायाः– ग
११०–चक्रे –क,ख,ग
१११–द्विजाताय –क,ख
११२–शिलिने –घ
११३–तत्रिवासिने –घ
११४–कांक्षमाणाय –क,ख
११५–मधिष्ठिताः– क,ख
११६–वारानसीं –क
११७–यत्रास्ते –क,ख
११८–मपूजयत् –ख
११९–गत्वा –क,ख
१२०–कालिका –क
१२१–शिषरे –क
१२२–गोपवेषं –क,ख,घ
१२३–विनम्यते –क,ग,घ
१२४–भक्तनेत्रस्य –क,ग,घ
१२५–सौरिम् –क
१२६–जत्नतः– क
१२७–देदेवेशं आनर्चु –घ
१२८–किंचित्कालं –ख
१२९–मुपागमत् –क,ख
१३०–मर्चयावने –क
१३१–विश्वरुपिण –ग
१३२–देवेशं शेव्य –क, देवेशं सेव्य –ख
१३३–प्रनमन्तौ –क
१३४–मणिः श्यामं –ख
१३५–शोभितां –क
१३६–सरच्चन्द्रो –क
१३७–ज्वलमुखम् –क, ज्वलं मुखं –ख
१३८–संकास –ख
१३९–शोभितां –क
१४०–विराजितं –ख

बलभद्रसुभद्राभ्यां समुपेतं जनार्दनम् । सर्वेश्वरं जगन्नाथं पुराणं[१४१] पुरुषोत्तमम् ।।७१।।
सम्भृताशेषपतित – पावनव्रतमीश्वरम् । दृष्ट्वा प्रणम्य विधिवत् स्तुत्वा वेदान्तगैः स्तवैः ।।७२।।
तत्सेवासक्तमनसः कञ्चित्कालं समावसन् । तत्र पुण्यकृतां पुसां श्रीमदष्टाक्षरं मनुम् ।।७३।।
प्रददुर्योगिवर्य्यास्ते ह्यभीष्टा[१४२] – नभिकाङ्क्षितान् ।।७४।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
पञ्चमोऽध्यायः ।।५।।

———

१४१–पुराण –क, ग

१४२–ह्यभीष्टमपि –ख

षष्ठोऽध्यायः

श्रीनारायण उवाच

ततस्तस्मान्[१] महत्क्षेत्राद्[२] ययुः सिंहाचलं वरम्[३]। तत्रस्थितं महासिंहं पूजयित्वा जनार्दनम् ।।१।।
ततः संस्तुत्य गदिनं[४] तुलसीवनसंस्थितम् । ततः परं पापहरं कृतशौचे स्थितं हरिम् ।।२।।
सेवित्वाथ महापुण्यं तोताद्रिं[५] परमं ययुः। नृसिंह[६] – रूपिणं देवं पिबन्तं तं[७] गुडोदकम् ।।३।।
संनम्य स्तुतिभिः[८] स्तुत्वा[९] हर्षनिर्भरमानसाः। दिनानि कति संस्थित्वा मर्त्यानां तत्रवासिनाम् ।।४।।
स्थिरीकृत्य दृढां भक्तिं श्रीपतौ[१०] श्रितवत्सले। ततः परं पारमात्म्ये क्षेत्रे गोष्ठीवनान्तरे ।।५।।
स्मरणान्[११] मुक्तिदं देवं साक्षा[१२] – न्नारायणं हरिम् । प्रणमन्तः स्तुवन्तस्ते कीर्त्तयन्तो हरेर्गुणान् ।।६।।
महायोगं धारयन्त–[१३] श्चिरकालं समाहिताः। मुक्तिमार्गं दर्शयन्त–[१४] स्तत्रत्यानां नृणां सदा ।।७।।
ततः श्रीकाकुला–[१५] धीशमान्ध्र–[१६] नायकमच्युतम् । प्रणिपत्य स्तवं कृत्वा ततो धर्मपुरीं गताः ।।८।।
योगानन्दं श्रीनृसिंहं तस्यां स्थित्वा प्रणम्य च। अथ विष्णुपथे लक्ष्मीनारायणमजं विभुम् ।।९।।
कृष्णं च नत्वा स्तुतिभिः स्तुत्वा[१७] संपूज्य भक्तितः। पश्चादहोबलं गत्वा हिरण्यासुरमर्दनम् [१८] ।।१०।।
सेवित्वा[१९] पाण्डुरङ्गेशं विट्ठलं परिपूज्यते। अनन्तरं महात्मानो[२०] जग्मुः श्रीवेङ्कटाचलम् ।।११।।
दृष्ट्वा वेङ्कटशैलेन्द्रं सुवर्णमयमुज्ज्वलम् । स्पृशन्तं[२१] शिखरै[२२] – रभ्रं विचित्रैस्सुमनोहरैः ।।१२।।
नानामृगगणाकीर्णं वनराजि[२३] – विराजितम् । अष्टोत्तरसहस्रैस्तु[२४] पुण्य–[२५] तीर्थैर्निषेवितम् ।।१३।।
पञ्चयोजनविस्तीर्णं शतयोजनमायतम् । सर्वपापहरं नृणां भुक्तिमुक्तिप्रदं शुभम् ।।१४।।
सर्वतीर्था–[२६] धिपस्वामिपुष्करिण्या[२७] विराजितम् । शेषः– स्वरूपमौज्ज्वल्यफणाभिर–[२८] भिशोभितम् ।।१५।।
यथा निवासं[२९] वैकुण्ठं तथा भगवतः[३०] प्रियम् । प्रणामं विधिवच्चक्रुः कीर्त्तयन्तः पुनः पुनः ।।१६।।
शेषाचलारोहणार्थं शङ्किता मुनिसत्तमाः। तत्रा[३१] – विश्य भक्तितीर्थे चिरकालं समावसन् ।।१७।।

१–तस्मात् –क
२– क्षेत्रात् –घ
३–मुने –क,ख
४–गदितम् –क
५–स्वेताद्रिं –क,ग, तोदाद्रिं –घ
६–सिंहरूपिणं –क
७–त गुडोदकं –ख, सगुडोदकं–घ,
८–नुतिभिर् –ग,घ,
९–नत्वा –क, नुत्वा –ग,घ
१०–श्रीपत याश्रितवत्सले –क,ख,
११–स्मरः। –क,
१२–साक्षि –क,घ, साक्षि –ग,
१३–धारयन्तः –क,ख,ग,घ
१४– दर्शयत ख, दर्शयन्तः –ग,
१५–काकुडाधीश –ग,घ,
१६–धीशं आन्ध्रन यक –क,ख,घ,
१७–स्तु –क,
१८–पर्दनम् –क,ख,घ,
१९–सेविता –क,
२०–महात्मानं –क,ग,घ, महात्मान –ख,
२१–स्पृशंति –क, स्पृशन्त –ग,
२२–सिषरै –क,
२३–शतयोजनमायतम् –क, वनराजी –ग,घ,
२४–तैः– ख,
२५–पुण्यतीर्थे –ख,
२६–सर्वतीर्थाधिपं –ख
२७–पुष्करिण्या –ख
२८–फणाकारोपशोभितम् – क,ख,
२९–निवास –क, विनासं वैकुण्ठः– ख,
३०–भागवतः प्रियां –क, भगवतं श्रियं –ख,
३१–ते च प्राप्ता – ग,घ,

योगं धृत्वा महात्मानः[३२] समाधौ योगवित्तमाः। श्रियः पतेरनुभवं कुर्वन्तः संस्थिता [३३] मुदा ।।१८।।
श्रीनिवासः स्वयं देवो मुनीनामग्रतस्तदा। कोटिसूर्यप्रतीकाशः कोमलावयवोज्ज्वलः ।।१९।।
इन्द्रनीलनिभः श्यामः[३४] कोटिकन्दर्पसुन्दरः[३५]। स्फुरत्पीताम्बरधरः काञ्चीगुण–[३६] विराजितः ।।२०।।
शङ्खचक्रधरो देवश्[३७] चतुर्हस्तेन[३८] संयुतः। वैकुण्ठमिदमेवेति[३९] सन्दर्शितकराम्बुजः ।।२१।।
हारकेयूरकटककङ्कणाङ्गदशोभितः। किरीटकोटिमणिरुग् [४०] – भ्राजमानदिगन्तरः ।।२२।।
स्फुरद्[४१] दिव्यप्रभापुंजकुण्डलद्वयमण्डितः। दिव्यचन्दनलिप्ताङ्गो वैजयन्त्या विराजितः ।।२३।।
शरच[४२] – चन्द्राभसंस्मेरमुखपङ्कजशोभितः। मकरध्वजचापाभ–[४३] भ्रूयुग्मेन विराजितः ।।२४।।
कृपावलोक–[४४] नैर्लोलपुण्डरीकायतेक्षणः। तिलप्रसूनसौन्दर्यनिरस्त–[४५] शुभनासिकः ।।२५।।
चलत्कुण्डलविद्योत– [४६] गण्डमण्डलशोभितः। बिम्बविद्रुमसङ्काश–[४७] सुन्दरोष्ठयुगाञ्चितः ।।२६।।
कुन्दप्रसूनसदृशदन्तपङ्क्तिविराजितः। कर्णावतंसमुकुटप्रभासंसक्त–[४८] कुन्तलः[४९] ।।२७।।
दिव्योर्ध्वपुण्ड्र– विलसल्ल–[५०] लाटेन सुशोभितः [५१]। मणिग्रैवेयकासक्त–[५२] कम्बुबन्धुरकन्धरः ।।२८।।
श्रीसद्म–विपुलोरस्को[५३] बालार्कनिभकौस्तुभः। विपुलांसो[५४] महाबाहुर्नाभिसंस्थितपङ्कजः ।।२९।।
रम्भाञ्चितोरु–[५५] द्वितयः सुजानुद्वयशोभितः। सर्वाधिकारि–[५६] सुलभः शरण्याङ्घ्रियुगाञ्चितः ।।३०।।
सुपर्णपक्ष–[५७] विक्षेपचलत्स्रक्काञ्चनाम्बरः[५८]। हंसाभचामरमरुच् – [५९] चलच्छत्रा–[६०] ब्जमालिकः [६१] ।।३१।।
अनन्तविष्वक्सेनाद्यैर्नित्यमुक्तैः समावृतः। ब्रह्मरुद्रादिभिर्देवैर्मुनिभिः परिसेवितः[६२] ।।३२।।
सर्वेश्वरो जगन्नाथः प्रादुरासी–[६३] च्छ्रियः[६४] पतिः। तथा मुनीनां हृत्पद्मे दृश्यमानो जनार्दनः ।।३३।।
अदृश्योऽभूत्सद्य एवोन्मीलिताक्षा मुनीश्वराः। तं दृष्ट्वा देवदेवेशं प्रणमन्तो मुहुर्मुहुः ।।३४।।
तुष्टुवुर्विविधैः [६५] स्तोत्रैः प्रबन्धैः श्रुति – गोचरैः। श्रीनिवासः संप्रहृष्टः स्वहस्तेनाभिसंस्पृशन् ।।३५।।
विलोक्य कृपया–[६६] पूर्णावलोकनैः प्राह तान् [६७] मुनीन्। भक्ता योगीश्वरा यूयं मत्प्रिया मम मूर्त्तयः ।।३६।।
भवतां पृष्ठतो यास्ये[६८] वत्सं [६९] गौरिव [७०] धावती [७१]। समस्तजीवलोकानां मुक्त्यर्थं मम काङ्क्षितम् ।।३७।।

३२–महात्मानं – ग, घ
३३–स्थिताः –ख
३४–स्यामः – क,ख,
३५–शोभनः – ख,
३६–गुन – क,
३७–देहः –ग,
३८–कोटिहस्तेन –ग, कटिहस्तेन –घ
३९–मिति मेवेति –ख,
४०–रुक् –घ
४१–स्फरद्दिव्य –ख,
४२–सरच्चन्द्राभ –ख,
४३–चापैक –क, चापाथ –ख, चापवद् –ग,
४४–कृपावलोकनं –ख,ग,
४५–सुभ, –क,
४६–द्योति –घ,
४७–कास –क,
४८–शक्त –ग,
४९–कुण्डलः –क,
५०–विलसन्निकठेन –क,ख,
विलसन्निकखेन –ग,
५१–समन्वितः –क,ख,ग,
५२–शक्त –ग, ५३–विपुलोरस्क –क,
५४–विपुलांशो – क,ख,
५५–रम्भायवोरुद्वितयः – क, रम्भास्तम्भोरुद्वितयः –ख
५६–सर्वाधिकारी –क,
५७–पक्षि –ख
५८–कांचनीवरः –क
५९–वरच्चल– क, श्वेतश्वेतछत्रा –ख,
६०–फुल्लाब्ज –घ
६१–मालिकाः –क
६२–परिसेवितैः –क
६३–राशी –क, प्रादुरसीत् – ग,घ
६४–श्रियः पतिः – ग,घ
६५–बहुधा –क,ख,ग
६६–कृपापूर्णावलोकनैः –क
६७–तम् –क
६८–पश्च –क, गच्छे –ख
६९–वछ –क
७०–गौरीव –क
७१–धावति –क

उपदिश्य न्यासयोगं मत्तत्वं बोधयिष्यथ। अद्य प्रभृति लोकेषु युष्मान् ये वै समाश्रिताः ।।३८।।
तेषां मुक्तिं प्रदास्यामि[७२] कापांश्चापि न संशयः। एवमाज्ञाप्य[७३] देवेशो वेङ्कटाद्रिं विवेश सः ।।३९।।
त्रयोऽपि योगिवर्यास्ते भक्तीर्थे समाश्रिताः। तत्रत्यानां चागतानां न्यासयोगमनुत्तमम् ।।४०।।
सर्वं रहस्यमवदन् मुमुक्षूणां विशेषतः। तदा तु तत्त्वजिज्ञासुः कश्चिद् ब्राह्मणपुङ्गवः ।।४१।।
सम्बन्धज्ञानमाकाङ्क्षन् तेषां पादान् समाश्रितः। ऊचुस्तस्मै योगिवर्या जीवात्म-[७४] परमात्मनोः ।।४२।।
सम्बन्धज्ञानममलं देहदेहि-[७५] स्वरूपकम् । शरीरं तस्य जीवात्मा शरीरी [७६] हरिरुच्यते ।।४३।।
शरीरिणः [७७] शरीरस्य[७८] भजनं मोक्षसाधनम् । एतद्विज्ञाय [७९] तज्ज्ञानं[८०] सदा भागवता-[८१]र्चनम् ।।४४।।
कुरुष्व विधिना विप्र ! मुक्तिं प्राप्स्यसि[८२] शाश्वतीम् । एवमुक्तः स मुनिभिर्महाभागवतार्चनम् ।।४५।।
करिष्ये ऽर्थविहीनो[८३] ऽहं कथमेतदिति ब्रुवन् । द्रव्यसङ्ग्रहणासक्तः पुनस्तत्पादसेवनम् ।।४६।।
अकरोद् द्रव्यसिद्ध्यर्थं भक्तिश्रद्धासमन्वितः। तस्याशयं तदा ज्ञात्वा योगिनस्तत्त्ववेदिनः ।।४७।।
श्रीनिवासस्य कृपया ददुरक्षयपात्रकम् । रक्षार्थं धनपात्रस्य ददुश्चक्रं सुदर्शनम् ।।४८।।
वंशस्य पारपर्यन्तं तथा तद्धर्मसिद्धये। पुत्रं च प्रददुस्तस्मै सम्पदश्च[८४] सुनिश्चलाः ।।४९।।
अभिवन्द्यैवं योगिभ्यः सम्प्राप्य भुवि भूसुरः। श्रीरङ्गादिषु दिव्येषु सर्वक्षेत्रेषु संस्थितः[८५] ।।५०।।
यत्र यत्र हरेरर्चा संस्थित्वा[८६] तत्र तत्र हि। महाभागवतेभ्यः स[८७] दत्वाऽन्नं विधिपूर्वकम् ।।५१।।
तच्छेषं सर्वजीवेभ्यः प्रादात्तद्रक्षणेच्छया। तद्विधं तव वक्ष्येऽहमसाधारण-[८८] वैभवम् ।।५२।।
धर्मस्य कीर्त्तनादेव पुरुषो ज्ञानवान् भवेत् । अन्नं चतुर्विधं नित्यं कारयित्वा स वैष्णवः ।।५३।।
वस्त्राणि गन्धपुष्पाणि सुवर्णाभरणानि च। असङ्ख्यमेतत् सम्पाद्य हरेः कृत्वा समर्पणम् ।।५४।।
तच्छेषं हरिभक्तानामादौ[९०] दत्वा यथाक्रमम् । ब्राह्मणानां क्षत्रियाणां विट्शूद्राणां [९१] तथैव च ।।५५।।
अन्येषां सर्ववर्णानां प्रत्येकं स्थानभेदतः। चतुर्विधान्नं वस्त्रं च गन्धं पुष्पं च भूषणम् ।।५६।।
अर्घ्यपाद्यादिपूर्वेण पूजा[९२] – वन्दनपूर्वकम् । ददौ नित्यं विप्रवर्यः[९३]- सर्वाभीष्टान-[९४] शेषतः ।।५७।।
हरेरर्चाविग्रहेषु सर्वेषु प्रत्यहं द्विजः। नित्योत्सवानि सर्वाणि[९५] तथा पक्षोत्सवानि च ।।५८।।
प्रत्यब्द[९६] – मुत्सवं चैव कारयामास भूसुरः। देवालये विशेषाणि सुविस्तराणि सर्वतः ।।५९।।

७२–प्रदाश्यामि –क
७३–माज्ञापि–क
७४–जीवात्मा –क
७५–देहीदेह –ख, देहदेही –क, ग
७६–शरीरीरि –ख
७७–शरीरिणो– क,ख
७८–शरिरस्य –ग
७९–विज्ञापितं – ग
८०– विज्ञानं –क,ख, तंज्ञानं –ग,घ
८१–भागवतार्चितं –ख,
८२–प्राप्ससि–ख, प्राश्यसि–क,
८३–करिष्ये ऽथाधनोऽहं वा – घ
८४–संपत्यश्चस्वतात्मकम्–क, सम्पत्सारस्वतात्मकम्–घ,
८५–संस्थितं–क,घ, संस्थितां –ग,
८६–सन्ति वा–घ,
८७–सुः– ख,
८८–वक्ष्ये हं असाधारणवैभवम्– क, ख, ग, घ,
८९–मेतान् –क,ख,ग
९०–हरिभक्तानां आदौ–घ,
९१–विट्छूद्राणां– क, ग,
९२–पूजावबन्दन–ख,
९३–विप्रवर्य –क,
९४–सर्वाभीष्टान्नसेषतः–क,
९५–सर्वानि–क,
९६–प्रत्यष्टमुत्सवं –क, प्रत्यतृमुक्षवं–ख

स्वर्णात्मकानि सर्वाणि कृतवान् भक्तिभावनात् । एवं कृत्वा चिरं कालं महाभागवतार्चनम् ।।६०।।
सम्बन्धज्ञानसिद्धो हि मोक्षं प्राप सुदुर्लभम्[९७]। हरिदासानुदासस्य[९८] वैष्णवस्याग्रजन्मनः ।।६१।।
चरित्रं शृणुयाद् यस्तु सोऽन्नदानपरो[९९] भवेत् ।।६२।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
षष्ठोऽध्यायः ।। ६।।

———

९७– सर्वसम्बन्धविनिर्मुक्तो मोक्षं प्राप्य सुदुर्लभम् –क
९८–हरिदासाभिदासास्यं –क, हरिदासाभिदासस्य –ख, हरिदासभिधं तस्य –ग
९९–परा भवेत् –कं

सप्तमोऽध्यायः

श्रीनारायण उवाच

अथ त्रयस्ते योगीशाः प्रणम्य श्रीनिकेतनम्[१]। गिरिं प्रदक्षिणी[२] – कृत्य प्रजग्मुर्यादवा[३]– चलम् ।।१।।
नारायणं नमस्कृत्य पूजयित्वा यथा[४]– विधि। तस्मान्निर्गत्य ददृशुर्घटिकामात्रपूजनात् ।।२।।
सप्तर्षीणां च पुरतः प्रादुर्भूतमघा[५]– पहम्। ततः काञ्चीपुरीं गत्वा तं दृष्ट्वा वारणाचलम् ।।३।।
प्रणम्य प्रीतिहृष्टाङ्गा गिरिमारुरुहु[६] – स्त्वरात्। विमाने पुण्यकोट्याख्ये [७] दिव्यमाणिक्यशोभिते ।।४।।
तस्मिन् सिंहासने दिव्ये तिष्ठन्तं वरदं गुरुम्। देवराजं विराजन्तं ददृशुर्मुनिपुङ्गवाः ।।५।।
तं हस्तिशैलेन्द्र[८] – विभुं जगत्पतिं रमापतिं सर्वजगच्छरीरिणम्।

चराच–[९] राणां हृदयाब्जकर्णिका– मध्यस्थमानन्दमयाङ्घ्रिपङ्कजम् ।।६।।

सौशील्य–[१०] सौलभ्य–सुवत्सलादि– गुणादिमारभ्य–[११] विभूतियुग्मम्।*।

प्रसन्नवक्त्रं सुविशालनेत्रं शुचिस्मितं[१२] बिम्बफलाधरोष्ठम् ।।७।।

आजानुबाहुं शरदिन्दुमण्डल– स्फुन्मुखाम्भोरुहदीर्घनासिकम्[१३]।

सुदीर्घकर्णोज्ज्वलनक्र[१४]– कुण्डल– प्रभा[१५]– सरिद्द्योतितगण्डमण्डलम् ।।८।।

सुभ्रूललाटाञ्चितनीलकुन्तलं ग्रैवेयकभ्राजितकम्बुकन्धरम्।

विशालवक्षः[१६]– स्थलशोभिकौस्तुभम् चराचरापूरितसुन्दरोदरम् ।।९।।

विशुद्ध[१७] – सद्भ्राजितनाभिपङ्कजं काञ्चीगुणावेष्टितपीतवाससम्।

करीन्द्रहस्तप्रतिमोरुयुग्मकं ककुब्[१८]– ज्वलद्दर्पण–जानुयुग्मकम् ।।१०।।

वृत्तानु[१९] पूरोज्ज्वलचारुजङ्घं शरण्यरक्ताम्बुजपादयुग्मम्।

किरीटहाराङ्गदकुण्डलादि[२०]– स्फुरल्लसद्भूषण[२१]– भूषिताङ्गम् ।।११।।

१–निकेतनं–ख,
२–प्रदक्षिणिकृत्य –ख
३–जादवाचलं –क
४–यथाविधिः– क,ख
५–प्रादुभूतं अघापहं –क,ख,घ
६–गिरिमारुह्य सत्वरात् –क,ख
७–पुण्यकोट्याख्या–घ,
८–शैलेन्द्र वरं विभुं–क, शैलेराविभुं–ख,
९–सदाचरन्तं –घ,
चराचराणां श्रितं विभुं–क,
१०–सौशिल्य–क, शौशील्य–ख,
११–पारक्ष्य – ख, ग, घ,*–शौशील्यवात्सल्य गुणौर्विभूषितं–ख,प्रकाशयन्तं विभूतियुग्मम् –ख
१२–सुचि –क,ख,ग, सुचिष्मयं –घ
१३–नाशिकम् –क
१४–नक्रमण्डल –क, दीप्तकुण्डल –ख, वक्त्रमण्डल –घ
१५–प्रभाभिविद्योतित –ख,ग, प्रभास्वरद्योतित –घ
१६–वक्षस्थल –क
१७–सुचिस्मितं –क,ख
१८–कंकु –क, ककुद् –ख, कम्बु –घ
१९–वृत्तानुपूर्व्योज्वल–घ, २०–कुण्डलादिना –ख
२१–भूषन –क

श्रीभूमिनीला [२२]– पतिमादिपूरुषं[२३] श्रीवैजयन्तीवनमाल[२४]– शोभितम् ।
दृष्ट्वा हरिं सान्द्रपयोदनीलं[२५] प्रणेमुरानन्दजलाकुलेक्षणाः[२६] ।।१२।।
पुनः पुनः प्रणम्याथ कृत्वा शिरसि[२७] चाञ्जलिम् । संस्तवैः स्तोत्रयामासुर्वेदवेदान्तगोचरैः ।।१३।।
तत्सेवामभिकाङ्क्षन्तस्ते तत्रैवोपतस्थिरे। ततः काञ्चीपुराधीशो राजराजो महाबलः ।।१४।।
विष्णुवर्द्धन [२८]– नामाऽसौ हरि–भक्तिपरायणः। तेषामन्तिकमागत्य प्रत्यहं मुनिसत्तमान् ।।१५।।
स्तुत्वा सर्वोपचारैस्तान् पूजते[२९] भक्तिपूर्वकम् । तदाऽस्य शत्रवोऽसङ्ख्या[३०] – स्तत्पुरं रुरुधुर्भृशम् ।।१६।।
तान् दृष्ट्वा द्राविडेशस्तु[३१] पुरान्निर्गत्य कुञ्जरैः। रथैरश्वैर्बलैश्चैव युयुधे शत्रुसेनया ।।१७।।
तथा संक्षीय[३२] – माणेषु स्वबलेषु[३३] नरेश्वरः। स्वयमेवाऽकरोद्युद्धं शत्रुभिर्बलवान् नृपः ।।१८।।
चतुरङ्गबलं सर्वम[३४]– सङ्ख्यमवधीद् विभुः। ततो राज[३५]– भिराहूतो युयुधे भीमविक्रमैः ।।१९।।
चिरं संयुद्ध्य तैः सार्द्धं प्रहारैर्मर्मरी[३६]– कृतः। विरोध[३७]– विमुखो भूत्वा स्वपुरीं प्रविवेश सः[३८] ।।२०।।
प्रविश्य योगिवर्याणां कासादिमहात्मनाम् । पादारविन्दशरणं[३९] जगामाऽरिभयान्नृपः [४०] ।।२१।।
तस्मै तेऽप्यभयं दत्वा प्रार्थयां[४१] – चक्रिरे हरिं। रक्षैनं च रणाद् भीतमिति तैः प्रार्थितो हरिः[४२] ।।२२।।
चक्रं संप्रेषयामास तच्छत्रुवधकाङ्क्षया। तच्चक्रं त्वरितं गत्वा विद्राव्य नृपपुङ्गवान् ।।२३।।
तस्मै राज्ञे जयं दत्वा स्वस्थानं पुनरागमत् । पूजयित्वा स तान् राजा मोक्षमार्गं सनातनम् ।।२४।।
ज्ञात्वा तैः समनुज्ञातः[४३] स्वराज्यं पर्यपालयत्[४४]। मुनयस्ते ततः सर्वे तस्यां कमललोचनम् [४५] ।।२५।।
संसेव्य योगिनः स्तुत्वा भगवद्दर्शनोत्सुकाः। यथोक्तकारिणं पश्चात् संपूज्य विधिवत्ततः ।।२६।।
ईशाननगरस्थं तं परमेशं पराश्रयम् [४६]। हरिमभ्यर्च्य विधिवन्नमस्कृत्वा तु भक्तितः[४७] ।।२७।।
ततः परं पाण्डवानां दूतं[४८] प्राप्य विनम्य च। त्रिविक्रममथोपास्य महात्मानं महोन्नतम् ।।२८।।
कामाशिक्यां [४९]स्थितं देवं श्रीनृसिंहं कृपानिधिम् । भजित्वा[५०] ते ततोऽन्यत्र नत्वाऽष्टभुजसंज्ञकम्[५१] ।।२९।।
मेघाकारं ततो नत्वा शुभाकरं तथैव च। शेषाकारं[५२] ततः[५३] प्राप्य स्तुवन्तः स्तोत्रमुत्तमम् ।।३०।।

२२–लीला –ग,घ
२३–रूपं –ख
२४–माल्य –घ
२५–दृष्ट्वा हसाम्बुपयोदधीव नीलां –क,
तं वीक्ष्य नीलाम्बुदकोटिसुन्दरं –ख,ग
२६–प्रणम्यसानन्दजलाकुलेक्षणाम् –क,
प्रणम्य मानन्दजला कुलेक्षणाः– ख
२७–सिरसि –क
२८–विष्णुवर्धन –क,ग
२९–पूज्यते –क,ख,ग
३०–असंख्या –क, संख्या –ख,ग,घ
३१–द्रविडेशः– क,
३२–संक्षिप्यभावेषु –क, संक्षीयभावेषु –ख,
संक्षिप्यमाणेषु –ग,घ
३३–क्षबलेषु –ख
३४–शंख्य –ख, सर्व असंख्य –घ
३५–राजाभिराहूतो –ख
३६–मर्मरीकृतैः– क,ग, प्रहारैरुरुरीकृतैः –ख
३७–विरोधो ऽभिमुखो –क,
विरोधाभिमुखो –ख, विरोधभीमुखो –ग
३८–यः –क
३९–सरणं –क
४०–भयात्पुनः– ग,घ
४१–प्रार्थनांचक्रिरे –क,ख
४२–संप्रार्थितो हरिः– क,ख
४३–समनुज्ञाय –क,ख
४४–पर्यमालयन्
४५–कमललोचनां –क,
४६–ईशाननगरस्थं तं हरिमभ्यर्च्य भक्तितः– ग
४७–ग– मातृकायां पङ्क्तिरियं नोपलभ्यते
४८–मानं –ग,घ
४९–कामाशितस्थितं –क
५०–भजीत्वां –ख
५१–संज्ञिकम् –क,ख,ग
५२–शेसाकारं–क
५३–ततो –क,ग,

प्रवालवर्णमानम्य श्रिया सह विराजितम् । उपासन्त[५४] मुनीन्द्रास्ते दीपाभं तदनन्तरम् ।।३१।।
एवं स्थित्वा चिरं कालं काञ्चीपुर-निवासिनाम् । परतत्त्वं[५५] बोधयन्तो[५६] न्यासयोगमुपादिशन् ।। ३२।।
ततः काञ्च्या[५७] विनिष्क्रम्य[५८] गच्छन्तो मुनिपुङ्गवाः। श्रीगृध्रसरसस्तीरे स्थितं विजयराघवम् ।।३३।।
अभयं[५९] सर्वलोकेशं वीक्ष्यारण्य[६०] ततो ययुः। हृत्ताप१[६१]- नाशनसरस्तटस्थं वीरराघवम् ।।३४।।
आनर्चुस्संस्तवैर्दिव्यैः प्रणम्याङ्घ्रियुगाम्बुजम् । ततस्तोता[६२]- द्रिमारुह्य संश्रिताऽमरभूरुहम् ।।३५।।
आराध्य तुङ्गशयनमथ[६३] गत्वा गजस्थलम् । तत्र दृष्ट्वा[६४] गजार्त्तिघ्नं ततः प्राप्य[६५] बलेः पुरम् ।।३६।।
महाबलं समर्च्यार्थ भक्तिसारपुर[६६]- स्थितम् । जगत्पतिं समाराध्य विनम्री[६७]- कृतमस्तकाः ।।३७।।
तत[६८] ऐन्द्रपुरा[६९]- धीशं देवदेवेशमव्ययम् । उपास्य गोपपुर्या तु गोपतिं परिपूज्य[७०] च[७१] ।।३८।।
श्रीमुष्ण[७२] - मुत्तमं क्षेत्रं प्रविश्याह्लादनिर्भराः। महावराहं संसेव्य दर्शनान्मोक्षदायकम् [७३] ।।३९।।
महताख्ये महापुण्ये भक्तिसम्पूर्णमानसाः। पद्मलोचनमानम्य स्तुत्वा स्तोत्रैरनुत्तमैः ।।४०।।
ततः श्रीरङ्गमासेदुः प्रत्यक्षपरमं पदम् । ज्वलन्तं प्रणवाकारं तं विमानं महोन्नतम् ।।४१।।
आम्नायशिखरं[७४] रङ्गं संज्ञकं[७५] काञ्चनाद्रिवत् । संस्थितं दूरतो दृष्ट्वा प्रणेमुर्भुवि वेत्रवत् [७६] ।।४२।।
प्रविश्य [७७] विनयोपेतास्तद्विमानमनुत्तमम् । श्रीरङ्गनाथं ददृशुः पुरुषं भुजगेशयम् ।।४३।।
इन्दीवरदलश्यामं कोटिसूर्य-समप्रभम् । प्रसन्नसुमुखा[७८]- म्भोजं पुण्डरीकायतेक्षणम् ।।४४।।
किरीटकुण्डलौज्ज्वल्य [७९] - मुक्ताहारविभूषितम् । सुपीनविपुलोरस्कं[८०] कौस्तुभेन विराजितम् ।।४५।।
वक्षः[८१] - स्थलक्ष्म्या भ्राजन्तं सविद्युन्नीलमेघवत् । दिव्य[८२]- काञ्चीगुणधरं[८३]-तप्तचामीकराम्बरम् ।।४६।।
प्रपन्नपारिजाताङ्घ्रिं [८४] ब्रह्मसूत्रेण शोभितम् । हस्तोपधानबिम्बोष्ठं प्रस्तुतान्यकराम्बुजम् [८५] ।।४७।।
उदग्रांसं दीर्घतनुं कोमलावयवोज्ज्वलम् । सृष्टिस्थित्यन्तकर्त्तारमजं[८६]- मव्यक्तमव्ययम् ।।४८।।
प्रणम्य बहुधा भूमौ तुष्टुवुः पुरुषोत्तमम् ।।४९।।

५४-उपासनं -क,ख,ग
५५-परं-क,ग
५६-बोधयित्वा -ख
५७-कांच्याद् -क, कांच्याः- ग
५८-विनिःक्रम्य -ग,घ
५९-अभजन् -घ
६०-विक्ष्वारण्यं -क,
वीक्षारण्यं -ग,घ
६१-तत्तापनासनीशरसस्तटस्थं -क
६२-तोदाद्रिं -घ
६३-अथागत्वा -ग
६४-यष्ट्वा -क
६५-प्राप -ख
६६-पुरः- क,घ
६७-विनश्रीकृतमस्तकाः- घ
६८-ततः- ख
६९-ऐन्द्रपुरींधीशं -क
७०-परिपूज्यतः- क, परिपुज्य -ख
७१-तु -ग,घ
७२-श्रीमुष्ठीमुत्तमं -ख,
श्रीमुष्टमुत्तमं -घ
७३-दायकः- ख
७४-सिखरं -क
७५-संज्ञिकं -क,ख,ग
७६-नेत्रवत् -ख
७७-प्रविश्यापि समोचेतास्तद् -क,
प्रविश्याभि समोचेतास्तद् -ख
७८-सुमुषांभोजं -क
७९-कुण्डलोज्वल्य - ख,ग
८०-विपुलोस्को -क
८१-वक्षस्थ -क,ख,ग,घ
८२-दिव्या -ख
८३-गुन -क
८४-पारिजाताङ्घ्रीं. -ख
८५-प्रसारितकराम्बुजम् -क,ख
८६-कर्त्तारिअजम् -घ

योगिन ऊचुः

नमस्ते नमस्ते महारङ्गशायिन्[८७] नमस्ते नमस्ते नमो विश्वदेव!

नमस्ते नमस्ते नमश्चक्रपाणे नमस्ते नमस्ते गुणाब्धे रमेश! ।।५०।।

नमस्ते नमस्ते चिदाकार[८८] ईश नमस्ते नमस्ते महेशेन्दिरेश[८९]!

नमस्ते नमस्ते भवेश[९०] परेश नमस्ते नमस्ते नमः पद्मपाणे[९१]! ।।५१।।

नमस्ते नमस्ते नमः पद्मनाथ नमस्ते नमस्ते हृदम्भोज[९२]– वासिन्!

नमस्ते नमस्ते नमः पद्म[९३]– नेत्र प्रसीद प्रसीद प्रभो रङ्गनाथ! ।।५२।।

प्रसीद प्रसीद प्रपन्नार्तिहारिन् प्रसीद प्रसीद प्रसन्नाननाब्ज!

प्रसीद प्रसीद प्रभो शोभिताङ्ग प्रसीद प्रसीद शतपत्रनेत्र[९४]! ।।५३।।

एवं स्तुत्वा देवदेवं तत्कृपावृष्टि[९५]– संप्लुतः। तत्रत्यैः पूजिताः सन्तः कञ्चित्कालमवस्थिताः ।।५४।।

तत्रत्यानां च सर्वेषां न्यासयोगमनुत्तमम् । सरहस्यं सतात्पर्यमधिकारानुरूपतः ।।५५।।

आर्त्तप्रपत्ति चार्त्तानां[९६] दृप्तानां दृप्तलक्षणाम्[९७]। ध्यानं च ध्यानकामानां योगं तं योगकाङ्क्षिणाम् ।।५६।।

तथा चोपदिशन्तस्ते रङ्गेशानुभवेच्छवः[९८]। कावेरीतटसंफुल्ल[९९]– वनमध्ये निवासिताः[१००] ।।५७।।

तत्र कश्चित्कुष्ठरोगी क्षत्रियः[१०१] क्षुत्प्रपीडितः। विशीर्यमाण[१०२]– सर्वाङ्गः प्रचार[१०३]– क्षेमवर्जितः ।।५८।।

तेषां प्रभावं संश्रुत्य तथा जनपरम्परैः[१०४]। तानु[१०५]– वाच वचः शीघ्रं तद्भक्त्या पूर्णमानसः ।।५९।।

योगीश्वराणां महतामाश्रमस्यान्तिके शुभे। तत्पादलाञ्छितभुवि स्थापयिष्यथ मां जनाः ।।६०।।

तस्य तद्वचनं श्रुत्वा वस्त्रे निक्षिप्य तं जनाः। योगिनामाश्रमाभ्यास[१०६] निन्युस्तत्पादलाञ्छितम् [१०७] ।।६१।।

सोऽपि तत्पादरजः[१०८] समवेष्टत पुनः पुनः। तेन वेष्टनमात्रेण स योगी[१०९] हेम[११०]– सन्निभः ।।६२।।

तस्थौ दिव्यवपुर्भूत्वा बभौ[११०] कन्दर्पसन्निभः। गत्वान्तिकं ततस्तेषां पपात भुवि पादयोः ।।६३।।

पुनः पुनरथोत्थाय कृत्वा शिरसि[१११] चाञ्जलिम्। तुष्टाव योगिवर्यांस्तान् वाष्पपर्या[११२]– कुलेक्षणः ।।६४।।

उवाच हृष्टमनसा[११३] तत्पादासक्तलोचनः। युष्मत्पादाब्जरजसां[११४] प्रभावो महदद्भुतः[११५] ।।६५।।

८७–महारङ्गशायी –ख
८८–चिदाकाचिदास –क
८९–महेशासुरेश –ख,ग, महेसादुरेश –क
९०–भवेशा –क,ख,ग,घ
९१–पद्मपाणेनमस्ते –क,घ
९२–हृदाम्भोज –ख,ग
९३–पद्मनेत्रे –क
९४–इयं पङ्क्तिः– ख,ग,घ –मातृकासु नोपलभ्यते।
९५–वष्टि –क
९६–आर्त्तानां –ख
९७–दृप्तलक्षणम् –क
९८–रङ्गेशानुभवेचये – क, रङ्गेशानुभवेन च–ख, रङ्गेशानुभवेषवः –ग
९९–संपुल्ल –ख
१००–निवासिनः– घ
१०१–क्षत्रीयः– ग
१०२–विशीर्यमान्सर्वा –गान् –क
१०३–प्रचारक्षेमवर्जितः– क, ह्याचारक्षेमवर्जितः– घ
१०४–जय परम्परैः– क, जनपदं परैः– ख
१०५–तमुवाच –क
१०६–माश्रमाभ्यासे –क,ख
१०७–लांछिते –क,ख
१०८–रजः स तामवेष्टत –क, रजसामवेष्टत –ग, रजसि अचेष्टत –घ
१०९–योगी –क
११०–हय संप्लुतः– क, हेमसंयुतः– ग,घ
११०–वय –क
१११–सिरसि –क
११२–पुयर्याकुलेक्षणः– क
११३–हृष्टमनस्ते –क, हृष्टमनसो –ख, हृष्टो मनसा –घ
११४–रजप्रभावो –क, रजसः प्रभावो –ख
११५–महददभुतम् –क

तादृक् कुत्सितदेहे[११६] मे दिव्यत्वमकरोत् क्षणात् । तस्माद् भागवताङ्घ्र्यब्जरजः सर्वार्थसाधनम् ।।६६।।
सर्वाघनाशन[११७]– करं परमं पावनं महत् । तदेव मुक्तिदं लोके तदन्यन्नास्ति साधनम् ।।६७।।
एवं स्तुवन्तं तं दृष्ट्वा संस्थिताः कृपयार्द्रया। अवलोक्य महात्मानः स्पृशन्तः करपङ्कजैः ।।६८।।
महाराज[११८] पदं तस्मै प्रददुस्ते हरिप्रियाः। ततः स पुरुषश्रेष्ठो योगिदासा[११९]– ह्वयः शुचिः ।।६९।।
तेषां शुश्रूषमाणः सन् [१२०] सदा तत्रैव संस्थितः। ततश्चोलाधिपो राजा चतुरङ्गबलैर्युतः ।।७०।।
भार्यया[१२१] सहितः श्रीमान् पुत्रिकाशत[१२२]– संयुक्तः। श्रीरङ्गेशस्य सेवार्थं तत्क्षेत्रं समुपागमत् ।।७१।।
श्रीरङ्गनाथं संसेव्य रत्नानि विविधानि च। विचित्राणि च वासांसि स्वर्णं च रजतं[१२३] महत् ।।७२।।
प्रयत्नोपार्जितं [१२४] वस्तु समर्प्याऽसङ्ख्यमुत्तमम् । तद्भक्तानामपि स्वर्णदिव्यरत्नाम्बरादिकम् ।।७३।।
ततो योगीश–सेवार्थं तेषामाश्रममागतः[१२५]। तान् [१२६] दृष्ट्वा प्रणिपत्याथ स्पृष्ट्वा निःस्पृहयोगिनः[१२७] ।।७४।।
भार्यया पुत्रिकाभिश्च तेषां पूजामकारयत् । तस्य राज्ञस्तथा पुत्र्यो योगिदासं[१२८] मनोरमम् ।।७५।।
कन्दर्पसन्निभं दृष्ट्वा स्मरनिर्भिन्नचेतसः। तस्मिन्नुद्विग्न[१२९] – मनसस्तत्र चैवोप [१३०] – तस्थिरे ।।७६।।
तासां[१३१] ज्ञात्वा मनो राजा तं दृष्ट्वाऽनङ्गसुन्दरम् । योगिनस्तान् नमस्कृत्य विनतः सन् कृताञ्जलिः ।।७७।।
जनेभ्यो[१३२] योगिदासस्य कुलं गोत्रं सविस्तरम् । ज्ञात्वा तस्मै ददौ प्रीत्या कन्याशतमनुत्तमम् ।।७८।।
योगिदासस्ततस्तासां पाणीन् जग्राह पाणिना। अनपत्यस्तदा राजा स्वराज्यमखिलं महत् ।।७९।।
तस्मै दत्त्वाऽभिषिच्याथ [१३३] चतुरङ्गबलैः सह । तं[१३४] पुरीं प्रेषयामास[१३५] स्वयं तत्रैव संस्थितः ।।८०।।
स राजा जात[१३६] – वैराग्यो मुमुक्षुस्तान् हरिप्रियान् । शुश्रूषमाणः सततं देहान्ते मोक्षमलभत् [१३७] ।।८१।।
योगिदासस्ततः स्त्रीभिः पुरीं प्राप्य बलैः सह। राज्यभोगांश्च बुभुजे चिरकालं मनोहरान् ।।८२।।
कदाचिद् योगिसेवार्थं [१३८] योगिदासो[१३९] हरिप्रियः। श्रीरङ्गं प्राप्य योगीशपादपद्मान्तिकं गतः[१४०] ।।८३।।
योगिनः कुशलं पृष्ट्वा[१४१] योगिदासस्य चिन्तितम् [१४२]। अनपत्योद्भवं ज्ञात्वा तस्य पुत्रशतं महत्[१४३] ।।८४।।
विष्णुभक्तिरतं भक्तपादसेवार्चने रतम् । दत्त्वा संप्रेषयामासुः[१४४] स च स्वां नगरीं ययौ ।।८५।।
ततः[१४५] पुत्रशतं जज्ञे योगिदासस्य[१४६] धीमतः। अचिरेणैव [१४७] कालेन यौवनं प्रतिपेदिरे ।।८६।।
वेदवेदाङ्गविदुषो [१४८] धनुर्वेदविशारदाः[१४९]। विष्णुपूजापरा[१५०] नित्यं तदीयाराधनोत्सुकाः[१५१] ।।८७।।

११६–कुछितदेहं –क,ग, कुच्छितः देहं –ख
११७–सर्वाधनाशाकरं –ख, सर्वापन्नाशनकरं –घ
११८–महाराज्यपदं –क,ख,घ
११९–योगीदासाह्वयः– क,ख,ग
१२०–स–क, १२१–भर्यायाः– ख
१२२–सत –क
१२३–स्ववर्णरजतं –क, सुवर्णरजतं –ख
१२४–प्रजत्नोपार्जितं –क
१२५–माश्रममागमत् –ख
१२६–तां – ग १२७–निपदयोगिनः– क
१२८–योगीदासं –ग,
१२९–विलग्नमनसस्तत्र–ग, घ,
१३०–तत्रैवोपतस्थिरे –क,
१३१–तेषां – ग,
१३२–न तस्य– क, ख, तं तस्य–ग,
१३३–ऽभिषेच्याथ–क,ख,ग,
१३४–तां–ख, ग,
१३५–घोषयामास–क,
१३६–जातवैराज्ञो –क, ज्ञातवैराग्यो –ख
१३७–मालभन् –ख, मालभेत् –ग,
१३८–योगिसेवार्थं–ग, १३९–योगिदास्ये–क,
१४०–ययौ–ख, १४१–दृष्ट्वा–क,ग,
१४२–चिन्ततम् – ख, १४३–ददौ–ख,
१४४–संप्रेषयामास–क,ख,
१४५–तत्र–क,ख,
१४६–योगीदासस्य –क,ग
१४७–अचिरेनैव–क
१४८–विदुषा –क
१४९–विसारदाः –क
१५०–परो –ख
१५१–धनोत्सुकः –ख

राजा पुत्रशतस्याथ प्रीत्या राज्यशतं ददौ। स्वं स्वं[१५२] राज्यमुपागम्य राजपुत्रा[१५३] महाबलाः ।।८८ ।।
धर्मेण पृथिवीं सर्वां पालयन्तो हरिप्रियाः। विष्णो[१५४] – स्तद्भक्तभक्तानां कुर्वन्तो नित्यपूजनम् ।।८९।।
प्रजाभिः कारयन्तश्च[१५५] संस्थिता[१५६] नृपनन्दनाः। योगिदासस्ततो धीमान् मोक्षार्थी निरपेक्षकः ।।९०।।
योगिनां सन्निधिं गत्वा तेषां रङ्गक्षमातले[१५७]। शुश्रूषमाणः सततं कृपालोकनवीक्षितः ।।९१।।
संप्राप्य[१५८] न्यासयोगार्थं तेभ्यस्तत्पादसेवकः। दुर्गमं परमं स्थानं तत्प्रसादाज्जगाम सः ।।९२।।
य एतद्[१५९] योगिदासस्य चरित्रं शृणुयात्सदा। इह लोके सुखं प्राप्य देहान्ते परमश्नुते ।।९३।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
सप्तमोऽध्यायः ।। ७।।

१५२–स्वस्वराज्यमु –ख, स्वयं –क
१५३–राज्यपुत्रः –क
१५४–विष्णु –घ
१५५–ते–घ
१५६–संस्थित्वा –क,ग
१५७–रंगास्वमालये –क, रंगाख्यमालये –ख
१५८–संप्राप्तन्यासयोगार्थः –घ
१५९–एवम् – ख

अष्टमोऽध्यायः

श्रीनारायण उवाच

एवं स्थित्वा चिरं कालं श्रीरङ्गे योगिसत्तमाः। रङ्गपुर्य्या[१] विनिर्गत्य गच्छन्तो [२] मार्गमुत्तमम् ।।१।। श्रीरामक्षेत्रमध्यस्थमानर्चुर्जानकी[३] – प्रियम् । अनन्तरं श्रीनिवासस्थले पूर्णमुपास्य ते ।।२।। ततः सुवर्ण[४] – भवने सुवर्णमभिपूज्य च । अथ व्याघ्रपुरे पुण्ये महाबाहुमपूजयन् ।।३।। पश्चादाकाशनगरे हरिमाराध्य भक्तितः । उत्पलावर्त्तके शौरिमभिवाद्य ततः परम् ।।४।। मणिकोट्यां स्थितं देवमभिवाद्य महाप्रभुम् [५]। ततः कृष्णपुरीं गत्वा महाकृष्णं प्रपद्य च ।।५।। विष्णुस्थानमथ [६] प्राप्य पूजयित्वा तु मुक्तिदम् [७]। ततः श्वेत [८] – ह्रदे पुण्ये शान्तमूर्त्ति[९] समर्चयन् ।।६।। अथाग्निपुर्यामाविश्य समाराध्य सुरप्रियम् । भार्गवं भार्गवस्थाने संसेव्य तदनन्तरम् ।।७।। वैकुण्ठाख्ये माधवस्य निपत्य पदपङ्कजे । पुरुषोत्तमं[१०] प्रपद्याथ[११] कृत्वा भक्तसखार्चनम् ।।८।। सुदर्शनं चक्रतीर्थे प्रपद्य[१२] शरणं ततः। कुम्भकोणे महापुण्ये शाङ्र्गपाणिपदाम्बुजे[१३] ।।९।। कृतमभिवन्दनास्तस्माद् भूमि[१४]– स्थानं समाश्रिताः। शाङ्र्गणो[१५] भजनं कृत्वा कपिस्थलमुपेत्य ते ।।१०।। गजार्त्तिघ्नं प्रणम्याथ चित्रकूटे मनोहरे। दृष्ट्वा ध्यात्वाऽथ गोविन्दमुत्तमायामनुत्तमम् ।।११।। नत्वा ततः परं श्वेतपर्वते पद्मलोचनम् । अर्चयित्वा यथान्याय[१६]– मथ पार्थस्थलं[१७] गताः ।।१२।। तत्रोपास्य परं ब्रह्म कृष्णकोट्यामनन्तरम् । मधुद्विषं भजित्वाऽथ परिपूर्णमनोरथाः ।।१३।। महानन्दमनु[१८]– ध्यात्वा नन्दपुर्यामवस्थितम् [१९]। वृद्धपुर्यां[२०] प्रविश्याथ ह्याश्रयन्त[२१] वृषाश्रयम् ।।१४।। ततस्ते सङ्गमग्रामे[२२] ह्याश्रयन् [२३] सङ्गमाह्वयम् । शरणाख्यपुरीं गत्वा शरण्यं शरणं ययुः ।।१५।। सिंहक्षेत्र [२४]– मुपागम्य महासिंहमुपाश्रयन् । मल्लारि[२५]– मभिवन्द्याथ मणिमण्डपसंस्थितम् ।।१६।। निविड [२६]– क्षेत्रमासाद्य निविडाकारमाश्रिताः। जगदीश्वरमभ्यर्च्य धानुष्के[२७] तदनन्तरम् ।।१७।।

१–रङ्गपुर्याद्विनिर्गत्य–क,ख,
२–छन्तो–ख,
३–जानकीं प्रियां–क,
४–सुवर्णे–ग,
५–मणिकोट्यां पुण्यवत्यां मणिबन्धं महाप्रभुम् – ग,घ
६–मनुप्राप्य–क,ख
७–भक्तिदम् – क,ख
८–श्वेत–क,
९–श.न्ति–ख,
१०–पुरुषोत्तमे–क,ख,
११–प्र त्यार्थ–क, एत्याथ–घ,
१२–प्रप े–क
१३–पाद म्बुजे –ख
१४–भूत –क,ख
१५–शाङ्गिणे –क,ख
१६–न्यायम् अथ –घ
१७–पार्थस्थले –क,ख
१८–मनोध्यात्वा –ग
१९–महाद्रिपं –ग
२०–वृष्णुर्यां –ख
२१–ह्याश्रमेयुः– क, ह्याश्रयेयु –ख, चाश्रयेषु –ग
२२–सङ्गमग्रामेषु –ख
२३–ह्याश्रत् –क, श्रयित्वा –ग, ह्याश्रयिन् –घ
२४–सिंहस्थले त्रयस्ते थ–घ
२५–मध्वारि –ख
२६–वितिड –ख
२७–धनुष्के –क,ग

माहूराख्ये[२८] पुरे रम्ये कालमेघमथार्चयन् [२९]। आसाद्य मधुरापुर्यां[३०] सुन्दरस्य पदाम्बुजम् ।।१८।।
समाश्रित्याथ योगीशाः परमस्वामिसञ्ज्ञकम् । वृषभाद्रौ समभ्यर्च्य ततो[३१] नाथमुपास्य च ।।१९।।
श्रीमद्वरगुरुक्षेत्रे प्रेमार्द्रामलमानसाः । नाथमभ्यर्च्य विधिवदानन्दाश्रुपरिप्लुताः[३२] ।।२०।।
कुरुका[३३] -ख्यमहापुर्यां समाराध्य रमासखम् । गोष्ठे गोष्ठस्थलपतिमभिवाद्य[३४] मुदान्विताः ।।२१।।
दर्भसंस्तरमागत्य[३५] शयानं वन्दनं कृताः। पूजयां[३६]- चक्रिरे शौरिं धन्वि[३७]- मङ्गलकेतने ।।२२।।
बलाढ्यमपि सम्पूज्य तिष्ठन्तं भ्रमरस्थले। कुरङ्गे पूर्णमाराध्य ततो विष्णुं वटस्थले[३८] ।।२३।।
संस्तुत्य संस्तवैर्दिव्यैः प्रणमन्तो मुहुर्मुहुः । क्षुद्रनद्यां समाविष्टं पूजयामासुरच्युतम् ।।२४।।
अनन्तशयने पुण्ये पद्मनाभं जगत्पतिम् । प्रणम्य स्तुतिभिः स्तुत्वा परमानन्दनिर्भराः ।।२५।।
एवमादीनि दिव्यानि क्षेत्राणि गदितानि[३९] वै। विष्णोर्निवासभूतानि मोक्षदानि क्षमातले[४०] ।।२६।।
चरन्तो योगिनो नित्यं संसारध्वान्त[४१]- वर्त्तिनाम् । तत्र[४२] तत्र निवासिनां[४३] दर्शयन्तः कृपालयाः।। २७।।
न्यासयोगप्रदीपेन[४४] मुक्तिं ब्रह्मादिदुर्लभाम् । तिष्ठन्तस्तत्र तत्राथ कञ्चित्कालं यदृच्छया ।।२८।।
ततः कदाचिद् भूयोऽपि वेङ्कटाद्रिमुपागताः[४५]। भक्त[४६] - तीर्थं पुनः प्राप्य ममासीना यथासुखम् ।।२९।।
अशेषक्षेत्रयात्राद्याः कृतास्माभि[४७]- रनुत्तमाः। श्वेतद्वीपादियात्रा तु कृता[४८] नेति विचिन्त्य ते ।।३०।।
महायोगं समास्थाय श्वेतद्वीपमु[४९]- पागताः। तत्र स्थितं परं ब्रह्म दृष्ट्वा तारकसञ्ज्ञकम् [५०] ।।३१।।
प्रणामं दण्डवत्कृत्वा स्तुत्वा स्तोत्रैरनुत्तमैः। ततः क्षीराब्धिमासाद्य पन्नगाधिपशायिनम् ।।३२।।
दिव्यालङ्कारसंयुक्तं श्रिया भूम्या विराजितम् । विलोक्य वन्दनं कृत्वा विनयेन समन्विताः ।।३३।।
कृतपूजाः कृतस्तोत्रास्ततो मार्त्तण्डमण्डलम् । गत्वा हिरण्मयं देवं पद्माक्षं पद्मिनी[५१]- युतम् ।।३४।।
दिव्यतेजोविराजन्तं [५२] दिव्याभरण[५३]- भूषितम् । सुवर्णपपङ्कजासीनं सूर्य[५४]- मण्डलमण्डितम् ।।३५।।
दृष्ट्वा पूजादिकं कृत्वा हर्षसंफुल्ललोचनाः । निगमार्थैः स्तवैः स्तुत्वा नत्वा[५५] तत्पादपङ्कजम् ।।३६।।
सत्यलोकं ततः प्राप्य विष्णुं विश्वेश्वरं प्रभुम् । सश्रियं ब्रह्मरुद्रादिसेवितं दिव्यसुन्दरम् ।।३७।।
सर्वालङ्कृति [५६]- संयुक्तं संवीक्ष्य प्रणतिं गताः। अभिष्टुत्य[५७]स्तवैर्दिव्यै - र्योगिनस्तदनन्तरम् ।।३८।।
सामोदलोकमासाद्य तेऽनिरुद्धमुषापतिम् । नमस्कृत्य स्तुतिं कृत्वा[५८] सम्प्रहृष्टतनूरुहाः ।।३९।।

२८–मोहुराख्य –क, माहुराख्ये –ख, मोहनाख्य –ग,घ
२९–मथार्चनम् –ख
३०–मथुरापुण्यां –क, मधुसंपुण्यां –ग,घ
३१–परम स्वामिसंज्ञिकम् –क
३२– इयं पङ्क्तिः घ मातृकायां न प्राप्यते
३३–कायकाख्यमहापुर्या –ग,घ
३४–मभिवन्द्य –क,ख, पतिं अभिवाद्य –घ
३५–मागम्य –क,ख
३६–पूजां संचक्रिरे –क,ख
३७–धन्वामङ्गलकेतनं –घ
३८–तटीस्थले –ग तटिस्थले –घ
३९–गणितानि –क,क्षेत्राण्यगणितानि –ग,घ
४०–क्षितीतले –क,ख
४१–संसारध्वान्तमस्थितं –क, ध्वान्तमास्थितां –ख, – ध्वान्तवर्धिनां –ग
४२–तत्रनिवासिनां न्यासं –ग
४३–निवासानां –क, निवासीनां –ख
४४–प्रदीप्तेन –ख
४५–मुपागमत् –क,ख
४६–भक्ततीर्थं –क,ख
४७–कृतास्ताभि –क,ग
४८–शृता मेति –क, न गतेति –ख
४९–मुपागमत् –ख, मुपागमन्न –क,ग
५०–संज्ञिकं –क,ख,ग
५१–पद्मीनि –ख
५२–विराजितं –ख,ग
५३–दिव्यालङ्कार –ख
५४–सर्व –ग,घ
५५–ध्यात्वा –ग,घ
५६–सर्वालङ्कारसंयुक्तं –ख
५७–स्तुवन्तस्संस्तवै –क,ख
५८–गत्वा –ग,घ

पश्चात्प्रमोद[५९]– लोके तु प्रद्युम्नमभिवन्द्य च। संस्तुस्य दिव्य[६०] – स्तुतिभिः प्रहृष्टा योगिनां[६१] वराः ।।४०।।
तदन्वा[६२]– मोदलोकस्थं सङ्कर्षणमजं विभुम् । विनम्य स्तोत्रयामासुः परिपूर्णमनोरथाः ।।४१।।
ततो वैकुण्ठ[६३] लोकेशमानन्दनिचयं[६४] महत् । दृष्ट्वा सिंहासने दिव्ये वासुदेवं सनातनम् ।।४२।।
कोटिसूर्यप्रतीकाशं [६५] कोटिकन्दर्पसुन्दरम् [६६]। दिव्यपीताम्बरधरं दिव्यस्रक्चन्दनार्चितम् ।।४३।।
श्रीभूनीला[६७]– समायुक्तं छत्रचामरशोभितम् । अनन्तविहगेन्द्राद्यैर्नित्यमुक्तैश्च सेवितम् ।।४४।।
पुनः पुनर्नमस्कृत्य[६८] हर्षेण परिपूरिताः । वेदान्तसङ्ग्रहैः[६९] स्तोत्रैः स्तुत्वा पूजामनिशं[७०] कृताः ।।४५।।
एतेषां चरितं दिव्यं शृण्वन्ति भुवि ये नराः। आयुरारोग्यमैश्वर्यं प्राप्नुवन्ति परं पदम् [७१] ।।४६।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये–
ऽष्टमोऽध्यायः ।।८।।

———

५९–प्रसामोद –क, प्रमोदलोकेशं –ख, आमोद –घ
६०–स्तुतिभिर्दिव्यैः– क,ख
६१–योगीनां –ख
६२–तद् ज्ञात्वामोद –क, तद्गत्वामोद –ख
६३–श्रीवैकुण्ठलोकमानन्द –ग,घ
६४–तन्तिचयं –क, निलयं –ख
६५–प्रतीकासं –क
६६–सन्निभम् –क,ख,ग
६७–लीला –ग,घ
६८–नमस्कृत्वा –ग
६९–संज्ञिकैः –ग, संज्ञकैः –घ
७०–पूजाविशत्कृताः –क, पूजानि स कृताः –ख, पूजादि सत्कृताः –ग, पूजाभिस्तत्कृताः –घ
७१–परमाप्नुयुः –ग, प्राप्यते परमं पदम् –क,ख,ग

नवमोऽध्यायः

श्रीनारायण उवाच[1]

ततः काञ्चीमहापुर्याः[2] प्राग् भागेऽतिमनोहरे। पूर्वार्द्धे[3] पश्चिमे भागे नानावृक्षोपशोभिते ।।१।।
महीसारेति नगरी ख्याता देवपुरोपमा । पुरा स्वयम्भूर्भगवान् विश्वसृक्[4] चतुराननः ।।२।।
तत्क्षेत्रमेकतो[5] न्यस्य सर्वक्षेत्राणि चैकतः । सारं विज्ञाय तत्क्षेत्रे[6] महीसाराऽभवदियम् ।।३।।
इति नामा[7]ऽकरोद् ब्रह्मा तदा प्रभृति भूतले । तन्नाम[8] – धेयविख्याता पुण्या कैवल्यदायिनी ।।४।।
तस्यां वसति देवेशः पावनाय[9] रमाधिपः । भार्गवाद्यैर्महर्षिभि[10] – र्देवैर्ब्रह्मपुरोगमैः ।।५।।
सेवितः सततं भक्त्या मोक्षमार्गानुकाङ्क्षिभिः । तत्समीपाश्रमे पुण्ये[11] सर्वमौनीन्द्रसेविते[12] ।।६।।
रम्ये मुक्तिप्रदे दिव्ये सर्वभूरुहशोभिते[13]। कश्चिद् भार्गवमौनीन्द्रो ब्रह्मविद्याविशारदः ।।७।।
तपश्चकार सुमहद् ग्रीष्मे पञ्चाग्निमध्यगः[14]। हिमागमे जलस्थायी वर्षर्तौ बहिरास्थितः ।।८।।
जपन्नष्टाक्षरं कुर्वन् भक्त्या श्रीहरिपूजनम् । एवं तपस्तप्यमाने दुःसहं घोरमद्भुतम् ।।९।।
तेन संतप्यमानः सन् दुःसहेन तपोऽग्निना । वासवस्तस्य[15] तपसो विघ्नं कर्तुं शचीपतिः[16] ।।१०।।
आहूयाऽप्सरसां[17]श्रेष्ठां कनकाङ्गीं शुभाननाम् । प्रशंस्योवाच पद्माक्षीं भार्गवो ब्रह्म–वित्तमः ।।११।।
तपः करोति सुमहत् तद्विघ्नं कुरु सुन्दरि[18] ! एवं सा प्रेषिता तेन शक्रेण[19] सुमहात्मना ।।१२।।
भार्गवाश्रममागत्य स्मरेण सह कामिनी। तं दृष्ट्वा भार्गवमुनिं कृत्वा रूपमनुत्तमम् ।।१३।।
मुनिवर्यस्य पुरतो वीणाक्वणितनिस्वना[20]। गान्धर्व[21] गायमाना सा चकार बहुचेष्टितम् ।।१४।।
तां दृष्ट्वा मुनिरुद्विग्नः[22] श्रुत्वा गान्धर्वमुत्तमम् । स्मरबाणेन[23] निर्भिन्नस्तस्यामासक्त[24]–मानसः ।।१५।।
तया रेमे मुनिवरस्ततः सोऽभूत्सुदुःखितः। पश्चात्तापेन दीनात्मा तपोऽपहरणान्मुनिः ।।१६।।
गतं न शोच्य[25] – मित्युक्त्वा निष्कृतौ कृतनिश्चयः। भगवत्पादकमल[26]–शरणागतमानसः ।।१७।।
आत्मन्येव विनीतात्मा सर्वभूतदयापरः। तस्माद् वनाद् विनिर्गत्य तीर्थयात्रापरोऽभवत् ।।१८।।
तथैव कनकाङ्गी च सङ्कल्पा[27]–च्छाङ्गधन्वनः। सद्यो गर्भेण[28] तनयं चक्रांशं योगिपुङ्गवम् ।।१९।।

१– श्रीसूत उवाच– क, ख, ग,
२– पुर्याति –क, पुर्य्या–ख,
३– पूर्वान्धे –क, ख, पूर्वाध्वे–ग,
४–विश्वसृट् –ग,
५–मेतो–ख,
६– तत्क्षेत्रं –क, ख,
७– नाम–क, ख,
८– ध्येय–क, ग,
९–पावना परमाधिपः– क, ख,
१०–महर्षिभि–ख,
११–पुरोप–ख,
१२– सेवितः– ग,
१३– सोभिते–क, सेविते–ग, घ,
१४–पध्यमे–क, ख, ग,
१५– तप्त –क,
१६– सचीपतिः–क,
१७– प्सरसं–ख,
१८–सुन्दरी–क, ख,
१९– सक्रेन–क,
२०–निश्वणा–क,
२१–गन्धर्व–क,
२२–मुनिराविग्नः–ख,
२३–स्मरबानेन–क,
२४–माशक्त–ग,
२५–शौच्यमि–ख,
२६–कमलं –ख,
२७–सङ्कल्पात् शाङ्.र्ग–क, ख,
२८–गर्भेन–क

श्रीपतिध्यानपीयूष[२९]–पान–[३०]–संसक्तमानसम् । कलिद्वापरयोः सन्धौ काले परमशोभने ।।२०।।
पौषमासे मघर्क्षे[३१] साऽजनयत्पुत्रमुत्तमम् । लतागृहेऽथ कस्मिंश्चिद् विन्यस्य[३२] सुतमप्सराः ।।२१।।
कार्यसिद्धिमुपागम्य देवलोकमुपागमत् । ततस्तस्मिंल्लतागेहे स रुरोदाऽर्भकोत्तमः ।।२२।।
सामवेदस्वरेणाथ महीसार[३३]–पुरेश्वरः। श्रीभूमिसहितः क्षिप्रं वासुदेवोऽखिलेश्वरः[३४] ।।२३।।
तं निकुंजं समासाद्य सन्तुष्टः प्रियया सह। कटाक्षवीक्षणसुधाधाराभिरनघं शिशुम् ।।२४।।
संतर्प्यान्त[३५] –र्हितो देवः सोऽपि संतृप्तवानभूत्[३६]। ततस्तु हरिदासाख्यो वेणुलाविक[३७] उत्तमः ।।२५।।
अनपत्यो विष्णुभक्तस्तद्वनं प्रविवेश[३८]सः। वेणुसङ्ग्रहणं कुर्वंस्तत्र कुञ्जगृहानतरे ।।२६।।
वेणुको वनशयानं कुमारं कनकप्रभम् * । विद्योतमानं प्रभया दिव्यलक्षण[३९]–लक्षितम् ।।२७।।
दृष्ट्वा सुविस्मितो भूत्वा प्रदध्यौ[४०] सुचिरं[४१] नरः। त्यक्त्वा च तद्वेत्रवनं दिव्यमङ्गलविग्रहम्[४२] ।।२८।।
माता काऽस्य पिता को वा कथमत्र स्थितः शिशुः। केन जीवत्ययं बालश्चिन्तयन्निति तद्वने ।।२९।।
चिन्तयंश्चापि [४३]पित्रादिं न दृष्ट्वा[४४] सन् प्रहर्षितः। अनपत्यस्य मे दैवम[४५]–पत्यं ददौ। ।।३०।।
इति निश्चित्य मनसा गृहीत्वा[४६] शिशुमुत्तमम् । वक्षस्याधाय[४७] मूर्धानमाघ्रायाह्लादमानसः ।।३१।।
वेत्रकुञ्जाद् विनिष्क्रम्य हर्षाश्रुव्याकुलेक्षणः। गृहमागत्य भार्यायै प्रददौ वेणुलाविकः[४८] ।।३२।।
सा सद्यो[४९] देवं संदृष्ट्वा पूर्णचन्द्रमिवोदितम् । पुत्रं गृहीत्वा वक्षोजमध्ये[५०]निक्षिप्य हर्षिता ।।३३।।
सुगन्धैरमलैरद्भिरभिषेकं मुदाकरोत् । सोऽप्यग्रे संस्थितं[५१] देवं श्रीधरं जगतां पतिम् ।।३४।।
दृष्ट्वा तत्पादकमलध्यानामृतनिषेवणात् । स संनिरस्त[५२]–क्षुत्तृष्णो दीप्य –[५३]मानस्तथा[५४]श्रिया [५५]।। ३५।।
नाऽपिबत् स्तनजं क्षीर[५६]–महन्यहनि वर्द्धितः[५७]। एवं[५८]गतेषु बहुषु दिनेषु निखिला जनाः ।।३६।।
तं दृष्ट्वा हृष्टपुष्टाङ्गं वर्द्धमानं[५९] दिने दिने। विस्मयं परमं गत्वा तं[६०] देवमिव[६१] मेनिरे ।।३७।।
ततः कश्चिद् द्विजो[६२] वृद्धस्तत्रस्थः प्रियया सह। सुतार्थं[६३] तप्यमानस्सन् बालार्क[६४]–सदृशं शिशुम् ।।३८।।

२९–पीयूषः– क,
३०–पीन–ग,
३१–मघेर्क्षे–क, मघार्क्षे–ख,
३२–विनिश्या–क, विनश्य–ख, निरीक्ष्य–ग
३३– महिसार–ग,
३४–वासुदेवोस्तिलेश्वरः–ख,
३५–स तर्प्या–ख,
३६–भवेत् –ख,
३७–वेणुगावीक–क,
३८–प्रविवेस–क,
*–वेणुको वनशयानं गत्वा चार्भकं यं हि मुदा–क,
बालकंत्वैनमारण्यं गतो वेक्ष्यार्भकं मुदा–घ
३९–लछन–क,
४०–प्रययौ–क, ख, ग,
४१–स्वचिरं –क, सुचरं–ख,
४२–विग्रहः–क, ख,
४३–चिन्तयतस्यापि–क,
४४–दृष्टः –क,ख,ग
४५–दैवम् –क, दैव –ख
४६–ग्रहीत्वा –ख
४७–वक्षस्यास्थान –क,ख, वक्षसि स्थाप्य–घ,
४८–लावकः –ग,
४९–सायं सस्वाप –क, सायंतं–ख,
५०–वक्षोन्तरं –ग
५१–स्थितं–ख
५२–स निरस्तक्षुत्तृष्णादि –क,ख,
सम्यगस्तक्षुत्तृषोऽसौ –घ,
५३–दीप्यमानं–क, ख, दीपमानं–ग, घ,
५४–तया –क,ख,
५५–श्रियात् –क, प्रियात् –ग, घ,
५६– क्षीरं अहन्यहनि–क, ख, ग, घ,
५७–वर्धितः– घ,
५८–ततो –क,ख,
५९–वर्द्धमानं–ख, वर्धमानं –ग,
६०–तद् –क,
६१–दैवमिव –क,ग,
६२–द्विजवरो वृद्धस्तत्रस्थः– ख,
६३–सुतीर्थ–क, ग,
६४–नीलार्क –ग,

वटपत्रशयानं[६५]तं जनार्दनमिव द्विजः। प्रभावं तस्य संश्रुत्य[६६]कदाचिद् ब्राह्मणोत्तमः ।।३९।।
तं देवं मन्यमानः सन् गृहीत्वाऽऽज्यं गवां पयः। वेणुलाविकगेहं तं प्रियया भार्यया[६७] सह ।।४०।।
तद्गृहे रम्यदोलायां[६८] बालार्कसदृशं शिशुम् । वटपत्र[६९]-शयानं तं जनार्दनमिव द्विजः ।।४१।।
दृष्ट्वा स्तुवन्त[७०] योगीन्द्रं योगनिद्रापरायणम् । प्रणम्य पादयोस्तस्य निधायाऽऽज्यं पयः पुरः ।।४२।।
इदं गृहाण योगीन्द्र भक्तवाञ्छा[७१]-फलप्रद। कुचैलदत्तपृथुक[७२]-प्रसृतिं श्रीधरो यथा ।।४३।।
एवमुक्त्वे[७३] द्विजवरे[७४] योगीशः[७५] करुणा[७६]-निधिः। सम्यक् पद्मासनासीनः पपा [७७]-वाज्यं पयः प्रियम् ।।४४।।
एवं प्रतिदिनं ताभ्यामर्चितः[७८] प्रीतिपूर्वकम् । पिबन् कदाचिद् योगीशो भुक्तशेषं तयोर्ददौ ।।४५।।
तद्गृहीत्वाशु[७९]तद् [८०] भक्त्या भुक्तशेषं महात्मनः। सम्प्राप्य[८१] दम्पती सद्यो नवयौवनमायतुः[८२] ।।४६।।
ततो वरप्रभावेण चक्रस्य परिचारकः। पुत्रोऽभवत्तयोः प्रीत्या खनिकृष्ण[८३] इति श्रुतः[८४] ।।४७।।
शमा[८५] -दिगुणसंयुक्तो वासुदेवाङ्घ्रिनम्रकः। तदीयपूजानिरतो बभौ विद्याविशारदः ।।४८।।
ततो भार्गव[८६] – योगीन्द्रः सप्तवर्षाणि तद्गृहे। स्थित्वा तस्माद् विनिर्गत्य योग[८७] संशीलयन्मुनिः ।।४९।।
महदाह्वयमाश्रित्य न्यासयोगार्थमुत्तमम् । तस्मादिवज्ञाय योगार्थं विवेशाऽद्रिगुहान्तरम् ।।५०।।
तत्र पद्मासनासीनो यमाद्यष्टाङ्गसंयुतः। कपोलनेति[८८]-वत्स्यादिषट्कर्मपरिशीलितः [८९] ।।५१।।
जालन्धरादि [९०]-मुद्रास्ता दश कृत्वा यथा-विधि। ईषदाद्यन्त[९१]-सुमतिश्चतुर्दश विलोकयन् ।।५२।।
शीतला[९२]भ्रामरी चैव भस्त्रिका मूर्च्छा[९३]-केवले। आतता चरती चैव[९४] प्रभेदेत्यष्टधा[९५] स्मृताः ।।५३।।
एताः कुम्भकभेदाः स्युस्ताः[९६] कृत्वा[९७] स यथाक्रमम्[९८]। केवलं कुम्भकं कृत्वा तेन संरुद्ध्य वायुना ।।५४।।
आसन[१] लिङ्ग[९९]- संस्थान[२] हन्ना[१००]-भ्योस्तालुमूलके। ललाटमध्ये[१]-संस्था[२]-नान्याधाराद्याख्यवन्ति च ।।५५।।
चतुष्षड्द्वादशदलें[३] षोडशद्विदलानि च। षट्-पद्मान्युद्बोध[४]-यित्वा योगिराट् सुसमाहितः ।।५६।।

६५-सयानं-क,
६६-सुश्रुत्वा-क, ख, ग, घ
६७-भार्जया-क,
६८-डोलायां-ग,
६९-पट-ख,
७०-स्तुवनतं-क, स्तुवन्-ख,
७१-वांक्षाफलप्रदा-क
७२-पृथक्प्रसृती-क, पृथक्प्रसृतिं -ख,
७३-एवमुक्त्वा-ग, घ,
७४-द्विजवरो-ग, घ,
७५-योगीशं-क, ग, घ,
७६-करुणानिधिं-क, घ,
७७-पपौवाज्यं-क,
७८-र्पितं-क, ख,
७९-गृहीत्वाशु-क, ख,
८०-सद्भक्त्या-ग,
८१-संप्राप्त-ख,
८२-मयतुः क,
८३-विनिकृष्ट-ग,
८४-श्रुतिः- ख,
८५-समादि-क ख, ग,
८६-भार्य्याव योगीन्द्रं-क,
८७-योगीशंशीलयन्-ग, घ,
८८-भाति-ग, घ,
८९-परिशीलिना-ख, ग,
९०-जंघरादि-क,जंधारादि च -ख,
९१-इषदाद्यं पदमति-क, ईषदाद्यं पदमति-ख,
ईषदाद्यन्तसमनी-ग,
९२-सीतला-क,
९३-रामूछि-ख,
९४-चेति-क, ख,
९५-भेदेत्यष्टाभिद्या-क, ख,
९६-तान्-ख,
९७-कृता-क,
९८-यथाविधि-ख,
९९-लिंससंस्थाने-ख,
१००-हन्नाभ्यास्थलमूलके-क, ख,
हन्नाभ्यास्तालुमूलके-ग,
१-ललाटमध्यमे-क, ख, ग,
२-संस्थान्या-क, ग,
३-दल-घ,
४-युद्धयित्वा-क,

ततो नाभ्यर[५]–विन्दस्य ह्यधोभागेऽधि [६]कुण्डले। निवासे[७]नासिका [८]नन्दे कोणत्रितयसंयुते ।।५७।।
पूरयित्वा ऽथ तेनैव वायुनाऽधःस्थितस्थले। आधार[९]–पद्मे तन्मध्य[१०]–त्रिकोणान्तरमध्यमे ।।५८।।
केफा[११]–रान्तनियम [१२]मग्निं प्रज्वाल्य पावनम् [१३]। वायुना मेलनं[१४]कृत्वा तस्याऽधोभागसंस्थितम् (*) ।।५९।।
सुषुम्णानाड्या[१५] संवेष्ट्य तत्र कुण्डल्यवाक् [१६]–शिराः। स्वकीयैरष्टवर्गैश्च गाढमाच्छाद्य तन्मुखम् ।।६०।।
स्थितस्तस्यानल [१७] –गुहां लङ्घयित्वा च लाघवात् । सुवेष्टयित्वा[१८]नैपुण्यात्सुषुम्णा[१९]–धमनीं पुरीम् ।।६१।।
ग्रन्थित्रयमनिभेद्यं [२०]ब्रह्म[२१]–विष्णुशिवाह्वयम् । एकविंशन्महारत्नमिलितं वज्रवद् [२२]ध्रुवम् ।।६२।।
विनिर्भिद्य ततस्तस्योपरि संस्थित[२३]–मुत्तमम् । दिव्यमूर्द्धमुखा[२४]–म्भोजं कृत्वाऽधोमुखमीप्सितम् ।।६३।।
तदम्भोरुहमध्यस्थं सुधारसमनुत्तमम् ** । स्रावयित्वा[२५] स्वहृत्पद्मे पूरयित्वा यथा मुनिः ।।६४।।
योगसाम्राज्यसौभाग्यभूषणोत्तम–भूषितः। हृत्पद्मस्थहरिध्यानसङ्गात् [२६]परवशं गतः ।।६५।।
तत् पादपद्म[२७]–संलग्न[२८]–चिदा [२९]–नन्दामृतं पिबन् । बाह्यप्रपञ्चं [३०] विस्मृत्य ब्रह्मानन्दपरायणः ।।६६।।
एवं सप्तकुलग्राव[३१]–गुहासु च पृथक् [३२]पृथक् । शतं शतं तु वर्षाणि स योगी योगमाश्रितः[३३] ।।६७।।
स्थित्वा क्षेत्राणि गोविन्दनिलयान्य[३४]–निशं चरन् । विलोक्य सर्वसिद्धान्तान् शास्त्राणि विविधानि च ।।६८।।
आलोड्य दुर्मतान्[३५] छित्वा शुद्धान्तःकरणो मुनिः। विष्णुसिद्धान्तसाम्राज्यं परिपालितवान[३६]–भू त् ।।६९।।
एवं स्थिते मुनिवरे कदाचित् भगवान् हरिः। तस्य भक्त्या सुसंहृष्टो विश्वरूपमदर्शयत् [३७] ।।७०।।
दृष्ट्वा तद्रूपमैश्वर्यमानन्दपरिपूरितः। स्तोत्रयामास योगीन्द्रः स्तवैर्वेदान्तगोचरैः ।।७१।।
एवं भक्तिरसावेशात्सदा[३८]तद्भावनात् । भक्तिसार इति ख्यातो[३९] बभूव धरणीतले ।।७२।।
तदा कदाचित्कस्मिंश्चिद् वनमध्ये महामुनौ[४०]। हरि[४१]–पादाब्जपीयूषपानसन्तुष्टमानसे ।।७३।।
स्थिते तस्मिन् महाकाश[४२]–शतचण्डीश्वरो हरः। वृषभेश्वरमारुह्य[४३] पार्वत्या प्रियया सह ।।७४।।

५–नाभ्यां–क,
६–भागेऽधिकुण्डले–ख, भागेऽधिकुण्डलैः–ग,
७–निविश्य–क, ख,
८–नाशिकानादे–क, ख,
९–आधाय–क, ख,
१०–तन्मध्ये–क, ख,
११–कफाक्षरान्त–घ,
१२–निलयम–क,
१३–पावनः– क, ग,
१४–मेनलं –क,
(*)–श्लोकोऽयं –ख, मातृकायां नोपलभ्यते।
१५–सुषुम्नानाडि–क,ख, सुषुम्णानाडि–ग,
१६–वाक्छिराः– क, ग, घ,
१७–तस्यानन–ग, घ,
१८–सुवेष्ट्या–क,
१९–सुषुम्न–क, सुषुम्ना–ख, ग,
२०–मनिर्भेद्य–ग,
२१–ब्रह्मा–ग,
२२–वब्रमद्भुतम् –ख,
२३–संस्थान–ख,
२४–मुषाम्भोजं–क,

*–मातृकायां षड्क्तिरियं न प्राप्यते।
**–ख– मातृकायां षड्क्तिरियं नोपलभ्यते।
२५–श्रावयित्वा–क, ख,
२६–मंगपुर–क, संगमात् –ख, मनाः– घ,
२७–पद्मे–ग,
२८–संलग्ने चेते–क, संलग्न चित्त–ख, संलग्न चित्तो–ग
२९–रसामृतं–क, ख, ग,
३०–प्रत्यय–क, ख,
३१–कुलायासु स –घ,
३२–प्रथक्–प्रथक् –क
३३–योगसमास्थितः– ख,
३४–न्यनिसं –क, ग, न्यभिसंचरन् –घ,
३५– दुर्मतीन् –घ,
३६– परिपालनवानभूत् –ग, घ,
३७–मदर्शयन् –क,
३८–तदा–क,
३९–ख्यात –क, ख,
४०–महामुनिः –क,
४१–हरेः –क, ख, ग,
४२–महाकाशशत –क, ग,
४३–मपूह्य–ख,

अपश्यद् दीप्यमानं तं तदोमोवाच शूलिनम् [४४]। अस्मिन् वने योगधरो मीलिताक्षः[४५] सुनिर्भयः ।।७५।।
एकाकी तरुणा[४६]-र्काभस्त्यक्त्वा बाह्यभयं मुनिः। तिष्ठत्यस्य प्रभावं च चरित्रं चाधुना प्रिय[४७] ।।७६।।
ज्ञात्वा ततः प्रयास्यामः कुरुष्वेतन्मम प्रियम् । इत्युक्तस्त्र्यां[४८] पार्वत्यां सन्तुष्टः स महेश्वरः ।।७७।।
वनं प्रविश्य योगीन्द्रप्रभावं ज्ञातुम[४९] – ब्रवीत्। शिवोऽहं त्वं[५०] महाभाग वृणीष्व वरमुत्तमम् ।।७८।।
शिवं मद् [५१]-दर्शनं लोके[५२] न वृथा स्यान्मुनीश्वर ! तद्वाक्यं मुनिराकर्ण्य विलोक्यो[५३]न्मील्य चक्षुषी ।।७९।।
पुरः[५४] स्थितं महादेवमिदमाह वचोऽर्थवित् । निःसङ्गोऽहं सुरश्रेष्ठ ! निरपेक्षो मम त्वया !।।८०।।
वक्तव्य[५५] नास्ति यत्किंचित्[५६]स्वस्थानं गम्यतां हर!तच्छ्रुत्वाह[५७] शिवो वाक्यं पुनस्तं[५८]निरपेक्षकम् ।।८१।।
निःस्पृहा योगिनो ह्येवं न कुर्युर्देवहेलनम् [५९]। यदृच्छया[६०] गतं ग्राह्यं तद् याचस्व मुनीश्वर !। ८२।।
इत्युक्तः[६१]शम्भुना[६२]तेन सञ्चिन्त्य स्वप्रयोजनम् । कन्थोपरिस्थितां सूचिं[६३]गृहीत्वाऽस्या[६४]विले स्वयं ।।८३।।
तिष्ठत्वेतत्सूत्रमेवेत्येवं वरमयाचत। तदाकर्ण्य विरूपाक्षः क्रोधसंरक्तलोचनः ।।८४।।
काला[६५]-ग्निरिव जज्वाल जगाद च महद्वचः।

किं त्वया[६६]परिहास्यो [६७]ऽहं माहात्म्यं[६८] मेमहदद्भुतम् [६९] ।।८५।।
न विजानासि किं मौने ! प्रभावं पश्य मेऽधुना। समर्थो यदि[७०]रक्षस्व त्वमात्मानमितीर[७१]-यन् ।।८६।।
तृतीयचक्षुषा पश्य[७२]त्कोट्यग्नि[७३]-समतेजसा। तन्नेत्रज्वलनज्वालापरिपूर्णमभूज्जगत् ।।८७।।
भक्तिसारस्तु योगीन्द्रो निश्चलो निर्भयात्मकः। भयङ्करोद्यत्कीलालं[७४]स्वपादं सम्प्रासारयत् [७५] ।।८८।।
तत्पादाब्जे[७६]महाचक्षुर्गणं जज्ञे महात्मनः। अनेककोटिसूर्याग्नितुल्यवर्चसमद्भुतम् ।।८९।।
तत्पादलोचनोद्भूतवह्नि [७७]-कीलाः सहस्रशः। अजाण्ड[७८] सर्वतो व्याप्ताः सर्वे देवाश्चकम्पिरे ।।९०।।
शिवनेत्रोद्भवो [७९]वह्निस्तेन [८०]शान्तिमगच्छत् [८१] शर्वोऽपि [८२]विस्मयं गत्वा शर्वाणी[८३]मब्रवीद् वच : ।।९१।।

४४-शूलिने वाचमामिनी-क,
४५-मीलिताक्षो -क,
४६-तरुणार्काभ-ख, तरुणार्काभः- घ,
४७-प्रियः -ख, प्रयं -घ
४८-इत्युक्तस्त्यां तु -क,ख,ग
४९-ज्ञातुर-क,
५०-तं-क, त्वां-घ,
५१-संदर्शनं-घ,
५२-पुण्यं-ग
५३-विलोन्मील्य-ख,
५४-पुरस्थितं ख, ग, पुरतस्थितं-क,
५५-दातव्यं-घ,
५६-यत्किंचत् -ख,
५७-तत् श्रुत्वा-घ,
५८-त्वं-क,
५९-लेहनं-क,
६०-वदछायागतं-क,
६१-इत्युक्तं-क,
६२-सम्भुना-क, ख,
६३-शूचिं-क,
६४-गृहीत्वा स्य-क, ख, ग, घ,
६५-कलाग्निरिव-ख,
६६-मया-ग,
६७-परिहासो ऽयं-क, ग, घ,
६८-महात्म्यं-ग,
६९-महाद्भुतम् -क, ख, ग, घ,
७०-परिरक्षस्व-ख,
७१-मितीरयत् -घ,
७२-पश्य-क, पस्यत् -ख,
७३-कोपाग्नि-ग, घ,
७४-कीलानां-क, ख, ग,
७५-संप्रसारयन् -क, ग, संप्रसारयत् -ख, घ,
७६-तत्पादाब्ज-ख,
७७-वह्नीकीला-ख,
७८-अजांदु-ख,
७९-भुवो-ख,
८०-वह्नीः-ख,
८१-मगच्छतु-क,
८२-सर्वो-क, शिवो-ख,
८३-सर्वाणी-क, ख, ग,

पश्य त्वं देवि माहात्म्यं[८४]वैष्णवानां महात्मनाम् । अस्य प्रभावो ह्यतुलो मत्प्रभावा[८५]ऽधिको महान् ।।९२।।
हरिदासा महात्मानो गताहङ्कारमत्सरा। विशुद्धसात्त्विकगुणाः पूजनीयाः प्रयत्नतः[८६] ।।९३।।
प्रशान्त[८७]विमलात्मानः सर्वलोकैकपावनाः। तेषां न सन्ति[८८] सदृशः सकृत्वा यदि भूतले (?) ।।९४।।
देवैरप्यनिवा[८९]र्यास्ते सर्वलोकोत्तमोत्तमाः। एवमुक्त्वा[९०] प्रियामीशो भक्तिसारं प्रशंस्य[९१]च[९२] ।।९५।।
जगाम वैष्णवकथाः कथयन्निजमा[९३]लयम् । तदाप्रभृति लोकेऽस्मिन् भक्तिसारो महामुनिः ।।९६।।
अक्षिसञ्जनना[९४]त्पादे ह्यक्षपाद इति श्रुतः[९५]।।९७।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
नवमोऽध्यायः ।।९।।

८४- महात्म्यं –ख,
८५-त्प्रभाधिको–क,
८६–ऽत्नतः– क,
८७–प्रशान्ता–ग, घ,
८८–शां'–क,
८९–निवा र्–ख,
९०–एवमु क्ता–क
९१–प्रसंस्य–क, ख, प्रशस्य–ग,
९२–सः –क, ख,
९३–कथयन्नसिताचलम् –ग,
कथयन्नजिताचलम् –क, घ,
९४–अक्षि तं जनयत्पादे–क,
९५–श्रुतिः – क, ख,

दशमोऽध्यायः

श्रीनारायण उवाच

ततः कदाचिद् योगीन्द्रो भगवत्[१] – पादपङ्कजे। विनि[२]क्षिप्तमनाः सम्यक् सन्मन्त्रोच्चारणे रतः ।। १।। छिद्रकन्थां[३] दृढीकुर्वन् संस्थितस्तद्वनान्तरे। तदा कश्चित् सिद्धवर्यो[४] महाशार्दूलवाहनः ।।२।। उत्तरां दिशमागच्छन्[५] सत्वरं सुर[६]वर्त्मनि। भक्तिसारो[७] परितले[८] स्तम्भित[९] – स्तस्य तेजसा ।।३।। व्याघ्रोऽ – प्यमोघगमनस्तेजस्तन्महदद्भुतम् । उल्लङ्घितु[१०] – मशक्तः सन् पुनः पश्चाद्गतिं गतः ।।४।। सोऽप्यमोघगतिं व्याघ्रं कशाघातैः[११] प्रपीडयन् । तिर्यक् चोर्ध्वमधौ वीक्ष्य भूमिस्थं योगिपुङ्गवम् ।।५।। दृष्टवाऽवतीर्य तन्[१२] मौनैः[१३] पाद[१४] – पद्मे प्रणम्य च। संस्तुत्य दिव्य–स्तुतिभिर्वाक्यमेतदुवाच सः ।।६।। योगिराट् ! त्वं महाभाग! प्रभावस्तेऽतुलो महान् । क्षन्तव्य कृतमज्ञानाद् गमनं मे तवोपरि ।।७।। महात्मन[१५] –स्त्वादृशस्य छिद्रकन्थादिधारणम् । न योग्यं स्यान्महायोगिन् ! मया सम्पादितामिमाम् ।।८।। अमूल्यरत्नखचितां कन्थां कौशेयतान्तवीम् । गुटिका[१६] च रसोद्भूतां[१७] प्रगृहाण [१८] मयार्पिताम् ।।९।। इत्युक्त्वा[१९] पुरतस्तस्य निदधे सुसमाहितः। दृष्ट्वा ते गुटिकां[२०] कन्थां चैताभ्यां[२१] किं फलं भवेत् * ।। १०।।। इत्युक्तो[२२] योगिना सिद्धस्तत्सर्वं वक्तुमारभत् [२३]। एतां कन्थां महाभाग! यो मर्त्यो[२४] विभृयाद् भुवि।। ११।। तस्य मृत्यु[२५] – भयं नास्ति सोऽमरत्वमवाप्नुयात् । गुटिकायाः[२६] पारदस्य सङ्ग्रहो योगिसत्तम ! ।।१२।। ब्रह्म[२७] – यासः पुरा दृष्टो रसज्ञैस्तं शृणु प्रभो ! पारदं प्रथमं गृह्य युक्तौ [२८] – षधिरसैः पृथक् ।।१३।। शोध[२९] –यित्वा ततस्तस्य रसपञ्च[३०] – कमेव च। तथाष्टरसवर्गं च धृतिवीर्यम [३१]– नुत्तमम् ।।१४।। पक्वरत्नान्युज्ज्वलानि [३२] रसं[३३] दत्त्वाऽथ साङ्गतः। अष्टादशसुसंस्कारैस्तपोभिश्च दृढ [३४] – व्रतैः ।।१५।।

१–भगवान् –क,
२–विनिक्षिप्य–ग,
३–कन्थाछिद्रं–घ
४–छिद्धवर्यो–क, सिद्धवर्ग्यो–ख,
५–मागच्छत–ख ६–सुख–ख,
७–भक्तिसारे–क, ख
८–क्षितितले–क, ख
९–तंभित– क, ख,
१०–उल्लङ्घितुमशक्यः –ख,
उल्लंघित्वमशक्यः –क,
११–कसाघातैः –क, ख
१२–तं–ख,
१३–मौनि–घ,
१४–पादपद्मं –ग
१५–महात्मनस्त्वीद्रशस्य–क,
महानस्त्वीदृशसस्य–ग,
१६–घुटिकां–घ,
१७–सोद्भूतां–क,
१८–गृहाण–क,
१९–इत्युक्ता–क,
२०–गुटिकाकन्थे–ख, घुटिकां कन्थां –घ,
२१–एतयोः–ख, एताभ्यां–ग,घ,*–दृष्ट्वा ते घटिकां कन्थां महाभाग यो मर्त्यो विभृयाद् भुवि– क
२२–इत्युक्त्वा–ख,
२३–मारभेत् –क, ग,
२४–योगी–ग, घ,
२५–मृत्ये भयं–क, मृत्युर्भयं–ग,
२६–घुटिकायाः –घ,
२७–बहुयासः –ख, बह्वायाससः –क,
२८–मुक्तौषधि–ग
२९–सोधयित्वा– क, ख,
३०–सरपंचकमेव– क, ख,
३१–बीजम – क, ख,
३२–युन्वलाग्रि –घ,
३३–ग्रासं–क
३४–दृढैर्व्रतैः–क,

रसस्य गुटिका[३५] – मेतां प्राप्तोऽहं भुवि[३६] दुर्लभाम् । एतस्याः स्पर्शनात्सद्यः कोटिलौह[३७] – मनुत्तमम् ।।१६।।
जाम्बू[३८] – नदं भवेत्क्षिप्रमित्युक्त्वा विरराम सः। तच्छ्रुत्वा स्मयमानः सन् योगी[३९] बालार्कसन्निभः ।।१७।।
कौतुकं[४०] दर्शयित्वाऽथ प्रहसन्निदमब्रवीत् । महान् कालः प्रयातस्ते कष्टेन रससाधने ।।१८।।
हा कष्टमिति चोक्त्वाऽथ भक्तिसारो मुनीश्वरः। स्वपादरेणुमुद्धृत्य गुटिकीकृत्य[४१] सादरम् ।।१९।।
तस्मै दत्त्वा प्रभावं च प्रचक्षे[४२] योगिपुङ्गवः। अचलोऽप्यस्य संस्पर्शाद् भवेत्[४३] सद्यो हिरण्[४४] – मयः ।।२०।।
एतस्य धारणान्मर्त्यो नवयौवनमक्षयम् । विचित्रं सुन्दरत्वं च वश्य[४५] – मारोग्यमेव च ।।२१।।
विद्यां च सर्वकामांश्च निर्जरत्वमनुत्तमम् । भवाब्ध्[४६] – युत्तरणं चैव प्राप्नुयाद्[४७] धरणीतले[४८] ।।२२।।
तच्छ्रुत्वा सिद्धवर्योऽपि गृहीत्वा पादमृत्तिकाम् । प्रणामं दण्डवत्कृत्वा प्रशंस्य[४९] च पुनः पुनः ।।२३।।
ततः प्रदक्षिणी[५०] – कृत्य व्याघ्रमारुह्य सत्वरम्[५१]। चित्रकूटं समास्थाय तत्परीक्षेच्छया[५२] धिया ।।२४।।
योगीशपादाब्जमृदा[५३] चित्रकूटं मुदाऽस्पृशत्[५४]। तेनैव चित्रकूटोऽपि दिव्य–जाम्बूनदोऽभवत् ।।२५।।
सुमेरुसम्मितं[५५] देवा दृष्ट्वा विस्मय[५६] – मागताः। तथा सम्यक्[५७] परीक्ष्या[५८]ऽथ सिद्धोऽप्याश्चर्यमानसः ।।२६।।
नृणां विनाशं विज्ञाय काञ्चनापेक्षया भुवि। तं गिरिं[५९] योग–[६०] माहात्म्याद्[६१] भूतले स्थापय दृढम् ।।२७।।
ततः पुन[६२] – र्भक्तिसारं प्राप्य तत्पादपङ्कजे । निपत्य पुनरुत्थाय कृत्वा शिरसि चाञ्जलिम्[६३] ।।२८।।
स्तोत्रयामास योगीन्द्रं भक्तिप्रवण[६४] मानसः।

सिद्ध[६५] उवाच

त्वत्पादपद्मरजसो माहात्म्य[६६] – मतुलं भुवि ।।२९।।
स्पर्शात् पर्वतशृङ्गाणि सौवर्णान्यभव[६७] – न्नक्षणात् । विष्णुर्वै सर्वलोकेशस्तद्[६८] भक्ता एव पावनाः।। ३०।।
तेषां पादरजः पुण्य[६९] भोगमोक्षैकसाधनम् । सर्वसिद्धिकरं पुंसां सर्वपातकनाशनम्[७०] ।।३१।।
अहल्या शापमुक्ताऽभूद् रामाङ्घ्रिस्पर्शनात्किल। त्वत्पादरजसः स्पर्शाच्छैलो[७१] जाम्बूनदः कृतः[७२] ।।३२।।
तस्माद् भगवतो लोके भक्ता एवाधिकाः स्मृताः। इति स्तुत्वा प्रणम्याऽथ स कृत्वा त्रिः[७३] प्रदक्षिणम् ।।३३।।

३५–घुटिका–क, घ,
३६–भूमिदुर्लभं– क, ग, घ,
३७–लोह– क, ख, ग, घ,
३८–जांबुनद– ख
३९–स्वाङ्गे बालार्क सन्निभं–ग,
४०–कंचुकं –ग,
४१–घुटिकाकृत्य–क,कुटिकीकृत्य–ख,घुटिकीकृत्य–घ
४२–प्रावोचद् –घ,
४३–भवत् –क,
४४–हिरन्मयः –क,
४५–वस्यमा–ग,
४६–भवाभ्युत्तरणं–घ,
४७–प्राप्नुयुर–क, ग, घ,
४८–धरिणी–क,
४९–प्रसंस्य–क, ख,
५०–प्रदक्षिणं–ख,
५१–सत्वरः –घ,
५२–तत्परीक्षेक्षया–क
५३–मृदां–क,
५४–स्पृशन् –क, ख,
५५–संमतं–क,
५६–विश्मय–क,
५७–समाक् –क,समान–ख
५८–निरीक्ष्याथ–क, ख, प्रतीक्ष्याथ–ग,
५९–गिरीं–ख,
६०–योगि–क,
६१–महात्म्याद् –ख, ग,
६२–गत्वा– क, ख
६३–चांजलिः – क, ग
६४–प्रणव– ग,
६५–सिद्धोवाच–ग,
६६–महत्म्यम– ग,
६७–न्यभवत् –क,
६८–त्वद्भक्त्या–क, तं भक्ता–ग,
६९–पुण्यां–क,
७०–नासनं–क,
७१–स्पर्शात् शैलो–ख, ग, घ,
७२–जाम्बुनदोऽभवत् –ख,
७३–त्रिप्रदक्षिणं–ख,

अनुज्ञां तेन सम्प्राप्य जगाम स्वनिकेतनम् । ततो योगीन्द्राग्र्य[७४] – गण्यो भक्तिसारो महाद्युतिः ।।३४।।
योगं धृत्वा गुहामध्ये चिरकालं समास्थितः। तदा कासारयोगी च भूताख्यो महदाह्वयः ।।३५।।
तद्गुहाप्रान्तमार्गेण गच्छन्तो[७५] योगिपुङ्गवाः। गुहाया निर्गत[७६] तेजो दृष्ट्वा बालारुणप्रभम् ।।३६।।
अत्र कश्चिन्महायोगी योगमास्थाय संस्थितः। इत्य[७७]मन्यन्त तेषां द्वौ भूताख्यमहदाह्वयौ ।।३७।।
गुहां प्रदक्षिणीकृत्य जग्मतुस्तौ यथेच्छतः। एक एव सरोयोगी गुहास्थं योगिसत्तमम् ।।३८।।
द्रष्टुकामो गुहां प्राप्य ननाम भुवि दूरतः। योगदृष्ट्या तमालोक्य चक्षुरुन्मील्य भार्गवः ।।३९।।
पपात दण्डवद् भूमा[७८] – वुत्थाय च पुनः पुनः। कासारो [७९] ऽपि नमस्तस्मै तथैव[८०] च पुनः पुनः ।।४०।।
अन्योऽन्यं सम्परिष्वज्य रोमाञ्चितशरीरिणौ। निश्चलौ प्रणतौ प्रह्लावानन्दाश्रु[८१]विलोचनौ ।।४१।।
प्रेमसम्पूर्णहृदयौ सुखासीनौ च तौ मुनी। संपृष्ट्वा कुशलं पूर्वं वर्त्तनं च यथाक्रमम् ।।४२।।
सौहार्दद्रावहृदयाव[८२] – न्योऽन्यमनपायिनौ। श्रीमन्नारायणाङ्घ्रयब्जपूजाध्यान–परायणौ ।।४३।।
तद्गुणानुभवास्वादमत्तौ तत्कीर्त्तने रतौ। कञ्चि[८३] त्कालं समास्थाय मयूराख्य [८४] – पुरीं शुभाम् ।।४४।।
पूर्वसागरतीरस्थां[८५] प्राप्य योगविदां वरौ। कैरवा[८५] – ख्यसरस्तीरे मूले केशर[८६] – शाखिनः[८७] ।।४५।।
योगानन्दाब्धिमग्नौ तौ कञ्चि[८८] – त्कालं समूषतुः[८९]। ततः कासारयोगीन्द्रस्तीर्थाचरण[९०] – मानसः ।।४६।।
प्रार्थयन् भार्गवमुनिं कृताऽञ्जलिरुवाच ह। हरेरर्चानिवासानि क्षेत्राणि मुनिपुङ्गव ।।४७।।
गमिष्ये ऽहं भगवताऽप्येवमाज्ञापितः पुरा। दर्शनादेवं महतां स्वक्षेत्रस्य[९१] निवासतः[९२] ।।४८।।
शताधिक [९३] –फलं प्राहुस्तथाप्याज्ञा रमापतेः। कर्त्तव्या सर्वलोकैश्च केनचिन्नावमानिता ।।४९।।
तस्मात्त्वमपि योगीन्द्र मामनुज्ञातुमर्हसि। सम्प्रार्थ[९४] – यन्तमेवं तं[९५] स तद्–विश्लेषकातरः[९६] ।।५०।।
कृच्छात्तं प्रेषया[९७] – मास प्रेम्णा विह्वलतां गतः। अतिदूरमनु[९८] – व्रज्य तत्राऽन्योऽन्यं प्रणम्य च ।।५१।।
यावदालक्षयते तावदालोक्य पुनरागतः। योगनिष्ठामुपास्थाय पुनस्तत्रैव[९९] भार्गवः ।।५२।।
चिरकालं समवसद्[१००] भगवद्ध्यानमानसः। ततः कदाचिद् दिवसे मुक्तिदा श्वेत[१]मृत्तिका ।।५३।।
नासीत्[२] तस्योर्ध्वपुण्ड्रार्थं भक्तिसारस्य योगिनः। ऊर्ध्वपुण्ड्र[३]-विहीनश्च न कुर्याद् वै जपादिकम् [४] ।।५४।।

७४–योगीग्रमगण्यो–क, योगाग्रगण्यो–ख,
७५–चरन्तो–घ,
७६–निर्गतो–ख,
७७–इति मन्यन्त– क, ख
७८–भूमौ वुत्थाय–क, भमौ उत्थाय–ख, घ,
७९–कासारोप्य–क, ख,
८०–तदैव–ग, चकार–घ,
८१–प्रह्लादानन्द–क, ख,
८२–हृदयौअन्योन्यम् –क,ख,ग,घ,
८३–किंचित् –ख,
८४–मयुराख्यां–घ,
८५–तारस्थां–क,
८५–कैरवाख्या–क,
८६–केसर–ग,
८७–साखिनः –क,
८८–किंचित् –ख,
८९–समस्थितौ–क,
समास्थितौ–ख,
९०–तीर्थचरण–क
९१–सर्वक्षेत्र–ख, स्वास्यक्षेत्राणि–क,
९२–वासनात् –क, निवासनात–ग,
९३–सखाधिक–क,
९४–तं प्रार्थयन्त–क,
९५–सं–क, हि–ख,
९६–कारकतः –क, कारतः –ख,
९७–प्रेसयामास–क,
९८–अतिदूरं अनुव्रज्य–घ,
९९–तत्रैक–क
१००–समवसन् –क,ख,
१–स्वेत–क, ग,
२–नास्ति–क, ख, घ,
३–पुण्ड्रविहीनेन–क, ख, घ,
४–देवजपादिकम् –क, घ,
देवपूजादिकम् –ख,

सर्वेषां कृष्णभूरेव यत्र कुत्रापि नास्ति सा। ध्येयौ ब्रह्मादिभिर्नित्यं सर्वाभीष्टप्रदौ[५] नृणाम् ।।५५।।
आक्रान्त[६]लोकत्रितयौ गङ्गाम्भः – प्रभवौ परौ। सकृत्प्रपन्न[७] – जनताभीष्टदामरभूरुहौ ।।५६।।
भक्तकामदुहौ नम्रजन[८] – चिन्तामणी वरौ[९]।।५७।।

प्रपद्ये प्रपद्ये शरण्यौ जनन्यौ[१०]
प्रपद्ये प्रपद्ये पराद्धौ प्रपद्ये*
प्रपद्ये प्रपद्ये पदौ ते वदान्यौ[X]
शरण्यं प्रपद्ये सदा रङ्गनाथ** ।।५८।।

इत्येवं संस्तुतस्तेन हरिः कारुण्य[११] – सागरः। सर्वशास्त्राण्यनन्ताश्च वेदा वै [१२] तस्य मौनिनः ।।५९।।
यथाऽवर्त्तन्त[१३] जिह्वायां द्राविडाकृतिना तथा। कृपावलोक नैर्वीक्ष्य परमव्योम[१४] सोऽगमत्*** ।।६०।।
तत्कटाक्षवशा[१५] – त्तद्वत्सर्वविद्यामयी शुभा[$] भारती तस्य जिह्वायां तस्थौ तद्वशवर्त्तिनी ।।६१।।
ततो वेदमयीं दिव्यां हरिभक्तिविजृम्भिताम् । निरवद्यां योग[१६] – विद्यां परतत्त्वपुरस्कृताम् ।।६२।।
इति संचिन्तयन् योगी योगनिद्रामुपागतः[१७]। निद्रामुपगते[१८] तस्मिन् प्रादुरासीन्महाद्युतिः ।।६३।।
इन्द्रनीलमणिश्यामः [१९] कोटिकन्दर्पसुन्दरः। रक्तारविन्दसदृशपादयुग्मविराजितः ।।६४।।
स्फुरत्प्रपाद[२०] –विद्योतनूपुरक्वणशोभितः[२१]। लराद्बालातपश्लक्ष्ण [२२] – पीतकौशेयवेष्टितः ।।६५।।
नानामणिविचित्रत्वज्वलत्कांचीगुणावृतः [२३]। मुक्तागुच्छाग्रललितकटकै [२४]- र्विलसतकरः[२५]।।६६।।
सौन्दर्यविलसद्वामकटिस्थकरशोभितः। स्वपादपद्मशरण[२६] – संदर्शितकराम्बुजः ।।६७।।
उद्बाहुयुग्मविलसच्छङ्ख [२७] – चक्रविराजितः। विशालोन्नतपीनोरः [२८] – स्थलश्रीवत्सलांछितः[२९]।।६८।।
स्फुरत्कौस्तुभकण्ठः श्रीमुक्ताहारोपशोभितः[!!]। मणिग्रैवेयललितकम्बुग्रीवविराजितः ।।६९।।
पूर्णचन्द्रप्रतीकाशमुखपङ्कजशोभितः। बिम्बोष्ठदन्तविलसच्छुभ्र[३०] मन्दस्मिताञ्चितः ।।७०।।
उदारनासिकागण्डभ्रूललाटविराजितः। स्फुरत्किरीट[३१]मुकुटकुण्डलद्योतिताननः ।।७१।।

५–अक्रान्त–क,
६–प्रजपताभीष्ट–क, प्रपदनादेव–ख,
७–जनि–ख,
८–ताम्रजतितं–क,
९–वकौ–क,ख,
१०–शरणौ जन्यन्यौ–क, शरण्ये जनन्यौ–ग
*–यनन्यौ प्रपद्ये पराद्धयौं–क, प्रपद्ये प्रपद्ये प्रपद्यौ पराद्धौं–ख, प्रपद्ये प्रपद्ये स्वराध्यौ प्रपद्ये–ग, जनन्यौप्रपद्ये पराद्धौं प्रपद्ये–घ–
X-प्रपद्ये प्रपद्योप्रपद्ये वदे ते वदान्यौ–क, ख, प्रपद्ये पदौ ते वदान्यौ–ग, प्रपद्ये प्रपद्ये ममाभीष्टदायौ–घ,
**–शरण्यं प्रपेदे सदा रङ्.गनाथ –क, प्रपद्ये प्रपद्ये वदाने वदान्यौ–घ,
११–कारुण–क, कार्पण्य–ग,
१२–श्च–क, ख,
१३–वर्तते–ख,
१४–व्योमतोगमत् –क,
***– इयं पङ्क्तिः –ख, मातृकायां नास्ति,
१५ –वसात् –क,
१६–योगि–ग, भोगि–क
१७–मुपागमत् – क, ख,
१८–मुपगतो–क,
१९–स्यामः क, ग,
२०–प्रपद्–ग, घ, २१–सोभितः –क,
२२–श्लक्षण –ख २३–गुणवृतः –ग,
२४–कटको–क, कठोर–ग,
२५–करौ–ख,
२६–सरण्यं–क, शरणं–,ख,
२७–विलसत् शङ्ख–ग,घ
२८–पीनोरस्थलवक्षस्थलक्षितः–क,
पीनोरः– स्थलवक्षस्थलक्षितः–ख,ग,
२९–लक्षितः –ख, ग, घ, लछितः –क –
!! स्फरत्कौस्तुभविलसन्मुक्ताहारोपशोभितः –क,ख,ग
३०–विलसच्छुभ–क, विलसत् शुभ–ख, ग, घ,
३१–कीरीट–ख,
$– इयं पङ्क्तिः –ख, मातृकायां नास्ति,

कृपाकटाक्षविलसत्पुण्डरीकायतेक्षणः। वक्षःसिंहासनासीनश्रिया सह विराजितः ।।७२।।
श्रीवेङ्कटाचलाधीशः स्वहस्तेनाभिसंस्पृशन् । उवाच मधुरं वाक्यं कृपया ह्युपलालयन् ।।७३।।
ममाज्ञयाऽस्मिन् सरसि सुधा[३२] – धवलमृत्तिका। देवानामप्यलभ्या या स्थिता गृह्णीष्व तां मुने।।७४।।
धारणादणु[३३] – मात्रस्य लभते मामकं पदम् । इत्युक्तवति देवेशे प्रबुद्ध्य [३४] मुनिपुङ्गवः ।।७५।।
स्तुतिभिर्दिव्यरूपाभिस्तुष्टाव श्रीनिकेतनम् । ततोऽवतीर्य सरसि मृदमादाय सम्भ्रमात् ।।७६।।
अत्यन्तमृदुलां शुभ्रां[३५] नृणां परमपावनीम् [३६]। सरस् [३७] – तीरमुपागम्य पुण्यं वृक्षमुपाश्रितः।।७७।।
पुनः पद्मासनासीनो द्वादशाङ्गेषु शास्त्रतः। केशवादिद्वादशभिर्नामभिर्योगिसत्तमः ।।७८।।
सम्यग् धृत्वो[३८] –र्ध्वपुण्ड्राणि जपन्नष्टाक्षरं मनुम् । स्थित्वाऽत्र कतिचिन्मासान् ततः काञ्चीमुपागमत् ।।७९।।
तस्यां भोगीन्द्र[३९] –पर्यङ्कशायिनं पुरुषोत्तमम् । दृष्ट्वा प्रणम्य संस्तुत्य तद्भक्त्या योगिसत्तमः ।।८०।।
योगानन्दपरो भूत्वा चकार वसतिं[४०] मुनिः।।८१।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
दशमोऽध्यायः ।।१०।।

३२–शुद्धां धवलमृत्तिकां–ख,
३३–दनुमात्रस्य–ख, दण्यमात्रस्य–क,
३४–प्रबुध्य–घ,
३५–सुभ्रां–क,
३६–पावनाम् –क, ग,
३७–पुनस्तीरम्–क, ख,
३८–धृतोर्ध्वपुण्ड्राणि –क,
३९–भोगीन्द्रपर्यङ्के– क, ख, ग,
४०– वास तं –क ख,

एकादशोऽध्यायः

श्रीनारायण उवाच[१]

ततस्तु खनिकृष्णाख्यो विप्रो वेदान्तपारगः। नारायणपदाम्भोजमकरन्दा[२]स्वादषट्पदः ।।१।।
पर्यटन् तीर्थयात्रायां भक्तिसारस्य योगिनः। अद्भुतानि चरित्राणि श्रुत्वा जनपरम्परैः ।।२।।
तत्सेवासक्तहृदयो मृगयन् तत्र तत्र तम् [३]। काञ्चीपुरमनुप्राप्य तत्रस्थं भार्गवात्मजम् ।।३।।
दृष्ट्वा तद् [४] दर्शनौत्सुक्यनिर्भरानन्दपूरितः। भक्तिसारमुपागम्य प्रणाम[५] – मकरोन्मुदा ।।४।।
पुनः पुनः स प्रणम्य हर्षवाष्पाकुलेक्षणः। औत्कण्ठ्यगद्गदगलः संग्रहृष्टतनूरुहः ।।५।।
मूर्द्धिन कृताञ्जलिपुटो[६] वाक्यमेतदुवाच ह। भक्तिसार गुरुश्रेष्ठ महायोगीश्वरेश्वर[७] ।।६।।
दृढव्रतस्य विप्रस्य जातस्त्वद्वरदानतः। खनिकृष्णाख्यदासोऽहं धन्योऽस्मि तव दर्शनात् ।।७।।
अद्य मज्जन्म[८] सफलं मद्भाग्यमतुलं क्षितौ। त्व[९]त्पादपद्मदास्यं[१०] मे देहि त्वं कृपयाऽनघ ! ।।८।।
स्तुवन्तमेवं विप्रं तं कटाक्षैर्वीक्ष्य योगिराट् । एतेन[११] सकला जीवास्तरेयुरिति चिन्तयन् ।।९।।
हेमारविन्दसरसि स्नानं कृत्वा द्विजोत्तमम् [१२]। सम्यक् पद्मासनासीन[१३] – मकरोत्पुरतो मुनिः ।। १०।।
स्वस्य[१४] हृत्कर्णिका[१५] – मध्ये रमासहितमच्युतम् । आत्मनः परमाचार्यं ध्यात्वा विप्रस्य मस्तके ।।११।।
स्वहस्तपङ्कजं न्यस्य मन्त्रराजमनुत्तमम् । श्रवणे दक्षिणे तस्य स्वर[१६] – वर्णादिसंयुतम् ।।१२।।
श्रीमदष्टाक्षरमनो[१७] – रुपदेशं चकार सः। योगमप्युपदिश्याथ शिष्य [१८] – मात्मसमं गुरुः ।।१३।।
अकरोद् विष्णुभक्तानां वात्सल्यं परमाद्भुतम् । सद्यः सुफलिते विष्णोर्वात्सल्ये न तु तादृशम् [१९] ।।१४।।
कृतकृत्यस्ततः शिष्यस्तत्पादाब्जं प्रणम्य सः[२०]। शुश्रूषमाणः[२१] सततं तत्सान्निध्ये[२२] सदाऽवसत् ।।१५।।
अथ भार्गवयोगीशस्तत्समीपगुहान्तरे। योगनिष्ठामुपास्थाय स्थितवानचलेन्द्रियः[२३] ।।१६।।
ततः कदाचिद् वृद्धैका[२४] नारी श्रुत्वा[२५] परम्परैः। भक्तिसारस्य माहात्म्यं गुहा[२६] – प्रान्तमुपागता ।।१७।।
प्रत्यहं तद्गुहामध्ये[२७] गोमयेनोपलिप्य च। रङ्गवल्यास्वलङ्कृत्य गन्धपुष्पाक्षतादिभिः ।।१८।।

१– श्रीसूत उवाच–क, घ,
२–मकरन्दस्वाद– क,
३–सा– क, सः– ख, च–ग,
४–दर्शनोत्सुक्य –ख, ५– प्रणाम्मकरोन्मुदा–क,
६–कृतांजलिपुट–क, कृतांजलिपुटं –ख, घ,
७–महायोगीश्वरेश्वरः –ख,
८–मे जन्म सफलं–क, मे सफलं जन्म–ख,
९–तत् –घ,
१०–दासं–ग,
११–सातेन–क, न्यासेन–ख,
१२–द्विजोत्तमः –ख,
१३–सनासीनं अकरोत् –घ,
१४–स्वस्थे–घ,
१५–कणिकामध्ये–क,
१६–स्वर्णवर्णार्थ–क, ख,
१७–मनुं उपदेशं–क, ख, मनो उपदेशं–घ,
१८–सिष्यमात्म–कं, शिष्यायात्म–घ,
१९–तादृशी–क,
२०–च–ख,
२१–शुश्रुषमाणा–क,
२२–सानिध्यै–क, सान्निध्य–ख,
२३–चलीकृतः –ग, घ,
२४–वृद्धा सा – क, ख, ग,
२५–जनपरम्परैः –क, ख, ग,
२६–श्रुत्वागुहामुपा–ख,ग,
२७–मध्यं –घ

धूपदीपफलैः सम्यगर्चयित्वा यथा[२८] – विधि। नीराजनाद्यैः स्तुतिभिः[२९] प्रणामैर्भक्तिपूर्वकम् ।।१९।।
दिनानि कतिचिद् वृद्धा तमुपास्ते फला[३०] – र्थिनी। भक्तिसारो विसृज्याथ तं समाधिं यदृच्छया ।।२०।।
चक्षुरुन्मील्य तां दृष्ट्वा जगाद कृपयान्वितः। त्वत्सेवयाऽहं सन्तुष्टो[३१] वृणीष्व वरमुत्तमम् ।।२१।।
यद्[३२]दुर्लभं त्रिलोकेषु तच्च दास्ये न संशयः[३३]। एवमुक्ता प्रणम्याऽऽह वृद्धा पलितमूर्द्धजा ।।२२।।
निकृष्टां हेयसंयुक्तां जरामेतां व्यपोहय[३४]। सौन्दर्यमतुलं देहि यौवनं चाक्षयं मम ।।२३।।
तच्छ्रुत्वाभक्तिसाराख्यस्तवा ऽभिलषितं यथा। तथैवा[३५] ऽस्त्विति सम् [३६]–प्राह महात्मा भक्तवत्सलः ।।२४।।
तथैव वरदानेन नवयौवनमागता। दिव्यसौन्दर्यसम्पन्ना तत्पादाब्जं मुहुर्मुहुः ।।२५।।
प्रणम्य हृष्टा[३७] संस्तुत्य कृताञ्जलिपुटाऽभवत् । स पुनः परमैश्वर्यं राजपत्नीत्वमेव च ।।२६।।
ददौ तस्यै मुनिः प्रीत्या[३८] ययौ साऽपि गृहं प्रति। तदा काञ्चीपुराधीशो मृगयासक्तमानसः ।।२७।।
गच्छन्मार्गे समायान्ती[३९] स तदा[४०] दैवचोदनात् । दृष्ट्वैव स्मरनिर्भिन्नहृदयस्तामकामयत् ।।२८।।
शिविकायामथारोप्य प्रापयित्वा स्वमन्दिरम् । तया सह चिरं कालं रराम ह्यनिशं[४१] नृपः ।।२९।।
जरां प्राप्य[४२] ततो[४३] राजा नवयौवनशालिनीम् । विस्मितः पर्य [४४]पृच्छत्तां सुन्दरीं लोकमोहिनीम् [४५] ।।३०।।
आवां[४६] च तुल्यवयसौ पाणिं तु[४७] ग्रहणे पुरा। त्वय्य[४८]–क्षयं वयो देवि[४९] ! मेऽभवद् यौवनं क्षयम् [५०] ।।३१।।
एतस्मिन् कारणं ब्रूहि विस्मयं भवतीह मे। एवं पृष्टा[५१] ऽनवद्याङ्गी भक्तिसारस्य सेवया ।।३२।।
अक्षयं यौवनं प्राप्तमिति सर्वं न्यवेदयत् [५२]। विष्णुभक्ताश्रितानां तु किमलभ्यं नरेश्वर ! ।।३३।।
ऐहिकं पारलौक्यं[५३] वा न किंचिदपि दुर्लभम् । तस्मात्त्वमपि राजेन्द्र भक्तिसारं मुनीश्वरम् ।।३४।।
खनिकृष्णेन शिष्येण सहितं योगिसत्तमम् [५४]। आराधय महाराज[५५]! श्रेयः परमवाप्स्यसि ।।३५।।
इत्येवं वाक्यमाकर्ण्य सभां गत्वा नरेश्वरः। दूतानाज्ञापयामास दुरहङ्कारसंयुतः ।।३६।।
आलये शेषपर्यङ्क[५६] –शायिनो ब्राह्मणं[५७] स्थितम् ! अद्यैव खनिकृष्णाख्यमानयस्व[५८] मदन्तिकम् ।।३७।।
ते दूतास्त्वरितं[५९] गत्वा निशम्य नृपतेर्वचः। खनिकृष्णं महात्मानं निन्युस्तद्राजसंसदि[६०] ।।३८।।
तं दृष्ट्वा विधिवत्पूजां कृत्वा प्राह स भूपतिः। त्वद्गुरुं द्रष्टुकामोऽहं महात्मानं महाशयम् [६१] ।।३९।।

२८–यथाविधिः –क, ख,
२९–तिभिः –ग,घ,
३०–पलार्थिनि–क,
३१–प्रऽहं–ख,
३२–यं–ख,
३३–संशयः–ख
३४–व्यपोहति–क,
३५–तदेवा– ा, घ,
३६–स–ग, ,
३७–दृष्ट–ष्ट , ख,
३८–प्रीतो–त घ,
३९–समायान्ति–क, ख,
४०–भगवद्–क, ख, ग,
४१–त्वनिशं–क, ख,अनिशं–ग,
४२–प्राप्तो–घ,
४३–तु तां – घ,
४४–त्वर्यपृच्छं–च , तांपरिपप्रछत् –ख,
४५–लोकनायिकां–घ, लोकनायकीं–क,ग,
४६–अंवाम –ख,
४७–पाणिग्रहणः –कख, पाणिगृहतः –ख,३
४८–त्वतक्षयं–क, तवाक्षयं–ख, त्वयाक्षयं–घ,
४९–देवी–क,
५०–क्षयः–घ,
५१–पृष्ट्वा–क, ग, घ, दृष्ट्वा–ख,
५२–न्यवेदयेत–क, न निवेदयत–ख, मवेदयत् –क,
५३–वापवर्ग–क, ग,
५४–योगिमुत्तमम् –ख,
५५–महाराजन् –ख,
५६–शेषपर्यङ्कशायिने–क, शेषपर्यङ्केशायिनो–ख,
५७–ब्रह्मणो–क,
५८–मानयिष्यथ–ग, नयिष्यथ–घ,
५९–तं दृष्ट्वा–क,
६०–संसदं –ग,घ,
६१–तुमानय–क, तु आनय–ख,

महाकवीनां प्रवरं त्वामाहुः[६२] कवयो भुवि। ममैकान्तिकमाचक्ष्व गम्भीरार्थपदैर्युतम् [६३] ।।४०।।
ददाम्यसङ्ख्यवस्तूनि वस्त्राण्या[६४] – भरणानि च। इत्युक्तवन्तं राजानं कृष्णयोगी महातपाः ।।४१।।
कोपसंरक्तनयनस्तृणीकृत्य वचोऽब्रवीत् । गुरुर्मे[६५] भगवत्पादपद्म–ध्यानैकमानसः ।।४२।।
तृणीकृताब्जयोन्या[६६]दिवज्रि [६७]प्रमुखनिर्जरः [६८]। तादृशो भक्तिसाराख्यो महायोगीश्वरेश्वरः ।।४३।।
कथमायाति दुर्बुद्धे[६९] – नृकीटस्य तवान्तिकम् । विभूतिद्वयनाथस्य कीर्त्तयन्ती [७०] गुणान् बहून् ।।४४।।
मद्वाणी[७१] दुर्मदान्ध[७२] त्वां दुरात्मानं कथं वदेत् । त्वया दातव्यवस्तूनि शिलालौह[७३] – मयानि हि ।।४५।।
भगवानेव[७४] मूढात्मन् विभूतिद्वयमुत्तमम् । दास्यति[७५] खलु दासाय[७६] किं च दास्यं तवाधु[७७] – ना ।।४६।।
तच्छ्रुत्वा नृपतेर्वाक्यं भ्रकुटी[७८] –कुटिलाननः। परुषाणि[७९]। बहून्युक्त्वा[८०] न तिष्ठेतां युवां मम ।।४७।।
क्षितौ[८१] च क्षणमित्युक्त्वा विवेशान्तःपुरं नृपः।। ४८।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
एकादशोऽध्यायः ।।११।।

———

६२–तमाहुः–ख,
६३–पदैर्युतः–क,
६४–वस्त्रान्याभरणानि–ग,
६५–गुरुमे –क, ख
६६–योनिरादि–क, कृताब्जभव–घ,
६७–प्रमुख–क, विभूतिर् –ख, वज्र–ग,
६८–निर्जरः सदा–ख,
६९–दुर्बुद्धेः –क, ख, दुर्बुद्धे–ग,
७०–कीर्त्तयन्ति– क, ख, ग,
७१–मद्वाक्यं –क, ख,
७२–दुर्महान्ध त्वा–क, दुर्मदान्धत्वां–ख,
७३–लोह–क, ख, ग, घ,
७४–भगवान्निव–क,
७५–सदास्यते–क, घ, दास्यते–ग,
७६–ऽमाय–घ,
७७–तवाधम–ग
७८–भृकटि–ख,
७९–पुरुषानि–क, परुषानि–ख,
८०–बहून्युक्ता–क, ख,
८१–न क्षितौ–क, ख, ग,

द्वादशोऽध्यायः

श्रीनारायण[1] उवाच

तस्य तद्वचनं श्रुत्वा कृष्णयोगी महातपाः । कोपसन्दीप्तवदनो गुरुं प्राप्येदमब्रवीत् ।।१।।
एष राजाऽधमो ब्रह्मन्[2] भगवद्भक्तदूषणम् । कृतवानस्य मेदिन्यां न[3] स्थातव्यं कदाचन ।।२।।
मुखावलोकनं तस्य महापातकहेतुकम् । देशान्तरं गमिष्येऽहमाज्ञां देह्यधुना प्रभो ।।३।।
भक्तिसारो[4]ऽपि तच्छ्रुत्वा त्वां विना नोत्सहे क्षणम् । स्थातुमत्रानुयास्ये[5]ऽहमपि ते पृष्ठतो द्विज ।।४।।
भुजगेन्द्रशयानेनाऽनुज्ञां प्राप्याऽनुयाम्यहम् । इत्युक्त्वा शेषपर्यङ्कशायिनः सन्निधिं गतः ।।५।।
प्रणम्य विधिवत् स्तुत्वा प्राह देवं कृताऽञ्जलिः। श्रीपते सर्वलोकेश[6] सन्तताश्रितवत्सल[7] ।।६।।
गोविन्द कृपयाभक्त[8]परतन्त्र सुरोत्तम[9]। भुक्तिमुक्तिप्रद जगन्मोहनाकार केशव ।।७।।
भुजङ्गभोगशयन[10] पुराण पुरुषोत्तम। त्वद्दासदासो[11] देवेश कृष्णयोगी[12] महामनाः ।।८।।
राज्ञा परुषमुक्तो[13]ऽसौ देशं प्रति[14] गतोऽधुना । तमहं[15] चानुगच्छामि[16] हातुं त्वां[17] न सहे क्षणम् ।।९।।
निमिषं निमिषार्द्धं वा[18] त्वद्वियोगं च नोत्सहे। तस्मात् त्वमपि सर्वेश भोगीन्द्रशयनेन च ।।१०।।
श्रिया भूम्या च सहितो मामनुव्रज सत्वरम् । इत्युक्तं वचनं श्रुत्वा तथैवा[19]ऽति –कुतूहलात् ।।११।।
भक्तनित्या[20]ऽनपायित्वाद् भगवान् भक्तवत्सलः। भुजङ्गाधीशतल्पेन श्रिया सह परिच्छदैः ।।१२।।
गच्छन्तौ गुरू शिष्यौ तावनुगच्छंश्च[21] निर्ययौ[22]। तत्रस्था[23] देवताः सर्वास्तत्सेवासक्तमानसाः ।।१३।।
स्वस्थानानि परित्यज्याऽनुजग्मुः कमलापतिम् । तदाऽस्मिन्निष्प्रभात्यर्थं पुरी देवविवर्जिता ।।१४।।
तदा चकम्पे पृथिवी ससागरधराधरा। आदित्यो निष्प्रभश्चासीत्तमसा चावृता[24] दिशः ।।१५।।
एतानौत्पाति[25] – कान् दृष्ट्वा भाविनाशनशंसकान्[26]। राजा भयाकुलमना भगवद्भक्त[27] हेलनात् ।।१६।।
अस्य हेतुरिति ज्ञात्वा मन्त्रिभिर्नागरैर्जनैः। अक्षपादान्तिकं गत्वा निपत्य चरणाम्बुजे ।।१७।।
भक्तिसारमहायोगिन् शरणागतवत्सल। त्वत्प्रभावमविज्ञाय महदागः कृतं[28] मया ।।१८।।

१–श्रीसूत–क, ख, ग,
२–ब्रह्मण–क,
३–पुण्यस्थाननिवासिनः –क,
पुन्यस्थाननिवासिनः –ख, पुण्यानन निवासनं–घ
४–भक्तियोग्यपि–ध,
५–यास्येदमपि–क,
६–सर्वलोकेश–क,
७–वत्सलं–क,
८–वक्त–क,
९–सुरोत्तमा–क,
१०–सयन–ग,
११–त्वद्दासदास–क, ख, ग,
१२–कृष्णयोगी–क,
१३–मुक्तः स–ग, मुक्तोस्य–घ,
१४–प्रतिगच्छतो –ख, मुक्त्वागतो–घ,
१५–तदहं–ख,
१६–गच्छामो–क, ख,
१७–त्वं –क,
१८–च–क, ख, ग,
१९–च–क, ख,
२०–नित्यानपायो यं–क, ख, नित्यानुपायत्वाद्,
२१–तावन्वगछत–क, ख, तावन्व गछथ–ग
२२–निश्चकौ–क, ख, ग,
२३–तत्तस्यां–क, तत्रसृप्या–ख,
२४–चावृतो–क,
२५–एतानुत्पादकान् –क, ख,
२६–संसकान् –क, ग, संशकान् –ख,
२७–भक्तिहेलतः –क,
२८–कृतो–क, ग,

तामसो दुरहङ्कारो राज्यश्रीमदगर्वितः। अहं दुरात्मा दुर्बुद्धिः कृपाब्धे शान्तविग्रह[२९] ।।१९।।
क्षमित्वा मत्कृतमिदं पुनरागच्छ मत्पुरीम् । इत्युक्तः स पुनः प्राह[३०] मत्प्रिय[३१] कृष्णयोगिनम् [३२] ।।२०।।
पोषयित्वानयस्व त्वं क्रोधोः नास्ति मम त्वयि। तच्छ्रुत्वा त्वरितं गत्वा पादयोः कृष्णयोगिनः ।।२१।।
निपत्य दोर्भ्यां सङ्गृह्य दृढं तत्पादपङ्कजम् । दीनः[३३] प्रमुञ्चन्न[३४] – श्रूणि प्राह गद्गदया गिरा ।।२२।।
अपराधसहस्राणि क्षमन्ते[३५] शरणागते[३६]। महान्तस्त्वादृशा [३७] लोके शरणागतवत्सलाः[३८] ।।२३।।
क्षमस्वाऽद्याऽपराधं त्वं शरणं त्वां गतस्य मे। निवर्त्तस्व[३९] पुनः[४०] काञ्चीं पुरीं मां परिपालय ।।२४।।
इत्युक्तस्तेन संहृष्टः कृष्णयोगी क्षमानिधिः। निवर्त्य गुरुमागम्य प्रार्थयामास भक्तितः ।।२५।।
सन्तुष्टो भक्तिसारश्च शिष्येण सह धर्मवित् । राज्ञा तु[४१] दासदासेन पुनरायात्पुरोत्तमम् ।।२६।।
शेषपर्यङ्कशायी[४२] च निवर्त्य[४३] रमया सह। स्वकीयं स्थानमागम्य वत्सं प्रति यथैव गौः ।।२७।।
निवर्त्य देवताश्चापि स्वं स्वं स्थानमुपागमन् [४४]। नारायणान्तिकं गत्वा भक्तिसारो महामुनिः ।।२८।।
बहुधा स्तु[४५] – तिभिः स्तुत्वा प्राह वाक्यमनुत्तमम् । असङ्ख्याजाण्डसङ्घानि [४६] त्वद्भ्रूसञ्ज्ञांश[४७] – लीलया ।।२९।।
भ्रमन्ति तादृक् [४८] त्वं देव भ्रमसे भाषितेन[४९] मे[५०]। स्तोष्यामि[५१] त्वां कथं देव मनोवागतिगोचरम् ।।३०।।
शेषपर्यङ्कशयन[५२] वरदाश्रितवत्सल। मा[५३] ऽभीष्टं मा च लोके[५४] ऽस्मिन्नकार्षीर्बहु [५५] – गौरवम् ।।३१।।
भक्त्या वाक्यानुरूपेण सततं वर्त्तनं[५६] तव। नास्त्येव सदृशं लोके देवमन्य[५७] – ज्जगत्पतेः[५८] ।।३२।।
शेषभोगीन्द्रपर्यङ्के यथा[५९] पूर्वं श्रिया सह। शयित्वा[६०] पालयन् [६१] भक्तान् [६२] वसाऽत्र[६३] गरुडध्व ।।३३।।
तपसा[६४]–ज्ञाप्य देवेशं राजानं राज्यपालने। नियम्य हरि–सान्निध्ये निवासमकरोन्मुनिः ।।३४।।
अनेन हेतुना लोके शेषशायी जनार्दनः । यथोक्तकारीति[६५] नाम्ना प्रख्यातो[६६] भगवान् प्रभुः ।।३५।।
ततस्तत्सन्निधौ स्तुत्वा भक्तिसारो महामुनिः । वेदान्तसारतत्त्वार्थप्रतिपादकमुत्तमम् [६७] ।।३६।।
प्रबन्धं कृतवांल्लोके सर्वांस्तारयितुं जनान् ! कृत्वैवं हायनान् [६८] सप्तशतं योग[६९] – विभूतिना ।।३७।।

२९–विग्रहः –क,
३०–पुनश्चाह–ग,घ,
३१–मे–घ,
३२–योगिनां–क,
३३–दीनं– क, पुनः–ख,
३४–पुनः प्रणम्याथ–ख,
३५–क्षमते–ख
३६–शरणं गते–घ, शरणागतेः –ग,
३७–त्वादृशो– क, ख,
३८–शरणागतवत्सल–क, शरणागतवत्सलः– ख,
३९–निवर्त्य–क, निवर्त्तय–ग, घ,
४०–स पुनः –क,
४१–राज्ञानु दासदासेन–क,ग,
४२–शायिश्च–क शायि च–ख,
४३–निवृत्य–क,
४४–मुपागमत् –क,
४५–संस्तुतिं– ग,घ,
४६–संख्यानि–घ,
४७–त्वद्भ्रूसंज्ञासलालया–क, भवन्ति तवलीलया–ख,
४८–तावकं –क,
४९–भाषतेन सं–क,
५०–देवेस्मिन् त्वयि विभोभास्वते नमः –ख,
५१–स्तोष्यामि –क, ख,
५२–शायेन–क,
५३–माभीष्टिं–घ,
५४–लंस्मिन्न–क,
५५–वर्द्धगौरवम्–क,
५६–वर्त्तनं–क,घ,
५७–मन्यं –क,ख,ग,
५८–जगत्पति–क,
५९–यथापूर्वा–क,
६०–सयित्वा–ख,
६१–पालायण–क,
६२–भवत्या–घ,
६३–वशाऽत्र–क,
६४–भक्त्याज्ञाप्य–घ,
६५–यथोक्तकारि नाम्नावै–ग,
६६–प्रथितो–घ,
६७–सत्तमः–ख,
६८–हायना–क,ख,ग,
६९–योगि–क

शिष्येण सहितस्तस्थौ खेचरा[७०] – द्यष्टसिद्धिभिः । ततो दक्षिणदिक्पुण्ययात्रासंसक्तमानसः ।।३८।।
शेष –पर्यङ्कशयनं तत्पुरः[७१] – स्थितचक्रिणम् । तत्समीपे शयानं[७२] च गोविन्दमधहारिणम् ।।३९।।
तदन्तिकस्थं लक्ष्मीशं नारायणमनामयम् । प्रणम्य हृदये स्थाप्य शिष्येण सह योगिराट् ।।४०।।
काञ्च्या निर्गत्य स ययौ दक्षिणां दिश[७३] – मुत्तमाम् । स वनानि नदीस्तीर्त्वा[७४] सम्प्राप्य[७५] कनका[७६] –पगाम् ।।४१।।
हंससारससंयुक्तां प्रफुल्लकमलो[७७] – त्पलाम् । भुक्तिमुक्तिप्रदां नृणां सर्वपापविनाशि[७८] –नीम् ।।४२।।
नित्योदितक्रियाः [७९] कृत्वा कुम्भकोण[८०] –मगात्ततः । तस्मिन्ननर्घ्यरत्ना[८१]– ञ्चित–गोपुरावरणैर्युते ।।४३।।
माणिक्यमण्डपे दिव्ये भोगिराट्तल्पशायिनम् । कोटि[८२] – प्रसारिताजानुं दीर्घवृत्तमहाभुजम् ।।४४।।
उपधानीकृतौज्ज्वल्यकङ्कणा[८३] –न्वितकराम्बुजम् । धृतारिशङ्ख[८४] – संशोभिहस्तयुग्मपयोरुहम् ।। ४५।।
श्रीवत्सकुचकु[८५] – म्भाग्रप्रसारितपदद्वयम् । दिव्यपीताम्बरधरं दिव्यभूषणभूषितम् ।।४६।।
दिव्यस्रक्चन्दनोपेतं दिव्यतेजोविराजितम् । सुप्रसन्नमुखाम्भोजं पुण्डरीकायतेक्षणम् ।।४७।।
विशालवक्षःकासारं शाङ्र्गपाणिं जनार्दनम् * । ब्रह्मादिदेवताभिश्च[८६] सदा सेव्यं निरन्तरम्[(*)] ।।४८।।

दृष्ट्वा प्रणम्य हर्षाश्रुपरिपूरितलोचनः। कृताञ्जलिपुटः प्रह्व[८७] स्तोत्रयामास भार्गवः[(**)] ।।४९।।
नमो नमस्ते श्रीशाय पूर्णषाड्[८८] – गुण्यमूर्त्तये। आम्नायचौरहरण[८९] – मत्स्यरूपाय ते नमः ।।५०।।
नमः कमठरूपाय मन्दराचलधारिणे। हिरण्याक्षविनाशाय नमस्ते शिष्ट[९०] – मूर्त्तये ।।५१।।
नमो नृसिंहरूपाय प्रह्लादभयहारिणे । स्वपादा[९१] – क्रान्तविश्वाय वामनाय नमो नमः ।।५२।।
जामदग्न्याय रामाय क्षत्रियाद्रिभिदे नमः । नमस्ते रामचन्द्राय दशकठशिरश्छिदे ।।५३।।
सीता[९२]ग्राकृष्टनदये बलरामाय ते नमः। नमस्ते यादवेन्द्राय[९३] गोपकन्या[९४] – विहारिणे ।।५४।।
अश्वारोहणहेलाय[९५] कल्कि[९६] – रूपाय ते नमः। एतैः कृत्यैः श्रमं[९७] गत्वा[९८] शेषे कश्चिद्वदस्व मे ।।५५।।
एवं स्तुवन्तं तं दृष्ट्वा शाङ्र्गपाणिः[९९] कृपाम्बुधिः। मूर्द्नि[१००] किंचिदुपाघ्राय[१] संलापैः[२] समतोषयत् ।।५६।।

७०–खचराद्यष्ट–क, ख, ग,
७१–तत्पुरस्थित–क, ख, ग,
७२–सयानं–क,
७३–दिशि–क, ख,
७४–तीर्थान–घ, तित्वा–क
७५–सम्प्रास्य–क,
७६–कनापगाम्–क, कांचनापगाम्–, ।,
७७–कनकोत्पलाम–घ,
७८–विनाशनीम्–ग, घ,
७९–क्रियां–ख
८०–कुम्भकोण–क, ख,
८१–रत्नेच–ग, रत्नां च–घ,
८२–कटि–ख,
८३–कङ्कणान्य–ग, घ,
८४–संख–क
८५–श्रीकुंकुमाग्रकस्तूरी–ग,
*–विशालवक्षसं शाङ्र्गपाणिं ब्रह्मादि वन्दितम् –ग,
८६–देवता चैव–क,
(*)–श्लोकोऽयं–ख, मातृकायामुत्तरार्द्धं चाऽस्य–ग, घ मातृकयोर्नोपलभ्यते।
८७–पुटो भूत्वा–क,
(**)–ख–मातृकायां श्लोकोऽयं नास्ति।
८८–षाड्गुण–ग,
८९–चोरहरणे–क, ख
९०–क्रोड–घ
९१–स्वपादक्रान्त–क,
९२–सिताग्राकृष्णदये–क,
सिताग्राकृष्टनदये–ख,
९३–जादवेन्द्राय–क, ग
९४–गोपकान्त–क, गोपीकान्त–ख,
९५–हेलायाः–क,
९६–कलिरुपाय–ख,
९७–श्च संगत्वा–ख,
९८–शेष–क
९९–शाङ्र्गपाणे–ख,
१००–मर्द्धनि–ग, घ,
१–किंचिदुन्नम्य–ग, घ,
२–सल्लापैः–ग,

भक्तिसारमुनीन्द्रस्तु चकार कृति[३] – मुत्तमाम् । सर्ववेदान्ततत्वार्थरहस्यकथनाञ्चिताम् ।।५७।।
तत्रैव योगमास्थाय सहस्रं च चतुःशतम् । समाः[४] स्थित्वाऽथ योगीन्द्रः शाङ्र्गपाणिं हृदम्बुजे[५] ।।५८।।
निधाय तस्मान्निर्गत्य शार्दूलपुरमागमत् । स्वतेजः संक्षिप्य जडत्वमधिगच्छति ।।५९।।
योगीश्वरे भक्तिसारे कश्चिद्ब्राह्मणपुङ्गवः। शिष्यान्वेदमधीयानस्तं दृष्ट्वा भार्गवात्मजम् ।।६०।।
तूष्णीमास्ते तस्य[६] भाव[७] – मविज्ञाय स भूसुरः। तस्मिन्नतीते च पुनरु[८] – द्युक्ते वक्तु मा[९]गमम् ।।६१।।
विनष्टा ऽभूच्छ्रू ति[१०]– स्तस्मिन् भगवद्भक्त[११] हेलनात् । पृष्छतां[१२] न तेषां तु वेदो नष्टोऽभवत्तदा ।।६२।।
उपाध्यायस्तत्र शिष्यैर्विचिन्त्याकुलमानसः। ऊर्ध्वपुण्ड्रधरः कश्चिदिदानीं पुरुषो गतः ।।६३।।
तत्प्रभावमविज्ञाय कृतावज्ञा मया द्विजाः[१३]। महि[१४] – म्नैवाऽधुना तस्य श्रुतिर्नष्टाऽभवन्मम[१५] ।।६४।।
विष्णुपादाब्जभक्तानां यत्कञ्चिद् द्रोहमाचरेत् । किं नष्टं न भवेत्तस्य शाश्वतं[१६] स्थानमप्युत[१७] ।।६५।।
इत्युक्त्वाऽध्यापकैः शिष्यैर्वृतस्तस्यान्तिकं गतः । निपत्य पादयोस्तस्य संस्तुत्याह द्विजैः सह ।।६६।।
क्षमस्[१८]–वाद्याऽपराधं मे ब्रह्मयोगिन्[१९] कृपानिधे[२०]! अस्माकं निगमान्[२१] देहि शरणागतवत्सल ।।६७।।
एवं सम्प्रार्थ्यमानः सन् भगवद्ध्यानतत्परः। मौनव्रतत्वान्मौनीशः स्थानमुक्त्वा[२२] (?) बसाऽनघ[२३](?) ।।६८।।
कृष्ण[२४]–व्रीहीन्[२५] नखैर्भित्वा चिक्षेप ब्राह्मणे पुनः। तत्प्रभावाद् द्विजाः सर्वे स्वां स्वां श्रुतिमुपागताः ।।६९।।
तं प्रणम्य परिक्रम्य गतास्ते स्वनिकेतनम्[२६] ।।७०।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
द्वादशोऽध्यायः ।।१२।।

३–स्तुतिमुत्तमाम्–क, ख, ग
४–समा–क, ख, समां–ग, घ,
५–हृदाम्बुजे–क,
६–तत्र–क, घ, तत्–ग,
७–भावं विज्ञाय–क, प्रभावम्–विज्ञाय–ग,
८–पुनरुह्यते–क, ख,
९–वक्तुमागतम्–क–वक्तुमारभत्–ख,
१०–भूतस्मृतिस्–क, ख,
११–भक्ति–क,
१२–पप्रछांते–क, ख, प्रपछते–ग,
१३–द्विज–घ,
१४–महिमैवा–क, घ,
१५–भवन्मुमं–क,
१६–साश्वतं–ख
१७–मप्युतः–ख
*–श्लोकोऽयं–ख, मातृकायां नोपलभ्यते।
१८–क्षमस्वापराधं–क, क्षमस्व अपराधं–ख,
१९–ब्रह्मन् योगि–क,
२०–कृपानिधेःक–ख,
२१–निर्गमान्–क,
२२–स्थान–ख,
२३–वशानघ–क, वशानघः–ख,
२४–क्व–ख,
२५–वृहि–क, ब्रीही–ख, वृहिं–घ,
२६–निवेशनम्–क, ख, ग, घ

त्रयोदशोऽध्यायः

श्रीनारायण उवाच

गतेषु तेषु विप्रेषु भक्तिसारो महामुनिः। ततस्तन्नगराधीशस्येन्दिरा[१]–पतिमन्दिरम् ।।१।।
कुर्वन् प्रदक्षिणं योगी यां यां दिश[२] – मुपागमत् । लक्ष्मीश्वरोऽपि तं द्रष्टुं[३] परिवर्त्तितकन्धरः ।।२।।
स्मितावलोकनैः स्निग्धै[४] – स्तां तां दिशमवैक्षत। तदा देवस्य पुरतः कश्चिद् ब्राह्मणपुङ्गवः ।।३।।
हरिपाद इति ख्यातो याग[५]–रम्भकृतोद्यमः। स्थित्वा पूजां प्रकुर्वाणो भ्राम्यमाणं मुखं हरेः ।।४।।
दृष्ट्वा स विस्मयं[६] गत्वा बहिःस्थं भक्तिसत्तमम् । कमीक्षते[७] महात्मान[८] – मिति संचिन्तयन् द्विजः ।।५।।
निनाय[९] याग[१०] – शालां तं[११] योगीन्द्रं प्रीतिमानसः। तस्यां भद्रासनासीनं कृत्वा तत्पादपङ्कजम् ।।६।।
सुवर्णपात्रे निक्षिप्य सुगन्धैर्विमलैर्जलैः। प्रक्षाल्य गन्धपुष्पाद्यैरर्चयित्वा यथा[१३]विधि ।।७।।
प्रणम्य प्राह योगीन्द्र हर्षपर्या[१४]– कुलेक्षणः। योगीश्वर महाभाग भगवत्प्रिय सुव्रत ।।८।।
अद्य मे सफली यज्ञस्त्वद्य मे जन्म पावनम् [१५]। पुण्यक्षेत्रे गतश्चा[१६]ऽस्मि तवागमनतो मुने ।।९।।
कृतार्था यज्ञाशालायां ये तिष्ठन्ति द्विजातयः। एवं ब्रुवन्तं तं दृष्ट्वा सदस्या[१७] ऋत्विजश्च ते ।।१०।।
असहन्त[१८] – स्तस्य पूजां क्रोधेनाविष्टचेतसः[१९]। ऊचुरच्युतपादं[२०] तमालोक्य क्रोधचक्षुषा ।। ११।।
वेदवेदाङ्गविदुषः [२१] सर्वशास्त्रविशारदान् । एतान्व्याससमान् हित्वा विष्णुचिह्नाभिमानिनम् ।।१२।।
कञ्चिन्नरं सभामध्ये कुर्युः पूजाऽधिकं कथम् [२२]। महताम[२३]– वमानेन दुरात्मन् ब्राह्मणाधम ।।१३।।
बहिष्कृतस्त्व [२४] – मेतेनेत्युक्त्वा सर्वे[२५] विनिर्गताः। तदा विवर्णषदनो दीनो भग्न[२६] – मनोरथः।। १४।।
अक्षपादमुखं पश्यन् तूष्णीमास्ते[२७] द्विजोत्तमः । अक्षपादस्तु तं विप्रं सान्त्वयन् [२८] भक्तवत्सलः ।।१५।।
हृत्पद्म[२९] – संस्थितं देवं दृष्ट्वानम्याऽब्रवीत् स्तुवन् । षड्गुणैश्वर्यसम्पन्न क्षीराब्धितनयापते ।।१६।।
त्वद्भक्त[३०] – दूषकान् विप्रान् विद्याश्रीमदगर्वितान्। एतान् निरासय[३१] देव त्वं बहिः सम्प्रकाशय ।।१७।।

१–गनराधीश्यदिरापति–क, नगराधीश इंदिरापति–ख,
२–दिशिमुपागमत–क, दिशिमुपागमत –ख,
३–दृष्ट्वा–क
४–स्वग्धैस्–ख,
५–योगारम्भ–क, यागारम्भछुतोद्यमः–खः
६–सविस्मयो–ग,घ, सविश्मया–क,
७–कमिक्षते–ख,
८–महात्मानं इति–ग,
९–तं नीत्वा–ख,
१०–यागशालायां–ख,
११–तां–ग,घ,
१२–सुगन्धपत्रे –घ
१३–यथाविधिः–क,ख,
१४–हर्ष्यर्याकुलेक्षणः–क, हर्षपर्याकुलेक्षणम्–घ,
१५–पाठितम्–घ,
१६–गतश्चाहं–घ,
१७–सदश्या–क, सदृश्य–ख,
१८–अहसंतस्तस्य–क,
१९–चेतसाः–क,
२०–पादांतमालोक्य–क
२१–विदुषा–क,
२२–कथा–क,
२३–महातमवसानेन–ख,
२४–त्वमेव मे तेने–ख,
२५–सर्वो–क,
२६–भक्त–घ
२७–तूष्णीमास–क,
२८–शांत्वयन्–ख,
२९–हृत्पद्मे–ख,
३०–भक्ति–ख,
३१–निराशय–ख,निरासयन्–क,ग,घ,

इत्येवं प्रार्थितस्तेन पुरतस्तस्य योगिनः। काकोदर[३२] – कुलाधीशपर्यङ्कशयनो हरिः ।।१८।।
श्रीभूकरारुणोन्निद्रदीप्यदङ्घ्रिद्वयाम्बुजः। स्फुरत्कटितटाबद्धदिव्यजाम्बूनदाम्बरः[३३] ।।१९।।
धृतारि[३४] –नन्दकेष्वासगदायुक्त[३५] – कराम्बुजः। श्रीवत्समणिहारस्नक्चन्दनाञ्चितुरः–[३६] स्थलः ।।२०।।
गण्डमण्डलसंसर्गो–[३७] ज्ज्वलत्कुण्डलमण्डितः। * उदारातुलविद्योत[३८] – चाम्पेयनिभनासिकः ** ।।२१।।
आकर्णविस्तृतोत्फुल्लविशदा[३९] – म्बुजलोचनः। मुग्धमन्दस्मितज्योत्स्नापुट[४०] – बिम्बाधराञ्चितः[४१] ।।२२।।
शरत्सुधांशुसङ्काश[४२]– मुखराजि[४३] – विराजितः । सुभ्रू[४४]– लतान्वितावकुञ्चितालकासक्तफालकः[४५] ।।२३।।
किरीटाङ्गदमञ्जीरकङ्कणादिविभूषितः। अहीन्द्रवीन्द्रसेनेन्द्र – प्रमुखैर्नित्यसूरिभिः[४६] ।।२४।।
पद्मा[४७]सनभवेन्द्रादित्रिदशैरप्सरोगणैः। वसिष्ठ[४८] – व्यासवाल्मीकिमुख्यै[४९] – र्भागवतोत्तमैः ।।२५।।
सनका।[५०] द्यैर्योगिभिश्च सेवितो[५१] जगदीश्वरः। कोटिद्युमणि[५२] – सङ्काशच्छत्रचामरशोभितः ।।२६।।
प्रादुरासीत्[५३] सभामध्ये सर्वेषामेव पश्यताम् । तदा द्विजोत्तमाः सर्वे विस्मयाविष्टमानसाः ।।२७।।
प्रकम्पिता भीतभीताः[५४] संप्रणेमु[५५]– र्मुहुर्मुहुः। भक्तिसारं च लक्ष्मीशं तद्भृत्यान्[५६] देवतागणान् ।।२८।।
संस्तुत्य शरणं गत्वा कृतप्राञ्जलयो[५७] द्विजाः। अस्माकमपराधानि[५८] क्षमस्वेति[५९] चाऽब्रुवन्[६०] ।।२९।।
इति विज्ञाप्य[६१] ते विप्रास्ततो भार्गवनन्दनम् । ब्रह्मनिष्ठागरिष्ठं[६२] तं प्रणिपत्य पुनः पुनः ।।३०।।
चरणौ शरणं प्राप्य ऊचु[६३] – र्ब्राह्मण[६४] –पुङ्गवाः। वयमज्ञानिनो हीन[६५] –धियो दुरभिमानिनः। ।।३१।।
समत्सरा दुर्मदान्धा अपराधैकभाजनाः। महिमानमविज्ञाय तव योगीश्वरेश्वर ।।३२।।
दीनस्याच्युतपादस्य[६६] ते प्रभावा[६७]३ –विदो मुने। अपराधः कृतोऽस्माभिः क्षमस्वाश्रित[६८]– वत्सल ।।३३।।
घोरदुःखाग्निसंतप्तभवाम्बुधिनिमज्जताम् । पारं गन्तुमशक्तानामस्माकमधुना मुने[६९] ।।३४।।
त्वत्पादतरणिं[७०] लब्ध्वा तरिष्यामः सुखेन[७१] वै। एवं सम्प्रार्थितो[७२] विप्रैः कृपापूर्णावलोकनैः ।।३५।।

३२–काकोशेर–क
३३–जांबुनदांबुजः –क,
३४–धरारि–ग,घ,
३५–युन–क, युत–ख,
३६–चन्दनाद्युदुरः स्थलः –घ, चिदुरत्यलः –ख
३७– संसर्गोज्वलत–ख,
*–हीरादर्माज्वलद्गण्ड मण्डलोदीप्तकुण्डलः –क,
आदर्शकोज्वलद्गण्डमण्डलोद्दीप्तकुण्डलः –घ,
३८–विद्योति–घ,
**–हारोदीर्णज्वलद्गण्डमण्डलोद्दीप्तकुण्डलः –ग
३९–विशदम्बुज–ग,
४०–पूर्णार–क, पूर्ण–ख,
४१–धारांचितः –ख
४२–सुधांसुसंकासं–क, शंकाश–ख,
४३–राजी–ख,ग,घ
४४–शुभ्रु–क, सुभृ–ख,
४५–शक्तपालकः –क, कुंचितालसक्तकन्धरा–ख,
४६–शूरिभिः –क,
४७–पद्मयोनि–क,
४८–वशिष्ठ–क,ख,
४९–प्रमुखैः –ख,
५०–शनकाद्यैः –क,
५१–शेवितः –क,
५२–कोटींद्र–क,ख,
५३–प्रादुराशीत् –क,
५४–भीतिभीताः–ग,
५५–संप्रणम्य–क, ख,
५६–तद्भक्तान्–ख,
५७–ततःप्रांजलयो–घ,
५८–मराधानि–ख,
५९–क्षमध्वमिति–क,ख, क्षमस्व इति–ग,
६०–तमब्रुवन्–घ
६१–विज्ञापिते–क,ख,
६२–ब्रह्मनिष्ठागिरिष्ठां–ख,
६३–शृणु–क,ख,
६४–ब्राह्मणपुण्ड्वः –क, ब्राह्मणपुङ्गव–ख,
६५–हीनध्येयो–ख,
६६–पादश्य–क,
६७–प्रभावविदो–क,
६८–नतवत्सल–ग,घ
६९–मुनेः–ख, मधुनाऽधुना–ग, पुनः–घ,
७०–त्वत्पादांतरणिर्लब्ध्वा–क,
तरणीं लब्ध्वा–ख, तरणिर्लब्धा–घ
७१–सुषेन–क,
७२–प्रार्थितो–ख

तान् वीक्ष्य सर्वदेवानां पश्यतां योगिसत्तमः। परिवारयुतं[७३] देवं हृदयाम्भोजमन्दिरे ।।३६।।
निक्षिप्य संप्रहृष्टोऽभूत्ततो ब्रह्मादिदेवताः। कथयन्तस्तत्प्रभावं स्वं स्वं स्थानमुपागमन् ।।३७।।
हरिपादं नमस्कृत्य स्तुत्वा ब्राह्मण – पुङ्गवाः। क्षमस्वाऽस्मत्कृतागांसीत्युक्त्वा सम्प्रार्थ्य भूसुराः ।।३८।।
हरिपादं निर्वर्तयामासुः सम्प्रहृष्टा यथाक्रतुम् ।। हरिपादस्ततो विप्रैरध्वरान्ते हरिप्रियः ।।३९।।
कृत्वा ह्यवभृथस्नानं भक्तिसारान्तिकं गतः। तत्पादतीर्थं परमं पीत्वा द्विजवरैः सह ।।४०।।
तत्प्रसादा[७४]न्मुनेस्तस्य पूर्ववृत्तान्तमद्भुतम् । सर्वं विज्ञाय संस्तुत्य प्रणाममकरोन्मुदा ।।४१।।
तं परिष्वज्य योगीन्द्रस्तस्याभीष्टवरं[७५] परम् । दत्वा तत्रैव तं विप्रमनुज्ञाप्य [७६] मुनीश्वरः[७७] –।।४२।।
खनिकृष्णेन सहितो योगिभिर्बहुभिर्वृतः। श्रीरङ्गादिषु दिव्येषु क्षेत्रेषु सततं चरन् ।।४३।।
भक्तिसारो महायोगी स्थितो योगसमाधिना। एवं तद्भक्तिसारस्य चरित्रं कल्मषा[७८] –पहम् ।।४४।।
शृणुयात् कथयेद् भक्त्या पठते श्रूयतेऽपि वा । स[७९] पुत्रपौत्रसम्पद्भिः सम्प्राप्या [८०]–युरनुत्तमम् ।।४५।।
देहान्ते प्राप्नुयान्मुक्तिं योगिनामपि दुर्लभाम् ।।४६।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
त्रयोदशोऽध्यायः ।।१३।।

———

७३–परिवारयितुं–क, ख,
७४–तत्प्रदान्मुनै–ख,
७५–तस्याभीष्टं–घ,
७६–मनुज्ञाप्य–ख,
७७–मुनीश्वरम् –घ,
७८–कलुषापहम् –ख,
७९–सुपुत्रपौत्र–ग, घ,
८०–संप्राप्नुयुरमुत्तमम् –क,
सप्राप्य परमत्तमम् –ख, संप्राप्यपरमुत्तमम् –ग,
संभुज्यायुर–घ

चतुर्दशोऽध्यायः

श्रीनर उवाच

नारायण मुनिश्रेष्ठ नमस्ते विश्वपावन ! भक्तिसारस्य माहात्म्यमद्भुतं कथितं त्वया ।।१।।
पवित्रं परमं श्रेयः -कारणं मुक्तिदायकम् । शृण्वतो योगि[1]-चरितं तृप्तिर्मम न विद्यते ।।२।।
भूयः[2] कथय देवेश भगवद्भक्त[3] -वैभवम् । इति पृष्टोऽब्रवीत्तेन नरेण भगवान् विभुः ।।३।।

श्रीनारायण[4] उवाच

साधु पृष्टोऽस्मि योगीश ! चरित्रं परमं त्वया। भगवद्भक्तचारित्रश्रवणा[5] - दन्यसाधनम् ।।४।।
सम्भवेन्ना[6]ऽपवर्गस्य सत्यमेतद् ब्रवीमि ते। श्रीशाङ्घ्रिभक्तचारित्रं कथयिष्यामि ते नर ।।५।।
ताम्रपर्णी[7]-नदी - तीरे पाण्ड्यदेशे मनोरमे। पुण्डरीकेति नगरी सर्व - सम्पत्समृद्धिनी ।।६।।
द्वापरे कुरुणा राज्ञा पालिता कुरुकेत्यभूत् । तस्यामास्ते पुमानाद्यः[8] पयः - पाथोधि[9] - जासखः ।।७।।
सर्वामरौघमुकुटमणिराजत्पदाम्बुजः। तत्रत्या मानवाः सर्वे भगवद्भक्ति[10] -तत्पराः ।।८।।
तेषां कश्चिन्महाभागो महाभागवतात्मजः । इन्दिरानाथसद्भक्तो योगीन्द्रो योगिपूजितः ।।९।।
बल[11] - धारीति विख्यातः परतत्त्वविभागवित् । तस्माद्धर्मो[12]-ऽपरो जज्ञे[13] -चक्रपाणिस्ततोऽभवत्[14] ।।१०।।
चक्रपाणेस्तु[15] - सञ्जातो[16] रक्तधामाह्वयः सुतः। तस्मादजायत श्रीमान् पुत्रः पाटललोचनः ।।११।।
तस्मात्प्रजज्ञे सत्कारी[17] तस्य पुत्रो महामनाः। प्रजज्ञे भगवत्कार्यकारी [18] कारीति[19] नामतः ।।१२।।
प्रत्यहं वर्द्धमानो[20] ऽभूद् गुणाना[21]माकरो महान् । पिता पुत्रं समालोक्य नवतारुण्यसंयुतम् [22] ।।१३।।
कर्तुं दारक्रियां[23] तस्य चिन्तयामास धार्मिकः। ततः स[24] भक्तवर्यस्य समीपग्रामवासिनः ।।१४।।
कञ्जाक्ष[25] - वक्षसः पुत्रीं श्रीभक्तां नाथनायकीम् । विवाहमकरोत्प्रीत्या पुत्रस्य [26] गुणशालिनः ।।१५।।
स कारी[27] भगवद्भक्तो भार्यया विष्णुभक्तया। रराम सुचिरं कालं हृष्टात्मा भक्तवत्सलः[28] ।।१६।।

१-योगिना स्तृप्ति-क, योगिन्यं वृत्तं-ख,
२-भूय-ख,
३-भक्ति -क
४-नारायण-क,ख,
५-श्रावणान्नान्य-ख,
६-न संभवत्यपवर्गस्य-क, संभवत्यपवर्गस्य-ख,ग,
७-ताम्रपर्णी-ख,
८-पुमान्नाद्यः-ग, पुमान्नाथः-घ,
९-पयः पादाब्धिजासखः-क,
श्रीराब्धितनयासखः -ख,पय पाथोब्धिजासखः -ग,
१०-भगवद्भक्ते-ख,
११-वलधीरितविख्यातः-क,
बलधीरिति विख्यातः-ख,
१२-धर्मपरो-ख,
१३-यज्ञे-क
१४-ततो भवेत् -क,
१५-चक्रपाणिस्तु-क,
१६-संज्ञातो-घ,
१७-सत्कारि-क,
१८-कार्यकारि-क,ख,ग,
१९-कीरितनामतः-क,
२०-ब्रद्धमानो-क,
२१-गुणाभामा-ख,
२२-संयुत-क,
२३-दारश्रियां-क,ख,
२४-ततस्तद्-क, तत्तस्य-ख,
२५-कंजाक्षीं वक्षसः पुत्रीं-ख,
२६-पुत्रः सगुणशालिनः-क,
२७-नरारि-क, करारि-ग,
२८-धर्मवत्सलः-ग,

अनपत्यस्तदा[२९] कारी[३०] सुतार्थं चिन्तयंस्तथा[३१]। आराधयिष्ये[३२] तपसा पुत्रार्थं कमला[३३] –सखम् ।।१७।।
इति निश्चित्य मनसा सभार्यः प्रययौ गृहात् । पुण्यां जगति विख्यातां ताम्रपर्णीं तरङ्गिणीम् ।।१८।।
दर्शनाच्छ्रवणाच्चैव मुक्तिदामघनाशिनीम्[३४]। गत्वा स्नात्वा यथान्यायं सम्पूज्य विधिवद् हरिम् ।।१९।।
हृत्पद्मे श्रीपतिं ध्यायन् मन्त्रराजमनुत्तमम्। जपन्समाधिना नित्यं ततप परमं तपः ।।२०।।
एवं संतप्यमाने तु भगवान् भक्तवत्सलः। सरमः कुरुकाधीशः प्रत्यक्षमगमत्पुरः ।।२१।।
तं दृष्ट्वा सहसोत्थाय सम्प्रणम्य पुनः पुनः। प्राञ्जलिः प्रणतः प्रह्वस्तुष्टाव जगदीश्वरम् ।।२२।।
नमस्ते कमलाधीश वात्सल्यादिगुणाब्धये। नमः सहस्रशिरसे[३५] सहस्राक्षाय ते नमः ।।२३।।
नमस्ते विश्वपतये नम आत्मेश्वराय च। जगच्छरीरिणे तुभ्यं नमस्ते विश्वसम्भव[३६] ।।२४।।
अक्षराय[३७] परेशाय शाश्वताय नमो नमः। प्रपन्न[३८] – पारिजाताय भक्ताभीष्टप्रदायिने ।।२५।।
नित्यमुक्तैकभोग्याय भूनीला[३९] –धीश ते नमः। भगवच्छ[४०] –ब्दवाच्याय ह्यात्मदाय[४१] नमो नमः ।।२६।।
एवं स्तुवन्तं तं दृष्ट्वा भगवान् भूत[४२] –भावनः। कृपावलोकनैर्वीक्ष्य सान्त्व[४३] – यन्निदमब्रवीत् ।।२७।।
परितुष्टोऽस्म्यहं वत्स तपसाऽनेन सुव्रत। काङ्क्षितं तव जानामि तथा दास्ये सुतं वरम् ।।२८।।
इत्युक्त्वाऽन्तर्हिते देवे कारी[४४] संहृष्ट[४५] – मानसः। सभार्यः कुरुकां[४६] प्राप्य गत्वा श्रीशस्य[४७] मन्दिरम् ।।२९।।
रमासखं प्रणम्याऽथ जगाम स्वगृहं पुनः। ततो भगवता[४८] –दिष्टः सेनेशो[४९] भगवत्प्रियः ।।३०।।
उदरं नाथनायक्याः प्रविवेश महाद्युतिः[५०]। ततः संवत्सरे पूर्णे सादरा[५१] नाथनायकी ।।३१।।
कलेरादौ द्विनवति[५२] –वासरेषु गतेषु च। वैशाखे[५३] मासि सुभगे[५४] विशाखायां[५५] कवे[५६]–र्दिने ।।३२।।
लग्ने[५७] कर्कटके[५८] श्रेष्ठे सुषुवे पुत्रमुत्तमम् । तदा नारायणो देवो भूव[५९] – राहो रमा[६०] – धवः ।।३३।।
सूतिका[६१] गृहमासाद्य शिशो[६२] – स्तस्य महात्मनः। विज्ञानमुपदिश्याथ जगाम भगवान् हरिः ।।३४।।
तथैव[६३] भुजगाधीशः सिन्धुकन्याथ वाङ्मयी । हरिगृहान्तरे[६४] चिञ्चाभूरुहाकृतिनाऽवसत् [६५] ।।३५।।

२९–तथा–क,ग,
३०–कारि–क,ग, कारिः घ,
३१–तया–क,घ, तदा–ख,
३२–आरधयिष्ये–क, अराधयिष्ये–ख,
३३–कमलाशखम् –क
३४–नाशनीं–ग,
३५–सिरसे–क,
३६–विश्वसंभवे–क,ख,घ,
३७–अछराय–ग,
३८–प्रपन्नापारिजाताय–क,
३९–भूनीला–पतये–ख, भूलीलाधीश–ग,घ,
४०–भगवत्श्रेष्ठनाथ्यिय–क, भगवतश्रेष्ठनामाय–ख,
४१–आत्मदाय–ख,
४२–भूतभाग्वनः– क,
४३–सांतयन्निदं–क, शांतयन्निदं–ख,
४४–कारि–क, ख, ग कारिः –घ,
४५–संतुष्टमानसः –ख,
४६–कुरुकं प्राप्य–क, ग, कुरूकांप्य–ख,
४७–श्रीश्रीशस्य–ख,
४८–भगवदादिष्टः–क,
४९–सेनको–क,
५०–महामुनिः–ख,
५१–उदरे–क,ख,
५२–विनिर्यत्ति–क,
५३–वैसाषे–क, वैसाखे–ख,
५४–शुभगे–ग
५५–विशाषायां –क,ग
५६–रवेर्दिने –क
५७–सुलग्ने –ख
५८–कर्कटे –क,ख
५९–भूवराहौ –क
६०–रमाद्युतिः– क, रमापतिः, ख
६१–सूतिकागृमासाद्य –ख,
सूतीगृहे समासाद्य –घ
६२–शिशेस्तस्य –क
६३–ते देव – ख
६४–हरेर्गृहान्तरे –घ
६५–कृतिनावसन्–क,ख

स बालो हरिकारुण्यलब्धज्ञानामृतं पिबन् । न पिबञ्[६६] जननीस्तन्यं न रुदन्त्रा[६७] ऽवलोकयन् [६८] ।।३६।।
अकुर्वन् हस्तपादाब्जप्रसाराकुचने सदा । संहृष्ट[६९]-पुष्टसर्वाङ्गो निर्विण्मूत्रो गतश्रमः ।।३७।।
अम्लान[७०] - कोमलतनुर्नित्यं क्षुत्तृट् [७१] - विवर्जितः। शङ्खचक्राङ्कितभुजो परिपादार्पिताशयः ।।३८।।
स्थितमेवं [७२] महाभागम[७३] - लौकिकगुणैर्युतम् [७४]। तं दृष्ट्वा पितरौ पुत्रं विस्मयाविष्टमानसौ ।।३९।।
कारयित्वाह्व [७५]-यं तस्य चक्रतुः सूत[७६]-कात्परम् । ततस्तौ कतिचिन्मासान् नीत्वा[७७] तं पूर्ववत्स्थितम् ।। ४०।।
विलोक्य बहुधा हेतुं चिन्तयन्तौ सुदुःखितौ। बालं पर्यङ्कमारोप्य देवदेवस्य मन्दिरम् [७८] ।।४१।।
गत्वा देवस्य पुरतश्चिञ्चा[७९] - मूले मनोरमे। निधाय स्वर्णपर्यङ्क[८०] प्रणम्योचतुरच्युतम् ।।४२।।
त्वया दत्तमिमं[८१] बालमलौकिकमनु[८२] -पमम् । त्वमेव प्रतिगृह्णीष्व[८३] किमर्थं नौ[८४] सुतो[८५] ऽजनि ।।४३।।

इत्युक्त्वाऽश्रुपरिक्लिन्नौ विलपन्तौ सुतं प्रति। उवाच भगवान् वाक्यं दम्पतीं परिसान्त्वयन् [८६] ।।४४।।
पुत्रोऽयं[८७] वां महायोगी[८८] जातः सेनेश्वरो [८९] मम। लोकसंरक्षणार्थाय नैष[९०] मानुषमात्रकः ।।४५।।
तस्माद् युवां मनः शोके कुरुतं मैन[९१] - मात्मजम् । इत्युक्तौ[९२] तेन[९३] हरिणा सम्प्रहृष्टौ ररक्षतुः ।।४६।।
पुत्रमप्राकृततनुं तत्रैव हरिमन्दिरे। विन्यस्य[९४] पालयामास दम्पती पुत्रवत्सला[९५] * ।।४७।।
सोऽपि बालार्कसङ्काशो बालपर्यङ्कमध्यमे। शयानश्चक्रिपादाब्जध्यानसंलग्नमानसः ।।४८।।
कालेन च क्रमन्[९६] देवमन्दिरं परितो[९७] ऽर्भकः। चिञ्चाक्षोणिरुहः [९८] साधु कोटरं[९९] प्रविवेश ह ।।४९।।

बद्धपद्मासनासीनो निमील्य नयनद्वयम् । हृत्पद्मे पद्मपत्राक्षपादपद्मं विलोकयन् ।।५०।।
स ह्या[१००]-नालोकयन् बाह्यं तस्थौ योगसमाधिना । एवमाषोडशं [१] वर्षं कालं कारिसुतो वहन् ।।५१।।
हरेरालोकनाह्लादनिर्भरः [२]संस्थितो ऽ[३]भवत् ।।५२।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
चतुर्दशोऽध्यायः।। १४।।

६६–नापिवंजननी –क, नापिवज्जननीं –ख
६७–नारुदन् –क,ख ६८–नावलोकयत् –घ
६९–स हृष्टपुष्ट –क,ख ७०–आम्लान –क,ख
७१–तृट्पुन्नित्यं विवर्जितः– क,ख,
निक्षुत्तृष्णाविवर्जितः– घ ७२–स्थितयेवं –क
७३–महाभागं अलौकिक –घ
७४–युतः– ख
७५–मारयित्वाह्वयं –क, साराइत्याह्वयं –घ
७६–हतकात्परम् –ख ७७–भीत्वा ५–क
७८–मन्दिरे –क,ख
७९–पुरतो चिंचामूले –क,ग, पुरतो विंवामूले –ख
८०–स्वर्णपर्यङ्के –घ
८१–दत्तमिमां –क, दत्तमिदं –ग
८२–अनूपमम् –ग,घ ८३–परिगृहणीष्व –ख,ग,घ
८४–किमर्थासौ –क,ख, किमर्थ सौ –ग
८५–सुतोजसः– क,ख, सुतौजसः– ग
८६–परिशान्तयन् –क, परिशान्त्वयन् –ख
८७–पुत्रोयं त्वां च –क, पुत्रो युवां –ख
८८–योजोगी –क ८९–स्वेनेश्वरो –क
९०–नैषा–क ९१–नैवमात्मजम् –घ
९२–इत्युक्ता –क, इत्युक्त्वा –ग
९३–तौ च–घ ९४–विन्यश्या –ख
९५–पुत्रवत्सलः– ख
*–इयं पङ्क्तिः– क,ग,घ – मातृकासु नोपलभ्यते
९६–च क्रमा –क ९७–पतितोऽर्भकः– घ
९८–क्षोणिरुहास्साधु –क,
क्षोणिरुहा साधु –ख, क्षोणिरुहे – घ
९९–कोटीरं–क,ख १००–सो ह्यनालोकयन् –
क,ख,ग,घ १–एवमाषेडशं –क
२–निर्भरः– क ३–संस्थिरोभवत् –ख

पञ्चदशोऽध्यायः

श्रीनारायण उवाच

ततोऽस्य मौनं संभेत्तु[1] – मुन्मीलयितुमक्षिणी। भगवान् गरुडारूढः सूर्याग्निसुलभ[2] – द्युतिः ।।१।।
अशेष[3] – जगतां मात्रा श्रिया भूम्या च संयुतः। शङ्खचक्रगगापद्मधरः स्वर्णाम्बरोज्ज्वलः ।।२।।
किरीटहारकेयूरकुण्डलाङ्गदशोभितः। कौस्तुभोद्भासितोरस्को वनमालाविराजितः ।।३।।
मञ्जीरसिंजितलसत्पादपङ्कजशोभितः। आगत्य परमव्योम्नो[4] नित्यमुक्तैर्महात्मभिः ।।४।।
आविरासीत्पुरस्तस्य संश्रितामरभूरुहः। तदैव[5] नेत्रयुगलमुन्मील्यानन्दसंभृतः ।।५।।
समुत्थाया[6]ऽऽशु तत्पादौ सम्प्रणम्य पुनः पुनः। मौनं विहाय वचसा[7] बभाण[8] प्रकृताञ्जलिः[9] ।।६।।
प्रपद्ये श्रीश सर्वेश चरणौ शरणं तव। कमलाहस्तकमललालितौ[10] नूपुरोज्ज्वलौ ।।७।।
रक्तारविन्दसदृशौ पद्मरागमणिप्रभौ । ध्वजवज्राङ्कुशाब्जारिकल्पच्छत्रादिलाञ्छितौ[11] ।।८।।
चन्द्रमण्डलखण्डाभनखराजि[12] – विराजितौ। सुवृत्त[13] – सुन्दराकाररुचिराङ्गुलिशोभितौ ।।९।।
सुपार्ष्णिपार्श्व [14] –ललितौ प्रवालाङ्कुर[15] – कोमलौ। संरक्तनीलवर्णाभ [16] –परितः परिशोभितौ ।।१०।।
ब्रह्मरुद्रेन्द्रमुकुटमणिनीराजनोज्ज्वलौ । सर्वामरा[17] ऽर्चितलसत्करपुष्पो [18] – रुशोभितौ[(*)] ।।११।।
तुलसीकोमलदलप्रभावा[19] ऽखिलराजितौ । श्रीवक्षोजस्थकाश्मीर[20]– चन्दनालङ्कृतौ शुभौ[21] ।।१२।।
प्रत्यहं भक्तिविनतशङ्करौ[22] लोकशङ्करौ[23]। प्रपन्नार्तिहरौ सर्वशरण्यौ[24] लोकवन्दितौ[25] ।।१३।।
लक्ष्मीकपोलनेत्रा[26] – ब्जाधरवक्षो[27] ऽभिर्मर्शितौ। महायोगीशहृत्पद्मे स्थापितौ सुसमाधिना ।।१४।।
ध्येयौ ब्रह्मादिभिर्नित्यं सर्वाभीष्ट[28] – प्रदौ नृणाम् । आक्रान्तलोकत्रितयौ गङ्गाम्भः – प्रभवौ सकृत् ।।१५।।
सकृत्प्रपन्नजनताभीष्ट[29] – दामरभूरुहौ । भक्तकामदुहौ नम्रजनचिन्तामणी वरौ ।।१६।।

१–संभेत्तं उन्मीलयितु –ख,
संभेतुमुल्मीलयतु –क
२–सूर्याग्निसमवर्चसः –ख,
सूर्याग्निसमसद्युतिः –घ
३–अत्रोष –ख
४–परमव्योम्नि –क, व्योम्नः– घ
५–तदेव –क
६–समुस्थाय स्तुतिं स्तुत्वा –क,
समुथाय स्तुतिं कृत्वा –ख
७–सिरसि –क, शिरसि –घ
८–पफाण –क, बफाण –ख, पाणिभ्यां –घ
९–कृतांजलिः– ख,
१०–ललितो –क,लालितौ–ख,
११–लांक्षितौ –ख,ग, लक्षितौ –घ
१२–नखराजी –ग,घ
१३–सुव्रत –क
१४–पाष्ण –क
१५–प्रतालांकुर –ख
१६–वर्णाभ्यो –घ, वर्णाभरां –क
१७–सर्वामरास्थित–क
१८–प्रष्योरु –क
(*)–श्लोकोऽयं –क मातृकायां नोपलभ्यते
१९–प्रभावलि विराजितौ –घ
२०–काश्मीर –क,ग
२१–सुभौ –ख
२२–शंकरो–ख,
२३–संकरौ–क,
२४–सर्वत्रारणौ–ख,
२५–लोकवन्दितं–क,
२६–णेत्राब्जाधर–क,
२७–वक्षोजमर्दितौ–ख,
२८–सर्वाभिष्ट–ख,
२९–जनताभिष्टदा–ख, जनताभीश्टदोऽभर–क,

प्रपद्ये प्रपद्ये शरण्यौ[३०] प्रपद्ये,
प्रपद्ये प्रपद्ये भजन्त्यौ[३१] जनन्यौ।
प्रपद्ये प्रपद्ये पराथौं प्रपद्ये,
जनार्त्तौ[३२] प्रपद्ये पदौ[३३] ते वदान्यौ ।।१७।।

इत्येवं संस्तुतस्तेन हरिः कारुण्यसागरः । सर्वशास्त्राण्यनन्ताश्च[३४] वेदा[३५] वै तस्य मौनिनः ।।१८।।
यथावद्[३६] वाक् च जिह्वायां द्राविडाकृतिना तथा । कृपावलोकनैर्वीक्ष्य परमव्योम सो[३७]ऽगमत् ।।१९।।
तत्कटाक्षवशात्सद्यः[३८] सर्वविद्या–[३९]–मयी शुभा। भारती तस्य जिह्वायां तस्थौ तद्वशवर्त्तिनी ।।२०।।
ततो वेदमयान् दिव्यान् हरि[४०]–भक्तिबिजृम्भितान् । निरवद्यान् योग[४१]–विद्यापरतत्त्वप्रकाशकान्[(*)] ।।२१।।
श्रीधरानन्दकल्याणगुणरत्नाकराम्बु[४२] –धीन् । अच्युताङ्घ्रिजगङ्गायाः प्रवाह इव पावनान् ।।२२।।
प्रबन्धान् मुक्तिदांश्चक्रे सर्वचेतनपावनान् । तत्कारि[४३] –नन्दनकृतां कृति[४४]– माकाङ्क्ष्य भूतले ।।२३।।
अर्चावताररूपेण संस्थिता हरिमूर्तयः । सर्वास्तास्तं[४५] समागम्य चिञ्चिणीकोटराश्रितम् ।।२४।।
तेन संस्तूयमानास्ताः प्रबन्धैश्च पृथक्[४६] पृथक् । स्वं स्वं धाम पुनर्जग्मुर्भक्तदर्शनहर्षिताः ।।२५।।
तेषां शेषाचलाधीशं श्रीनिवासं जगद्गुरुम् । प्रबन्धैर्बहुभिः स्तुत्वा हर्षसम्पूर्णमानसः ।।२६।।
तदङ्घ्रिकञ्जनिष्यन्दमकरन्दरसामृतम् । पिबन् तस्य गुणास्वादमत्तस्तस्थौ स[४७] कारिजः ।।२७।।
तस्मिन् काले ताम्रपर्णीनदीतीरे शुभावहे। कालग्रामे द्विज–[४८] श्रेष्ठः सामाम्नायपरायणः ।।२८।।
परतत्त्वार्थवित्प्राज्ञो वादिकेशरि[४९] – नामवान् । अक्षपादपदाम्भोजध्यानोर्ध्वशिख उत्तमः ।।२९।।
संस्थितः सर्वविप्राणामाचार्यो विजितेन्द्रियः। तस्य त्वेवं प्रभावस्य सत्यां परमयोषिति ।।३०।।
सेनेशस्य गणाध्यक्षः[५०] कुमुदाख्यो[५१] हरिप्रियः। चैत्रे मनोरमे चित्रानक्षत्रेऽजीजन[५२] –च्छुभे ।।३१।।
स[५३] जन्मप्रभृतिप्राप्तभगवद्दास्य[५४] – वैभवः। योगिप्रभावविज्ञातपरतत्त्वविनिर्णयः ।।३२।।
अष्टाक्षरमनुश्रेष्ठजपासक्तमनाः सदा। कृष्ण[५५] –पादाब्जनिष्यन्दमकरन्दा[५६] – स्वादषट्पदः ।।३३।।
रमारमणमाधुर्यकवितारचनोत्सुकः[५७] । भूमौ मधुरकव्याख्यः कवीन्द्रः करुणानिधिः ।।३४।।

३०–शरण्ये–क, ३१–जनन्यौ–ग,
३२–जननार्तौ–ख,
३३– वदौ–क
३४–यनन्ता च–क, यनन्तांश्च–घ,
३५–वेदा वे – क, वेदाश्च–ख, वेदान् वै –घ,
३६–यथा वर्त्तन्ति–ख,ग,
३७–सागमत् – क,ग,
३८–वसात्–क,ग,
३९–सर्वधामयी–घ,
४०–वारिभक्ति–क,
४१–योगविद्या–क, योग–विधान्–ख,
(*)–ततो वेदमयीं दिव्यां हरिभक्तिविजृम्भिताम् ।
निरवद्यां योगविद्यां परतत्त्वप्रकाशकाम् ।।–घ
४२–कराम्बुधिः–क, कराम्बुधान–ख,
कराम्बुधिम्–घ,
४३–सत्कारि–क,ख
४४–वृत्तिमास्थाय–ख,
४५–स्तां–क,
४६–प्रथक् प्रथक्–क,
४७–मकारिजः–क,
४८–द्विजाः श्रेष्ठः –क
४९–वादीकेशरि–क, वादिकेसरि–ग,
५०–गुणाध्यक्षः–क, गणाध्यक्ष्यः –ग
५१–कुमादाख्यो–क,
५२–च जन्छुभे–क, अजनत्छुभे–क,
५३–क–मातृकायां नोपलभ्यते,
५४–दीप्यवैभवः–क,
५५–श्रीकृष्णपादाब्ज–घ
५६–मरन्दास्वाद–घ
५७–रचनाद्विजः–क,घ,

सर्वाम्नायव्रत[५८] – स्नातः सर्ववेदार्थतत्त्ववित् । विरक्तः सर्वभोगेषु गुर्वङ्घ्रि[५९] – कमलेक्षणः ।।३५।।
तत्रस्थं शेषशयनं ध्यायन् हृत्कमलान्तरे । भगवद्[६०] – दिव्यगेहानि तीर्थानि निखिलानि[६१] च ।।३६।।
सेवयन् वसुधामब्धिमेखलां स परि[६२] – क्रमन् । कालिन्दीमथ सम्प्राप्य सर्वपातकनाशिनीम् [६३] ।।३७।।
कृष्ण[६४]–पादाब्जविन्यासलक्षितां [६५] प्रान्तशोभिताम् । अविद्याखण्डिनीं [६६] विद्याप्रदां पुंसां शुभावहाम्[६७] ।।३८।।
स्नात्वा तस्यां यथान्यायं[६८] तत्तीरे सुसमाहितः। ध्यायन् श्रीशाङ्घ्रि[६९]– कमलं तस्थौ योगसमाधिना ।।३९।।
अथ काले गते तस्मिन् कदाचिद् यम[७०] – राड् दिशि। अनेकाण्ड[७१]– किरणशीतांशु[७२]– सदृशोज्ज्वलम् ।।४०।।
तेजोऽवेक्ष्याऽद्भुतं दिव्यं शठकोपस्य योगिनः। विस्मयाविष्टहृदयः कस्ये[७३]– दमिति चिन्तयन् ।।४१।।
हरिं विना न कस्यास्ति तेजः परममीदृशम् । अथवा तस्य सदृश[७४]–स्तिष्ठेद् वा योगिशेखरः[७५] ।।४२।।
तत्र गत्वा तमालोक्याश्रये तत्पादपङ्कजम् । इति निश्चित्य मनसा दृष्टिं निक्षिप्य तेजसि ।।४३।।
ययौ वेगेन महता दिशं तां कविचन्द्रमाः। अनन्यमनसस्तस्य गच्छतः पथि संस्थिताः ।।४४।।
गिरयः सरित[७६] – श्चैव वनानि विविधानि च । पन्थानं प्रददुस्तस्य तेज[७७] – सैकाग्रचेतसः ।।४५।।
सहायं के न कुर्वन्ति भगवद्भक्तिसंश्रितान् । स माधुर्यकविः श्रेष्ठः कुरुकापुरमागमत् ।।४६।।
तत्र चिंञ्चा[७८] – महीजस्य कोटरस्थं महाप्रभुम् । पद्मासनसमासीनं पद्मपत्रायतेक्षणम् ।।४७।।
प्रसन्नसुमुखा[७९] –म्भोजं दीर्घबाहुद्वयान्वितम् । विशालभाल[८०] – फलकं दीर्घभ्रूयुग्मशोभितम् ।।४८।।
गम्भीरनासाललितं बिम्बौष्ठद्वयशोभितम् । ज्वलन्मुकुरसङ्काशगण्डमण्डलशोभितम् ।।४९।।
कुन्दपुष्पतिरस्कारि [८१] – दन्तावलिविराजितम् । महाहनु[८२] गूढजत्रुं[८३] कम्बुबन्धुरकन्धरम् ।।५०।।
सुस्मेरचन्द्रिकाभास्वद्–वक्त्रशुभ्रांशुमण्डलम् । समानो[८४] –दग्ररूपेण विशालो[८५] –न्नतवक्षसम् ।।५१।।
किंचिदुन्नतकुक्षि [८६] – स्थनाभिगाम्भी[८७] – र्यशोभितम् । समस्थिरोरुयुग्मं[८८] तु वृहच्छोणिकटिस्थलम् ।।५२।।
सुजानुजङ्घयुगलं[८९] रक्तपाणि[९०] – तलाञ्चितम् । क्वणद्रक्तारविन्दाभ[९१] – पादपद्मविराजितम् ।।५३।।
ज्ञान[९२] – मुद्राधरं सम्यग् जटामण्डलमण्डितम् । कृपा[९३]– लवालवपुषा बालार्कसदृशप्रभम् ।।५४।।
समाधिना समायुक्तं दृष्ट्वाऽऽनन्दाकुलेक्षणः। प्रणम्य तत्पादयुग्मं स्वनेत्राभ्याम[९४] –भिस्पृशन् ।।५५।।

५८–सर्वाम्नायव्रतः स्नातः–क,
५९–गुर्वङ्घ्रि–क,
६०–भगदिव्य–क, ६१–निषिलानि–क,
६२–सपरिक्रमान्–क, संपरिक्रमन्–घ,
६३–नाशनीम्–ग, ६४–कृपापादाब्ज–क
६५–लक्षितं–क,
६६–खण्डनी–क,
६७–सुभावहाम्–क
६८–यथानद्यां–घ,
६९–श्रीशांघ्रियुगलं–क,
७०–दक्षिणां दिशि–क,
७१–चन्द्रकिरण–क,
७२–सीतांशु–ग,
७३–कश्येदम्–क,
७४–सदृशो–क,
७५–शेषरः–क,
७६–शरितश्चैव–क,
७७–तेजस्यैकाग्रचेतसः–क,ग,
७८–चिंच्यामहीयस्य–क,
७९–प्रसन्नसुमुखंभोजं–क
८०–फालफलकं–क,ग
८१–तिरस्कार–क, ग,
८२–महाहनु–क,
८३–गूढजितृ–क,
८४–समानुदग्ररुपानां–क, समुद्राग्रसुपीनांसं– घ
८५–संविशालोन्नत–क,घ,
८६–किंचिदुनितकुक्षिस्य–क,
८७–गंभीर–क,ग,
८८–समस्थिरोरुरुयुग्मं–क,
८९–जुगलं–क,
९०–रक्तपादतलांचितां– क
९१–रक्तारविन्दाक्ष–ग,
९२–ग्यानमुद्राधरं–क
९३–कपाल वपुषा सम्यक् बालार्क–क,
९४–मभिसंस्पृशन्–क, विसंस्पृशन्–घ,

स्तुत्वा बहुविधैः स्तोत्रैः कृताञ्जलिपुटः[९५] स्थितः। तेनैव संस्थितो मौनी[९६] तं[९७] कृपार्द्रावलोकनैः ।।५६।।
अपश्यत् [९८] तत्प्रभावेन सोऽपि सुज्ञा[९९] –नवानभूत् । तस्य प्रभावं विज्ञाय जगादैवं वचः परम् ।।५७।।
नमो गुणाब्धिनिलय दुःशास्त्रध्वान्त[१००]–हारिणे । धृताभिधानद्वितय शठकोपपराङ्कुश ।।५८।।
महायोगिन्[१] महागुरो त्रयीसारानुत्तमान् । त्वया कृतान् प्रबन्धां[२]–स्तान् शठकोप ! वदस्व मे ।।५९।।
तवास्पदपदार्थांश्च ज्ञापय त्वं दयानिधे ! एवं सम्प्रार्थितस्तेन तं दृष्ट्वाऽऽह पराङ्कुशः ।।६०।।
गुह्याद्गुह्यतमं चैव त्वयोक्तं शिष्यसत्तम[३] ! यथाक्रममहं वक्ष्ये त्वमेकाग्रमनाः शृणु ।।६१।।
परतत्त्वं चतुर्व्यूहं[४] विभवाश्च सनातनाः। अन्तर्यामिशुभार्चाश्च हरेः पर्यायविग्रहाः ।।६२।।
एते[५] श्रुतिपुराणेतिहासस्मृत्यागमादयः। सर्वत्र प्रति[६] – पाद्यन्ते मत्प्रबन्धास्तथैव च ।।६३।।
उपदिश्यैवमखिलं सरहस्यं सविस्तरम् । शिष्यं सम्मान[७]–यामास शठकोपमुनीश्वरः ।।६४।।
ततो मधुरकव्याख्यः प्रणम्य पादप[८]–ङ्कजम् । तस्मात्सम्प्राप्य सर्वार्थान् तमेवैकान्तमानसः ।।६५।।
सततं कीर्त्तयन्भक्त्या तस्मिन्नायतने[९] स्थितः। तिष्ठन् गुरोर्मते नित्यं क्षिपन् कालं निषेवयन् ।।६६।।
स्वकर्मज्ञानभक्त्यादीन्विहायैकान्तमानसः। आचार्यः परमं दैवं स एव परमा गतिः ।।६७।।
स एव परमं ज्ञानं स एव परमं धनम् । स एव परमा विद्या स एव च परायणम् ।।६८।।
स एव सर्वमित्यर्थ[१०] विश्वास[११] – मनुसन्धयन् । तस्मिन्नात्मभरं न्यस्य तत्रैवाऽहर्निशं स्थितः ।।६९।।
तेन शुश्रूषमाणः सन् महायोगी पराङ्कुशः। सन्तुष्टभगवद्दत्तवकुलस्रग्विभूषितः ।।७०।।
तदा प्रभृति लोकेषु[१२] वकुलाभरणाह्वयः। चिञ्चामही [१३]–जच्छायायां दृढयोगसमाधिना ।।७१।।
श्रीशाङ्घ्रिकमलध्यानसुधामनुभवन्सदा। तस्थौ पराङ्कुशमुनिस्तारयन्नखिलान् [१४] जनान् ।।७२।।
प्रबन्धां[१५]–स्तत्कृतान् दिव्यान् ये पठन्ति नरा भुवि। ते प्राप्नुवन्ति परमं पदं सद्यः सुदुर्लभम् ।।७३।।
य इदं शठकोपस्य चरित्रमघनाशनम् । शृणुते पठते भक्त्या श्रावयेल्लिखते यदि ।।७४।।
आयुरनामयं[१६] प्राप्य पुत्रपौत्रांश्च सम्पदः। अन्ते परमवाप्नोति दिव्यं तद्वैष्णवं पदम् ।।७५।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
पञ्चदशोऽध्यायः ।। १५।।

९५–पुटं –ग,
९६–मौनि–क
९७–तत्–क,
९८–अवश्यं–क,घ,
९९–विज्ञानवान–क
१००–द्वान्तसंरणे–क, ध्वान्तसारणे–घ,
१–महागुरो महायोगिन् –घ,
२–त्वया कृतार्थ सर्वास्तान् –घ
३–विप्रसत्तम् –क,
४–चतुर्व्यूहं–क,ग,
५–एतान् श्रुति–क, ग, घ,
६–प्रतिपादयन्ति–घ,
७–शिष्यमाज्ञापयामास–क, समानयामास–ग,
८–पदपङ्कजम् –ग, घ,
९–तस्मिन्नायतसंस्थितः–क,
तस्मिन्नियतसंस्थितः–ग,
१०–सर्वमित्यर्थे–ग,
११–विश्वासावनुसन्धयन्– क, विश्वासादनु– घ
१२–लोके स्मिन् –ग,
१३–चिंचामणिज–छायायां–क,
१४–निखिलां जनान्–क,
१५–प्रबन्धान् तत्कृतान् –क, ग, घ,
१६–आयुरारोग्यतां–क, आयुस्त्वनामयं –घ

षोडशोऽध्यायः

७

श्रीनर[1] उवाच

नारायण मुनिश्रेष्ठ सर्वलोकैरभ्यूजित ! योगीशशठकोपस्य[2] चरित्रं हि श्रुतं[3] मया ।।१।।
मधुरं मधुरां दिव्यां[4] विष्णुभक्तकथासुधाम् । त्वद्वक्त्रदुग्धाब्धिजातां श्रोत्राञ्जलिपुटैः सदा ।।२।।
पिबतो मे न तृप्तिः स्यात्कौतुकं परमं मम । भूयः कथय मौनीश भगवद्भक्तसत्कथाः[5] ।।३।।
नरस्यै–[6] तद् वचः श्रुत्वा नारायणमहामुनिः । पुनः पुनस्तं[7] प्रशंस्य[8] मधुरं वाक्यमब्रवीत् ।।४।।

श्रीनारायण[9] उवाच

तुष्टोऽस्म्ये[10]तेन वाक्येन सत्यमुक्तं त्वया नर ! श्रोतृणां श्रोत्रचेतोऽभिरामैः संसारभेषजैः ।।५।।
श्रोतव्यैर्मोक्षमार्गानुकाङ्क्षिभिः पावनैः शुभैः। चरित्रै[11]र्विष्णुभक्तानां ब्रह्मानन्दपरैर्वरैः ।।६।।
कस्तृप्यति पुमान् भूमौ विना श्वामिषभक्षणात् । योगनिष्ठाः[12] परा ह्येते कासारादिमुनीश्वराः ।।७।।
सेवया विष्णुभक्तानां राजाऽपि कुलशेखरः[13]। अगमत् परमं स्थानं वक्ष्यामि शृणु तां कथाम् ।।८।।
चारुकेरल[14] – देशेषु सर्वसम्पत्समृद्धिषु। राजधानी चोलपुरी[15] त्रिषु [16] लोकेषु विश्रुता ।।९।।
तां पालयति दुर्धर्षः सत्कुलीनो[17] महाबलः। धर्मात्मा वेदवित्प्राज्ञः सत्यसन्धो महायशाः ।।१०।।
नृपस्य तस्य राजर्षेः कौस्तुभस्यां[18] –शसम्भवः। माघे पुनर्वसौ[19] जातो विख्यातः[20]कुलशेखरः ।। ११।।
जन्मप्रभृति रामाङ्घ्रिराजीवध्यानतत्परः। वेदवित्सर्वशास्त्रज्ञो धनुर्वेदविशारदः ।।१२।।
समस्तगुणसम्पन्नो[21] नीतिशास्त्रविशेषवित् । तेजस्वी बलवान्छूरो[22] धर्मज्ञो धर्मवत्सलः ।।१३।।
मूर्धाभिषिक्तः सर्वेषां राज्ञां चूडामणिर्महान् *। इष्टा[23]पूर्तादिकं नित्यं वदान्यः सत्यसङ्गरः ।।१४।।
विष्णुः कृपालय[24] – निधिर्देवताद्विजपोषकः। एकपत्नीव्रतधरः[25] शरणागतवत्सलः ।।१५।।
धर्मेण पालयन्सर्वां[26] पृथिवीमब्धिमेखलाम् । अवतारान् हरेर्दिव्यान् भजन्नित्यमतन्द्रितः ।।१६।।
सीतारमणपादाब्जसंलग्नस्वान्तषट्पदः। सर्वेष्वर्चावतारेषु समभक्तो विशेषतः[27] ।।१७।।
अञ्जनाद्रीशरङ्गेशचरणाब्जानि पूजयन् । विष्णोस्तदवतारेभ्यस्तदर्चाभ्यो[28] विशेषतः (*) ।।१८।।

१–नरोवाच–क,
२–शठकोपश्य–क,
३–श्रूयते–क, ग,
४–दिव्यं–क,
५–त्कथाम्–घ,
६–न स्य तद् वचः–क,
७–पुन च तं–क,
८–प्रेक्ष्य –क,
९–नारायः –क,
१०–तुष्टोऽस्म तेन–क,
११–चरित्रै क,
१२–योगनि ठपरा–ग,
१३–कुलशेष ः –क,
१४–चारुकेर के देशे–क,
१५–कोलपुरीं–क,
१६–तृषु–ग,
१७–स कुलीनो– घ
१८–कौस्तुभस्यांससम्भवः –क,
१९–पुनर्वसे–क, पुनर्वसू–घ,
२०–कुलशेषरः –क,
२१–सम्पन्न– क,
२२–बलवन्छूरो–क, बलवाः शूरो–ग,घ,
*–धर्मेण पालयत्सर्वान् मूर्द्धाभिषिक्तः।
सर्वे राजा चूडामणिर्महान्–क
२३–पिष्टापूर्तादिकं–क,
२४–कृपालयष्णुथौन्देवता–क,
२५–व्रतपरः–क,
२६–पालयत्सर्वान् –क,
२७–विशेषितः–क,
२८–तदार्चाभ्यो–ग,
(*)–श्लोकोऽयं क– मातृकायां न प्राप्यते।

तद्भक्तान्[२९] पूजयन्नित्यं तच्चित्तस्तत्परायणः । वित्तं शरीरं प्राणांश्च[३०] सर्वं तेभ्यः समर्पयन् ।।१९।।
तेषामधीनः सततं राज्यं चक्रे स भूपतिः। एवं भागवताधीनकृतराज्ये महीपतौ ।।२०।।
कदाचिद् भगवद्भक्ता महान्तः[३१] करुणालयाः। शान्ताः[३२] क्षमापराः सम्यग्वीतरागाऽमलाशयाः ।।२१।।
ललाटमध्यविलसत्सितच्छत्रो [३३]र्ध्वपुण्ड्रकाः। तन्मध्यरुक्मरेखाभहरिद्राचूर्णसंयुताः[३४] ।।२२।।
तुलसीनलिनाक्षाणां मालिकालग्नकन्धराः। दोर्मूलाङ्कितवैकुण्ठशङ्खचक्राः शुभासनाः ।।२३।।
द्वयमन्त्रानुसन्धानविलसल्ललिता [३५]–धराः। तदर्थानुभवानन्दसञ्जातपुलकोद्गमाः ।।२४।।
वशं[३६] – वदीकृतस्वान्तकरुणादिद्यतुष्टयाः। जितेन्द्रिया जितक्रोधाः पवित्रीकृतभूजनाः ।।२५।।
भगवद्दास्यभोगैक[३७] – भोगिनो गुरुसेविनः[३८]। स्वपादकमलन्यासैः पावयन्तोऽखिलां भुवम् [३९] ।।२६।।
भगवद्दासदासस्य राज्ञस्तस्य महात्मनः। स्नेहप्रसन्नमनसः पूर्ववद् विविशुः[४०] – गृहम् ।।२७।।
तदा दौवारिका[४१] मन्त्रिप्रेरितास्तान् स्वहस्तकैः । रुध्वा वेत्रैरिदं वाक्यमूचुरज्ञानिनो नराः ।।२८।।
अद्या[४२] ऽवरोधे भूमीशः प्रियया सह वर्त्तते। यावन्ना[४३] – गच्छति बहिस्तावत्तिष्ठत[४४] वैष्णवाः ।।२९।।
इत्युक्तं वचनं तेषां श्रुत्वा भागवतोत्तमाः। तथा भवत्वित्युक्त्वा तान् वैष्णवानां[४५] गृहाङ्गणे ।।३०।।
क्षणमात्रनिवासो वा कीटानामपि मुक्तिदः। इति ब्रुवन्तस्त्वन्योऽन्यं निषेदुर्वेदिकोपरि ।।३१।।
सात्त्विकानां कुतः क्रोधो भगवद्दास्यसेविनाम् । ततः[४६] स राजा तच्छ्रुत्वा[४७] वैष्णवानां निरोधनम् ।।३२।।
परिचारमुखात् क्षिप्रमुत्थाय शयनाच्छुभात् [४८]। वैष्णवानामहो[४९] नास्ति कुत्राप्येवं निरोधता[५०] ।।३३।।
सर्वत्रैवा[५१]–निरुद्धास्ते निरुद्धाङ्घ्र्यब्जचिन्तकाः। महदागो[५२] मया प्राप्तं चिन्तयन्निति भूमिपः ।।३४।।
तेषामन्तिकमागत्य साध्वसादतिकम्पितः। पपात पादपद्मेषु दण्डवत् कुलशेखरः[५३] ।।३५।।
उत्थाय निभृतः[५४] प्राह[५५] प्रगृह्य करपङ्कजे। राज्यश्रीमदमत्तस्याविज्ञातस्याऽऽग[५६] ईदृशम् ।।३६।।
क्षमध्वं मे[५७] क्षमाशीला दासस्य[५८] शरणार्थिनः। एवं सम्प्रार्थयन्तं तं दृष्ट्वोन्निद्रमुखाम्बुजाः[५९] ।।३७।।
रक्षतु श्रीनिवासस्त्वामित्यूचुस्ते कृपालयाः[६०]। दौवारिकांस्ततो दृष्ट्वा राजा संरक्तलोचनः ।।३८।।
अनिर्दिष्टं मया पूर्वं श्रीवैष्णवनिरोधनम् । युष्माभिस्तु[६१] कृतं मूढा दण्डार्हाः पापकारिणः ।।३९।।

२९–तद्भक्त्या–ग,
३०–माणांश्च–क,
३१–मर्च्चितः–क,
३२–क्षान्ताः–क,
३३–सितछिद्रोर्ध्वपुण्ड्रकाः–क, ग,
३४–संयुतः –क,
३५–विलसत्छच्चलिताधराः–क,
३६–वसं–क,
३७–योगैक–ग,
३८–गुरुशेवकाः–क,
३९–ऽखिलाभुवि–क,
४०–विविशत्–क,
४१–द्वौवारिका–ग,
४२–अन्वारोधे–क
४३–यावदागच्छति–घ,
४४–तिष्ठथ–क, घ,
४५–वैष्णवान् –क, वैष्णवास्तत् –ग,
४६–तत्स–क,
४७–तत् श्रुत्वा–घ,
४८–सयनात् शुभात् –क,
४९–वैष्णावानां महे–क,
५०–निरुद्धता–घ,
५१–सर्वत्रे या–क,
५२–महदाग–क,
५३–कुलशेषरः–क,
५४–निभृतिः–क,
५५–प्राह–क,
५६–विज्ञातस्य ण–क,
५७–मा–क, मां–ग,
५८–दाशस्यं–क,
५९–मुखाम्बुजः–क,
६०–कृपालवः –घ
६१–युष्माभिरकृतं –क,

इत्युक्त्वा ज्ञापयामास तीक्ष्णं दण्डं दुरात्मनाम् । तच्छ्रुत्वा[६२] वैष्णवाः सर्वे सर्वभूतदयापराः ।।४०।।
राजानं प्रार्थयामासुर्दौवारिकविमोचनम् । प्रगृह्य प्रार्थनां तेषां शिरसा[६३] नृपपुङ्गवः[६४] ।।४१।।
विनिवर्त्तितदण्डो ऽभूद् विवेशान्तःपुरं महत् । तत्र सिंहासनासीनान् कृत्वा भागवतोत्तमान् ।।४२।।
हिरण्मयेषु पात्रेषु निक्षिप्य पदपल्लवान् । प्रक्षाल्य चोदकै[६५] – र्भार्याकरस्थ[६६] –कलशच्युतैः[६७] ।।४३।।
पीत्वा तद्वारि [६८] परमं पवित्रं कल्मषापहम् । प्रियया बन्धुवर्गैश्च पुत्रैर्भृत्यजनैः सह ।।४४।।
जग्राह मूर्ध्ना तच्छेषं राजा परम–हर्षितः। गन्धपुष्पैः समभ्यर्च्य वस्त्रैराभरणैर्धनैः ।।४५।।
सन्तोषयित्वा तान् सर्वांस्तैः सार्धं[६९] कुलशेखरः[७०]। अन्तःपुराद्विनिर्गत्य सभां देवसभोपमाम् ।।४६।।
प्रविश्य निषसादाथ भद्रपीठे स्वलङ्कृते। उपविष्टेषु सर्वेषु वैष्णवेषु महात्मसु ।।४७।।
तेषु मानसनिष्यन्दगोविन्दचरितामृतम् । पिबन्नानन्दभरितस्तथा[७१] ऽयं कुलशेखरः[७२] ।।४८।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
षोडशोऽध्यायः।। १६।।

———

६२–तत् श्रुत्वा–घ,
६३–सिरसा–क,
६४–नृप ंगवाः– क,
६५–सुद्रादकैर् –क,
६६–भार्जाकरस्थ–क, भार्य्याकरस्थ–ग,
६७–कलशौददौ–क, कलशाच्युतैः– ग,
६८–तदंघ्रिजलं –क,
६९–सार्द्ध–क, ग, घ,
७०–सेखरः–क,
७१–तस्थौ यं–क,
७२–कुलशेषरः–क,

सप्तदशोऽध्यायः

श्रीनारायण उवाच

एवं राज्ञि स्थिते[१] तस्य मन्त्रिणो मन्त्र[२] –कोविदाः। अर्थं निवेदितुं प्राप्ताः काङ्क्षन्तः समयं स्थिताः ।।१।।
स तेषामिङ्गितं ज्ञात्वा कार्यं ब्रूता[३]ऽस्ति चेदिति[४]। जगाद जगतीनाथस्तमूचुर्मन्त्रिणः पुनः[५] ।।२।।
सर्वज्ञस्त्वं महाराज भवानेवा[६] ऽपरो हरिः । अहर्निशं तु त्वत्सत्यं महाभागवतार्चनम् ।।३।।
तदेव खलु कर्त्तव्यं मुमुक्षूणां[७] महात्मनाम् । उपायरहितो धर्मः स एव खलु मुक्तये ।।४।।
तथापि राजा सन्तिष्ठन् प्रजापालनकर्मणि[*] । सतां[८] च सङ्ग्रहं कुर्वन्[९] –सतां निग्रहं तथा ।।५।।
प्रजानामुभयं कर्म ज्ञात्वा शिक्षन्[१०] यथाविधि। काले चक्षु[११]–रूपो यज्ञः शक्तिभिस्तिसृभिर्युतः ।।६।।
पञ्चाङ्गनयवित्प्राज्ञः षड्गुणाश्रयशीलवान् । सप्ता[१२] – ङ्गराज्यचतुरो दशदिक्षु यशः किरन् ।।७।।
भोगाननुभवन्नष्टान्[१३] पोषयन्ना[१४]–श्रितान् जनान् । सततं चतुरो वर्णांस्तत्तद्[१५] धर्मेण पालयन् ।।८।।
कुर्वन्नवविधां भक्तिं भगवत्यम्बुजेक्षणे। गुरून् वृद्धान् द्विजान् पूर्वान् वेदशास्त्रविशारदान् ।।९।।
तत्त्वज्ञान् पूजयन्काले संशृण्वं[१६] स्तत्कथाः शुभाः। मानयन्मन्त्रिणो मन्त्र[१७] –कोविदान् सूक्ष्मधीमतः[१८] ।।१०।।
विज्ञाय तीक्ष्णदण्डः सन् मनुजस्य बलाबलम् । बलानां सङ्ग्रहं कुर्वन् न्यायतो धनम्[१९] –र्जयन् ।।११।।
काले धर्मार्थकामानां भजन्[२०] कोशं[२१] प्रपूरयन् । परेष्वष्टा[२२] –दशस्वस्य पक्षे सप्ताष्टसंविदन् ।।१२।।
तीर्थानि चारैरन्योऽन्यैरविज्ञात[२३]–स्त्रिभिस्त्रिभिः। वर्जयन्[२४] राजदोषांश्च नास्तिक्या[२५]–दींश्चतुर्दश ।।१३।।
नवपञ्चतुःसप्ताष्टत्रिवर्गाश्च तत्परः। तदा[२६] विंशतिवर्गं च कृत्यं प्रकृतिमण्डलम् ।।१४।।
दैवं च मानुषं त्रिस्रो विद्याः संबुध्य वर्त्तयन् । धर्मेण पालयन् पृथ्वीं जितशत्रु[२७]र्जितेन्द्रियः ।।१५।।
एवं तिष्ठति यो राजा स चतुःसागरावधिम् । धरित्रीमखिलां भुङ्क्ते दिव[२८] –माखण्डलो यथा ।।१६।।
एतद्विज्ञाय विज्ञाप्यमस्माकं हितकाङ्क्षिणाम् । राजधर्मेषु वर्त्तस्व मा भूस्तत्त्वपरः सदा ।।१७।।
एते भागवता राजन् राज–धर्ममनुत्तमम् । न बोधयन्ति ते नित्यं प्रत्यक्षं सर्वसौख्यदम् ।।१८।।
तच्छ्रुत्वा मन्त्रिणां वाक्यं मन्दहासमुखो नृपः। श्रीवैष्णवेभ्यो[२९] लोकेऽस्मिन्मुक्तिदा भुक्तिदाः[३०] पराः ।।१९।।

१–स्थितस्तस्य–क,
२–मन्त्रकोविदाः–क,
३–भूता स्ति –क,
४–चेद्यदि–क,
५–पुरः–क,
६–भगवानीश्वरो–घ,
७–मुमुक्षुणां–क,
*–तिष्ठस्तथापि राजासन् प्रजापालनकर्मणि–क
८–सती च–क,
९–कुर्वन् असताम्–घ,
१०–सिक्षणम् –क,
११–चक्षुरूपा–क, ग, घ,
१२–स्वसाङ्गसां राज्य–क,
१३–भवन्नष्ट–क, भवन् इष्टान् –घ,
१४–पोषयन् आश्रितान् –ग,
१५–ततो–क,
१६–शृण्वत्तत्कथाः –क,
१७–मन्त्रकोविदाः–क,
१८–धीमताः– क,
१९–धनमार्यन् –क,
२०–भज–क,
२१–काश–क,
२२–परेस्वष्टादशेस्वस्य–क,
२३–रविज्ञातैस्त्रिभि–क
२४–र्वयत्–क,
२५–नास्तिक्यादिचतुर्दश–क, ग,
२६–तदर्विंशतिवर्गकृत्यं–क
२७–चितसन्वर्जितेन्द्रियः–क,
२८–दिवामा–क, द्वीपमा–क
२९–श्रीवैष्णवान्यः– क,
३०–मुक्तिदाः –ग, घ,

हितोपदेष्टारः[३१] के स्युस्त एव हितबोधकाः। इत्युक्त्वा तान् समादिश्य करणीयेषु[३२] भूमिपः ।।२०।।
वैष्णवैः सह तत्त्वार्थलग्नचित्तः सदाऽभवत् । मन्त्रिणोऽपि सदा राज्ञो[३३] वैष्णवानां च भेदने ।।२१।।
अभवन् पापमतयश्छिद्रा[३४]–न्वेषणतत्पराः। ततः कदाचिद् भूमीशो महाभागवताग्रणीः ।।२२।।
राजराजो महातेजास्तप्तजाम्बूनदप्रभः। विशालवक्षा रक्ताब्जपाणिपादतलाञ्चितः ।।२३।।
पूर्णचन्द्राननः सुभ्रू[३५]र्बिम्बोष्ठः शुभनासिकः। विशालभालफलको नील–कुन्तलशोभितः ।।२४।।
सुदीर्घायत[३६] –ताम्राक्षः सुकपोलः शुचि[३७] –स्मितः। महाहनुर्गूढजत्रुः कम्बुग्रीवो महाभुजः ।।२५।।
गम्भीरनाभिः सत्कुक्षिर्वृहच्छ्रोणिकटिस्थलः। सुजानुजङ्घायुगलः पादपद्मविराजितः ।।२६।।
दिव्यस्रग्[३८] – वस्त्रललितो दिव्यचन्दनलेपितः। किरीटहारकेयूरकुण्डलाङ्गदशोभितः ।।२७।।
मणिग्रैवेयमञ्जीरकङ्कणाद्यैर्विराजितः। जाम्बूनदमणिस्तम्भविचित्रमणिमण्डपे ।।२८।।
भद्रसिंहासनासीनो मण्डलाधीश[३९] – सेवितः। मन्त्रिभिर्मन्त्रतत्त्वज्ञैर्हितकृद्भिः पुरोहितैः ।।२९।।
पौराणिकैः सत्कविभिः परिषद्भिः सहस्रशः। सभायां शुशुभे राजा नक्षत्रैरिव चन्द्रमाः ।।३०।।
तथा भागवताः[४०] श्रेष्ठा महाकारुण्यसिन्धवः। अनन्यदेवताभक्ता विशिष्टजनसन्नुताः[४१] ।।३१।।
जगत्पवित्राः सर्वेशकैङ्कर्यनिरताशयाः। श्रीमदष्टाक्षरीमन्त्रजपशक्तिसमन्विताः* ।।३२।।
दमादिगुणसम्पन्ना द्राविडश्रुतिबोधकाः। शेषशेषित्वतत्त्वज्ञा जीवात्मपरमात्मनोः ।।३३।।
तत्त्वत्रयं[४२] परिज्ञात्वा स्थिर[४३]–चित्ता दृढव्रताः। आजग्मुर्वैष्णवाः केचित्तान् दृष्ट्वा कुलशेखरः[४४] ।।३४।।
प्रत्युत्थाय प्रणम्याथ संस्तुत्य विनयान्वितः। पूजयित्वा यथान्यायं तत्त्वगोष्ठ्यां[४५] मनो[४६] दधौ ।।३५।।
पृष्ट्वा[४७] तत्त्व[४८] – रहस्यानि ज्ञातस्तेभ्यो हरेर्गुणान्[४९]। श्रुत्वा यामद्वयं राजा परमाह्लादनिर्भरः ।।३६।।
स्नातुकामस्ततः स्वाङ्गभूषणानि विमुच्य सः। सिंहासने विनिक्षिप्य कथासक्तमनाः पुनः[५०] ।।३७।।
तेभ्यो महद्भ्यो गोविन्दचरितामृतमुत्तमम् । पिबंस्तस्थौ महाराजः[५१] सत्संलाप[५२] – कुतूहलः ।।३८।।
ततः प्रणम्य विधिवदनुव्रज्य[५३] च वैष्णवान् । विसर्जयित्वा शुद्धान्तः[५४] प्रविवेश महायशाः[५५] ।। ३९ ।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
सप्तदशोऽध्यायः ।।१७।।

———

३१–हितोपदेष्टाः के स्युमे त– क, ग,
३२–राजकर्णेषु–क,
३३–राज्ञे–ग,
३४–द्भागवन्वेषणतत्पराः –क,
३५–शुभ्रु–क, सुभ्रु–ग,
३६–सुदीर्घायताम्राक्षः–क,
सुदीर्घायुतत्ताम्राक्षः–ग,
३७–सुचि–क,३८– स्रक्–क, ग, घ,
३९–मण्डलाधीस–क,
४०–भागवतश्रेष्ठा–ग, घ,
४१–जनसंयुतः–क,
*–श्रीमदष्टाक्षरमन्त्रंजपासक्त समनोरथाः–क,
श्रीमदष्टाक्षरीमंत्रजापसक्तसमन्विताः–ग,
श्रीमदष्टाक्षरीमंत्रजपासक्तिसमन्विताः– घ
४२–तत्त्वत्रयपरिज्ञाताः– क, ग,
४३–स्थिरः–क,
४४–कुलशेषरः– क,
४५–तत्त्वगोष्ठी –क
४६–मनोदयः– क, महोदधेः–ग
४७–दृष्ट्वा –घ
४८–सत्वरहस्यानि –क
४९–गुणात् –क
५०–पुणः– क
५१–महाराज्य –क
५२–सत्सल्लाप –घ
५३–दनुषज्य –घ
५४–सुद्धान्तः– ग, शुद्धान्तं– घ
५५–महानसं –क

अष्टादशोऽध्यायः

नारायण उवाच

ततोऽमात्यगणाः सर्वे समागत्य सभातले। भूषणान्यासनस्थानि ददृशुर्वसुधापतेः ।।१।।
इमानि भूषणान्यद्य विनिक्षिप्य गुहान्तरे। जनयामो वयं[1] द्वेषं[2] वैष्णवेषु महीपतेः ।।२।।
इत्यामन्त्र्य तदाऽन्योऽन्यं मन्त्रिणः कुटिलाशयाः। तानि कोशे स्थापयित्वा जग्मुः स्वं स्वं निवेशनम् ।।३।।
ततो नराधिपः स्नात्वा जप्त्वा तु परमं मनुम् । ब्रह्मादिसेवितं रामं ससीतं सहलक्ष्मणम् ।।४।।
अर्चयित्वा यथान्यायमर्घ्यं[3] – पाद्यादिपूर्वकम् । प्रणम्य स्तोत्रयामास स्तवैर्वेदान्तसंहितैः ।।५।।
ततोऽन्नं[4] षड्रसोपेतं स भुक्त्वा[5] तन्नि[6]वेदितम् । सभां गन्तुं समुद्युक्तो जगाद परिचारकान् ।।६।।
भूषणानि सभायां वै स्थापितानि मयाऽऽसने। तान्यानयध्वमित्युक्ते राज्ञि[7] ते परिचारकाः ।।७।।
सभां तूर्णमुपागम्य विचिन्त्य[8] पुनरागताः। भूषणानि न सन्तीति तत्र[9] राज्ञे [10] न्यवेदयन् ।।८।।
तेषां तद्वचनं श्रुत्वा कुपितः पुरुषर्षभः। आहूय मन्त्रिणश्चैव सर्वान् नगररक्षकान् ।।९।।
भूषणानि ममाद्यैव स्थापितानि मयाऽऽसने। तस्कराः के समागत्य मुष्णन्त्यत्राऽधुनाऽहनि ।।१०।।
सदा युष्मासु तिष्ठत्सु रक्षां कुर्वत्सु सर्वतः। स्तेयमेतादृशं लोके यत्र कुत्रापि नास्ति हि ।।११।।
अधुनैवाऽऽनयध्वं मे भूषणान्य[11] – विलम्बितम् । नोचेत्प्राणान्तिकं दण्डं[12] करिष्यामि[13] न संशयः।।१२।।
एवमुक्ते तु नृपतौ[14] सर्वे साध्वसकम्पिताः। बभूवुर्दीनवदना न शेकु[15] – श्चाभिभाषितुम् ।।१३।।
अथाऽमात्याः पुरः[16] स्थित्वा प्रणम्य नृपपुङ्गवम् । कृताञ्जलिपुटाः सर्वे वाक्यमूचुः शनैः शनैः ।।१४।।
राजन् [17] त्वदाज्ञया चौर[18] – नामापि श्रूयते नहि। एतावत्कालपर्यन्तं कदाचित् सर्वभूतले ।।१५।।
एते भयं गताः सर्वे भवन्ति व्यथिता[19] भृशम् । कथमन्वेषणं कुर्वश् [20] – चौरगामीति चात्र हि ।।१६।।
लोके राजगृहाः सन्ति राजानः सन्त्यनेकशः[21]। सदा निवारितद्वारा न खल्वेवं भवादृशाः ।।१७।।
त्वन्मन्दिरस्य द्वारे तु यादृशाः पुरुषा अपि । सर्वे निवारिता[22] न स्युः श्वेतमृण्मात्र [23] – धारणात् ।।१८।।
यथावतिष्ठति [24] स्वान्तं तव सर्वज्ञ भूपते[25]! चित्ते[26] ऽस्माकं तु सन्देहो वैष्णवेष्वेव[27] जायते ।।१९।।

१–द्य– घ
२–वैमुख्यम् –घ, द्वेष्टं –ग
३–मर्घं –ग, घ
४–तताम्रं –क
५–संभुक्ता –क
६–तम् –क,
७–राज्ञस्ते –घ
८–विचिन्व्य –ग
९–तन्न –घ
१०–राज्ञो –क,
११–भूष णानविलम्बितम् –क,
भूषणानि विलम्बितम् –ग
१२–दण्डे –क
१३–करिष्य म्यनशंसयः– क
१४–नृपतिना –घ
१५–शन्कुश्चावाधिता –ग
१६–पुर –क
१७–राजना चतदाज्ञाया –क
१८–चोरनामा –क, ग, घ
१९–व्याधिता –क, वाधिता– ग
२०–कुर्वन् चोरगामीति– क, ग, घ
२१–संत्यनेकसः– क
२२–नियतवाता– क
२३–श्वेतमृण्मात्रधारकान्– क, श्वेतमृण्मात्रधारणात्– घ
२४–यथा वा तिष्ठति –ग, घ
२५–श्रूयते –क
२६–चित्तस्माकम् –क
२७–वैष्णवैश्चैव –क, वैष्णवेष्विव –ग

तान् विना[२८] भूषणान्यन्ये न गृह्णन्ति नृपोत्तम ! त्वमेव शोधयित्वा तान् गृह्णीष्वाभरणानि ते ।।२०।।
तच्छ्रुत्वा दुष्कृतं[२९] वाक्यं मन्त्रिणां दुष्टचेतसाम् । पिधाय कर्णौ संरब्धौ[३०] भगवन्नाम संस्मरन् ।।२१।।
मुखानि[३१] न निरीक्षे[३२]ऽहं युष्माकमघचेतसाम् । अवगच्छथ यूयं मे सन्निकृष्टा[३३] नराधमाः ।।२२।।
नहि सम्भाषितुं योग्या भगवद्भक्त[३४]–निन्दकाः। दर्शनात्पातकं[३५] तेषामित्युक्त्वाऽभूत् पराङ्[३६]–मुखः ।।२३।।
सङ्क्रुद्ध[३७] नृपमालोक्य मन्त्रिणः पतिता भुवि। दण्डं कुरु यथोक्तं नो दण्डार्हाः पापशालिनः[३८] ।।२४।।
इति ब्रुवाणेषु तदाऽमात्येषु कुलशेखरः[३९]। श्रीवैष्णवानां निन्दां तां परिहार्य ततः परम् ।।२५।।
मन्त्रिणो दण्डयिष्येऽहं तीक्ष्णदण्डेन दुर्मतीन् । स्याच्चेत्तदा वैष्णवेषु भक्त्या निरपराधिनः ।।२६।।
मन्त्रिणोऽदण्डयद् राजा जनो निन्दति[४०] मामिति। एवं निश्चित्य मनसा सचिवानब्रवीन्नृपः ।।२७।।
लोके तिष्ठति यत्पापं तद् हरिस्मरणाद्[४१] हृतम् । हरिनिन्दाकृतं पापं वैष्णवस्तुतिनाहृतम् ।।२८।।
निन्दया वैष्णवानां तु यत्पापं प्रतिपद्यते। तत्र[४२] नश्यति केनाऽपि वदन्ति हि महर्षयः ।।२९।।
तस्माद् युष्मत्कृता[४३] ह्येतद्[४४] विष्णुभक्त।[४५]–पवादता।
महेन्द्रोऽपि हि[४६] युष्मान् वै क्षन्तुं[४७] जातु[४८] न शक्नुयात् ।।३०।।
तथाप्यप्रकटीकृत्य स्तेयत्वं वैष्णवेष्वहम् । दण्डं करोमि[४९] चेद् युष्माकं[५०] तिष्ठेल्लोके यशः स्थिरम्[५१] ।।३१।।
तस्मादहं दण्डा[५२]–न्निवृत्तोऽहं युष्मास्वद्य समुद्यतात्[५३]। भगवद्भक्तियुक्तेषु वैष्णवेषु महात्मसु ।।३२।।
सद्धर्मसम्पन्[५४] – मूलेषु परस्त्रीपरवस्तुषु[५५]। विमुखेषु त्रिभुवने पवित्रचरितेषु च ।।३३।।
अर्थकामानपेक्षेषु सर्वलोकसुहृत्सु च। क्रोधलोभातिजैत्रेषु ज्ञानवैराग्य[५६] – शालिषु ।।३४।।
एवं प्रभावेष्वेतेषु भवद्भिर्दुष्टमानसैः। स्तेयमारोपितमहं परिमार्ष्टुं[५७] समुद्यतः ।।३५।।
प्रमाणं तु करिष्यामि निःशङ्केना[५८]ऽन्तरात्मना। स्वामिकार्य[५९]हि भृत्यस्य कर्त्तव्यं खलु सर्वदा ।।३६।।
इत्युक्त्वाऽऽशीविषं[६०] घोरं स्थापयित्वा घटान्तरे। सौवर्णीं घटिकां चैव राजा सम्पूर्णमानसः ।।३७।।
पुरोहितान् बन्धुवर्गान् राजा सुहृद एव च। तथा पौरजनान् सर्वान् समानी[६१] – येदमब्रवीत् ।।३८।।
जनाः सर्वे शृणुध्वं मे वाक्यं सत्यं वदाम्यहम् । कदाचिदपि लोकेषु न मुष्णन्ति हरिप्रियाः ।।३९।।

२८–विणा –क
२९–दुष्करं–क
३०–संरुध्वौ –क
३१–मुखनि –क
३२–निरीक्ष्ये हं –क, ग
३३–सन्निकृष्टान्नरा धमाः–, संनिकृष्टनराधमाः– क
३४–भगवद्भक्तिनिन्दकाः– क
३५–पावनात्–क
३६–परान्मुखः– क
३७–संक्रुद्धः– क
३८–पापशीलिनः– ग,घ
३९–कुलशेश्वरः– क
४०–निन्देत –घ
४१–हरिस्मरणर्द्धतम् –क
४२–तत्र तस्यपि –क
४३–युष्मा –क
४४-मेतां –कं
४५–भक्तापवादना –क, भक्तापराधता –घ
४६–च –क,घ
४७–क्षांति –क, वावि –घ
४८–जन्तुपिशक्रुयात् –क, जेतुं नाभिशक्रुयात् –घ
४९–करोति– क, ग
५०–युष्मान् –क,ग
५१–यश स्थिरे –क
५२–दण्डनिवृत्तोऽहम् –क
५३–समुद्यतान् –क, समुद्यत –ग
५४–सद्धासम्पन्न –क
५५–परवादवापु –क
५६–वैराज्ञ –क
५७–परिमातु –क
५८–न सहेनाऽन्तरात्मना –क
५९–स्वामिकार्ये –ग
६०–विषं सं घोरं –क,ग
६१–समानिप्येद –क, समानन्येद –ग

सत्यं सत्यमिदं सत्यं सत्यमेव न संशयः। इत्युक्त्वा पश्यतां तेषां सर्वेषां कुलशेखरः[६२] ।।४०।।
कुम्भीनस[६३] –फणाव्याप्तं कुम्भान्तर्गतसंस्थितम् । गृहीत्वा स्वर्णघटिकां करेणोद्धृतवानभूत् ।।४१।।
कुर्वत्येवं महाराजे[६४] प्रत्ययं सर्वनिर्जराः। नभोगताः प्रशंसन्तो दृष्ट्वा तन्महदद्भुतम् ।।४२।।
विस्मयं परमं गत्वा पुष्पवर्षाण्य[६५] – मोचयन् । अनादयन्[६६] दुन्दुभींश्च[६७] ननृतुश्चाप्सरोगणाः[६८] ।।४३।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
अष्टादशोऽध्यायः ।।१८।।

———

६२–कुलशेषरः– क
६३–कुम्भे न सफलाव्यालं –क,
कुम्भे न सफणव्यालं –ग
६४–महाराज्ञे –क
६५–पुष्पवर्षान्यमोचयन –क
६६–ननादयन् –क
६७–दुंदुभिश्च –क, ग
६८–श्चाप्सरोगणैः– क

एकोनविंशो ऽध्यायः

श्रीनारायण उवाच

ततः समस्तामरसङ्घसेवितः
सर्वेश्वरः श्रीपतिरादिपूरुषः[१]।
श्रीरङ्गनाथः श्रितवत्सलः सदा
कारुण्यसिन्धुः कमलासनार्चितः ।।१।।
श्रीरामचन्द्राकृतिनाविरासीन्
नृपाग्रतः कोटिरविप्रकाशः।
तं जानकीनाथमनन्तवीर्यं
ददर्श राजा परमप्रहृष्टः ।।२।।
हरिन्म[२]–णिश्यामलकोमलाकृतिं
कृपासुधावार्धिमचिन्त्यवैभवम् ।
स्फुरत्कटिभ्राजितपीतवाससं
हस्तीन्द्रहस्तायतहस्तपङ्कजम् ।।३।।
राकाशरच्छुभ्रमयूख[३] – मण्डलं
प्रफुल्लराजीवविराजिताननम् ।
सम्फुल्लपत्राम्बुजपत्रविस्तृत[४]–
–श्रोत्रान्दीर्घाञ्चितलोललोचनम् ।।४।।
महार्हमाणिक्यकिरीटरोचिषा[५]
संसक्तनीलाञ्चितवक्रकुन्तलम् ।
पुष्पेषु वाणासनविभ्रमद्भुवं
चन्द्रार्कबिम्बाकृतिभालशोभितम् ।।५।।
बालेन्दुलेखा[६] – लसदूर्ध्वपुण्ड्रकं[७]–
चाम्पेयपुष्पोन्नतचारुनासिकम्[८]।

१–पुरुषः –क
२–हरिण्मणि –घ,
३–मयूष –क,ग
४–विस्तृतम् –क,घ
५–शोचिषा –ग
६–रेषा –क,ग
७–पुण्ड्रम –ग,घ
८–नाशिकम् –क

महाहनुं निःश्वसनाब्जगन्ध–
सम्मोदसंसेवितचञ्चरीकम् ।। ६।।

प्रवालबिम्बाधरमन्दसुन्दरं
स्मितस्फुरत्कुन्दसमद्विजावलिम् ।

सुदीर्घकर्णोज्ज्वलनक्रकुण्डल–
प्रभापरिद्योतितगण्डमण्डलम् ।।७।।

ह्रस्वत्रिरेखायुतकम्बुकन्धरं
पीनोन्नतांसं विनिगूढजत्रुकम् ।

श्रीमल्लसत्कौस्तुभहाररुग्[९]– लसद्–
विशालपीनोन्नतचारुवक्षसम् ।। ८।।

अनर्घ्यनानाविधरत्नसुप्रभा[१०] –
विद्योतबद्धोदर[११] – बन्धनाञ्चितम् ।

असङ्ख्यहेमाण्डनिकेतनोदर–
स्थिताब्जयोन्युद्भवनाभिपङ्कजम् ।। ९।।

सन्ध्याम्बुमुक्तसन्निभकाचनाम्बर–
प्रलम्बकाञ्चीविलसत्कटिस्थलम् ।

सुरापगा[१२] नैकतटापितापृथु –(?)
श्रोणिद्वयं सूक्ष्मसुमध्यशोभितम् ।।१०।।

पुष्पेषुलीलावनमध्यरम्भा–
स्तम्भद्वयो[१३] – दञ्चितसुन्दरोरुम् ।

रमाकराम्भोरुहरक्तकान्त्या–
रुणीकृतभ्राजितजानुजङ्घम् ।।११।।

मुक्तिप्रदाशेषजगच्छरण्यं
शरत्प्रफुल्लाम्बुजपादयुग्मम् ।

स्फुरन्मणिद्योतिकिरीटदीप्त्या
विराजिताशेषदिगन्तरालम् ।।१२।।

९–हारकं–क
१०–सुभ्र–क
११–बुद्धौरुहबुद्धनांचितम्–क, बुद्धोरुहवंद्धनांचितम्–क
१२–सुरायमानैकतराजितपृथु–क
१३–स्तम्भद्विरोद्वंचितु–क, स्तम्भद्विपोदंचित–ग

कोदण्डदण्डाग्रविलम्बवाम–

दोर्दण्डमन्येन गृहीतकाण्डम् ।

नानामणिश्रेष्ठलसत् [१४] –सुवर्ण–

तूणीर[१५]– युग्माञ्चितपृष्ठभागम् ।।१३।।

मणिज्वलत्कङ्कणनूपुरं [१६] च

चञ्चत्सुवर्णाङ्गदकङ्कणादिभिः ।

विभूषणैर्भूषितमप्रमेयं

श्रीवैजयन्त्या वनमालयोज्ज्वलम् ।।१४।।

कस्तूरिकाकुङ्कुमगन्धलेपितं

कन्दर्पकोट्या सुसमानसुन्दरम् ।

विद्युल्लताद्योतितगात्रसंयुतं [१७]

जगज्जनन्याखिलभूतसञ्चया [१८] । १५।।

संरक्षयन्त्या करुणावलोकनैर्

विदेहपुत्र्या ऽखिलविश्वरूपया [१९] ।

समाहितेनाग्रजदास्यभोगिना

सौमित्रिणा [२०] सेवितमन्वहं विभुम् ।।१६।।

दुग्धाब्धिफेन [२१] – च्छविरत्नदण्ड–

लसन्महं[२२] – च्चामरबीज्यमानम् ।।

पूर्णेन्दुसङ्काशसिता ऽऽ[२३] तपत्रं

ब्रह्मेन्द्ररुद्रैरनुसेव्यमानम् ।।१७।।

परात्परं सर्वजगच्छरीरिणम्

परे शमव्यक्तमनन्तमक्षरम्[२४] ।

विश्वस्य जन्मस्थितिसङ्क्षयादिकृद्–

भर्त्तारमाद्यं पुरुषोत्तमं परम् ।। १८।।

१४–ससन्सुवर्ण –क
१५–तूनीरयुग्मंचित –क
१६–नूपुरस्य –क,ग
१७–यायुतम् –क,ख,ग,घ
१८–संचयन् –क, संचयान् –घ
१९–खिलरूपया– क
२०–सौमित्रीणा –क
२१–फेणछवि –क
२२–महाचामर –ग,घ
२३–शंकाशशितातपत्र –क
२४–मक्षयम् –क

एवंविधं राघवमप्रमेयम्

दृष्ट्वा स राजा प्रणनाम मूर्ध्ना।

प्रहर्षवाष्पाकुललोचनः[२५] सन्

ददर्श[२६] चानन्दभरोर्ध्वरोमा।।१९।।

तं दृष्ट्वा रामचन्द्रोऽपि महाभागवतोत्तमम् । उत्थाप्य सम्परिष्वज्य प्राह वाक्यं कृपान्वितम् [२७]।।२०।।
कल्याणगुणसम्पन्न वैष्णवोत्तंस[२८] भूपते ! मत्तोऽधिकान् [२९] महाभाग मद्भक्तान् [३०] मन्यसे तथा[३१]।।२१।।
सन्तुष्टोऽहमनेनाद्य वृणीष्व[३२] वरमुत्तमम् । इति ब्रुवाणे श्रीरामे वाक्यमुत्तरमब्रवीत् ।।२२।।
नृपतिः प्राञ्जलिर्भूत्वा विनयेन समन्वितः। राम राजेन्द्र लोकाभिराम राजीवलोचन ।।२३।।
योगीन्द्रचित्तकमलद्युमणे कमलासख[३३] ! दिगन्त[३४] – विश्रुतौदार्य यशःस्तोम[३५]– निकेतन ।।२४।।
सर्वपापौघसंहारि [३६] – नामधेय[३७] कृपानिधे! ब्रह्मेशेन्द्रादिविनुत प्रणता [३८] – मरभूरुह ।।२५।।
नमो दाशरथे[३९] राम कौशल्यागर्भसम्भव! ताडकाचलदम्भोले[४०] कौशिकाध्वरपालक ।।२६।।
नमश्च[४१]ण्डीशकोदण्डखण्डशौण्ड महाभुज! धरित्री[४२]–पुत्रिकापाणि–ग्रहणोल्लासभासुर ।।२७।।
नमस्ते भार्गवा[४३]–नर्गलाभङ्गमदसंहर (?)! मार्त्तण्डान्वय[४४] राजीव दिनराज जितासुर ।।२८।।
दिगन्तविश्रुत त्यक्तगुरुराज्याभिषेचन * ! निषादपोषकाधीश वन्दिता[४५]–मरवन्दित ।।२९।।
नमस्तुभ्यं भरद्वाजमुनिसम्पूजिताजित! चित्रकूटविहारात्रि[४६]–मुनिसत्कारसत्कृत ।।३०।।
पदपङ्कजसञ्चारमण्डिता ऽखिलदण्डक! नमः खरादिक्रव्याद[४७] – शुष्कारण्यदवानल ।।३१।।
नमस्ते वरनाराच भिन्नमायाकुरङ्गक! तिर्यग्योनिजपक्षीन्द्रमोक्षदानविचक्षण ।।३२।।
शबरीसम्भृतफलभोक्ताऽमृतफलप्रद! नमस्ते बालिनिर्मूलबाणलीलाविलोकन ।।३३।।
बन्धुरग्रीवसुग्रीवराज्यानुग्रहविग्रह! नमो मुद्रार्चितकपिमुद्रिकाभद्रदायक ।।३४।।
शरणागतपौलस्त्यभरणा[४८]– भरणव्रत! पारावारपयोमध्य [४९]– सेतुकृते नमोनमः ।।३५।।
लङ्कालङ्कारहरण ! सङ्गरारङ्ग[५०]– क्षोभण ! सर्वराक्षससन्दाहदावाग्निशमनाम्बुद ।।३६।।
कुम्भकर्णमदोद्ग्र[५१]–दोर्दण्ड[५२]– च्छेदकेसरिन्! भजना[५३]– खण्डलभुजप्रचण्ड[५४] –प्रभभञ्जन(?) ।।३७।।
दशकन्धरपंचास्यसंहार[५५]– केशरि प्रभो! नमो ब्रह्मरुद्रेन्द्रप्रमुखामरसन्नुत[५६] ।।३८।।

२५–लोचन सं –क
२६–सदर्श–क
२७–कृपानिधिम्–क
२८–वैष्णवोत्तम –क
२९–धिके –क
३०–मद्भुतसत्तममनोरथा–क,
३१–यथा –घ
३२–वृणिष्व– क
३३–कमलाशखः–क
३४–दिगन्तविश्रुतौदार्य–क,
दिगन्ताविश्रुतौदार्य– ग
३५–यशस्सोमनिकेतन–क, ग
३६–संहार –क, ग
३७–नामध्येय–क, घ,
३८–प्रणनामरभूरुह– क
३९–दासरथे –क
४०–ताटकाचलविध्वंस –क
४१–नमस्ते चण्डकोदण्ड –ग
४२– धरित्रि–ग, घ,
४३–भार्गवानार्गला –क
४४–मार्त्ताण्डन्वयराज–रासुर –क
*–गुरुराज्याभिषेचेन
वेकयीत्यक्तराजक–ग
४५–विदितामरवन्दित–क,
४६–विहाराद्रि–ग, घ
४७–रवरादिदेवारिड–क,
४८–सरणाभरणव्रत –क,
भरणाभरणाव्रत –ग
४९–मयोमध्य –क, पयोमध्ये –ग
५०–रंगक्षोभन –क, रंगजृम्भण –घ
५१–समनांबुद –क
५२–मदोददण्ड –ग
५३–वदनछेद –क
५४–भंजिताखण्डल –घ
५५–प्रचंदप्रभुभंजनः– क,
प्रचण्डप्रभुभंजन –घ
५६–संहारकरणेप्रभो –क,
संहारशरभप्रभो –ग
५७–संयुत–क

विभीषणाभिषेकश्रीसम्भृतानन्दगुम्फित! वामाङ्कविलसत्सीतारमणारूढपुष्पक ।।३९।।
साकेतस्थजनस्यांब्जतरुणार्क नमो नमः । दिव्यसिंहासनारूढ सर्वलोकेश्वरेश्वर ।।४०।।
सहोदरधृतच्छत्रचामरादिपरिच्छद ! सर्वराजन्य[५८]– सञ्जुष्टमहासाम्राज्यवैभव ।।४१।।
नमस्ते जानकीनाथ नमस्ते भक्त[५९]–वत्सल! नमस्ते करुणासिन्धो रामचन्द्र नमोऽस्तु ते ।।४२।।
वेदानां देवतानां च मृग्यस्त्वं[६०] रघुनन्दन! क्षुद्रस्य नरमात्रस्य प्रत्यक्षोऽभून्ममाधुना ।।४३।।
कृतार्थोऽस्मि रघुश्रेष्ठ पाहि–मां भरताग्रज! इत्युक्त्वा वसुधा[६१]–धीशस्तत्प्रसादवशात्[६२] तदा ।।४४।।
प्रबन्धमकरोद् दिव्यं वेदमूर्धार्थ[६३]–सङ्ग्रहम् । तं समर्प्य[६४] स रामाय तमुवाच कृताञ्जलिः ।।४५।।
वृणीष्वेति वरं देवो ब्रवीषि करुणाकरः[६५]। किं प्रार्थयेऽहं देवेश सर्वमेवाददाः[६६] पुरा ।।४६।।
त्वद्भक्तेषु च सद्भक्तिं त्वयि भक्तिं च देहि मे। नान्यं वृणोमि सर्वेश एतदेव[६७] हि मे वरम्[६८] ।।४७।।
एवमुक्ते नृपवरे सन्तुष्टहृदयो हरिः। वरं तथैव दत्वाऽथ पुनः प्रोवाच विस्मितः ।।४८।।
नीलां[६९] –शजातां त्वत्पुत्रीं देहि मे नरनायक! भवानि[७०] तेऽहं जामाता श्वसुरस्त्वं भवस्व मे ।।४९।।
तच्छ्रुत्वा रङ्गनाथस्य वाक्यं नृपशिखामणिः[७१]। धन्योऽस्म्यहं कुलं जन्म पवित्रं च मम प्रभो ।।५०।।
इत्युक्त्वा स पुरीं रम्यां कृत्वाऽलङ्कारसंयुताम् । भूषणैर्भूषयित्वाऽथ कन्यां परमशोभनाम्[७२] ।।५१।।
वेदीं[७३] कृत्वा सभामध्ये हुत्वाऽग्निं स यथा–विधि। श्रीरङ्गपुरनाथाय विधी[७४] – शेन्द्रमुखामरैः ।।५२।।
सेविताय ददौ राजा कन्यां तां विधिपूर्वकम् । सोऽपि प्रगृह्य तां कन्यां राजपुत्रीं मनोहराम् ।।५३।।
राज्ञा सम्पूजितः सर्वैरन[७५]–घ्यैर्वस्तुभिः शुभैः। देवैः सह पुनः प्राप[७६] स्वधाम परमं हरिः[७७]।।५४।।
ततो नृपस्य सचिवा विस्मयाविष्टचेतसः। प्रभावं तस्य विज्ञाय गृहीत्वा भूषणान्यपि ।।५५।।
निक्षिप्य पुरतस्तस्य भूषणानि भयान्विताः। राजानं प्रणिपत्याऽथ[७८] स्वापराधं निवेद्य च ।।५६।।
ययाचिरेऽभयं तेभ्यः स राजाऽप्यभयं ददौ। ततः स्वपुत्रमनघं गुणवन्तं महाबलम् ।।५७।।
राज्ये निक्षिप्य सततं तस्थौ वैष्णवसेवया। ततो नराधिपः श्रीमद्रामायणपरायणः ।।५८।।
तथा रामकथाः शृण्वन् राघवस्य महात्मनः। सुख[७९]– चर्यासु हृष्टः सन् दुःखचर्चासु[८०] दुःखितः ।।५९।।
रामे प्रेमाभिवृद्ध्याऽसौ भूत्वा परवशं[८१] स्थितः। एवंविधं तं राजानं दृष्ट्वा पौराणिकः सदा ।।६०।।
एष[८२]सीतापहरणं सहते नेति चिन्तयन् । मायासीतां जहारेति कथयत्रास्ते[८३] वैष्णवः ।।६१।।
तत कदाचित् तद्विवप्रे[८४] ग्रामान्तरमुपागते। तत्पुत्रः कथयामास रामायणमनुत्तमम् ।।६२।।

५८–सर्वराज्यस्य–क,
५९–नतवत्सल–ग,घ,
६०–मृग्यस्तं–क,
६१–इत्युक्त्वायोध्यायाधीशः–क,
६२–वसान्–ग,
६३–वेदवेदार्थसंग्रहम्–ग,
६४–समर्थ–क,
६५–करुणाकर–घ,
६६–सर्वमेवाददः–क,
६७–एष एव –घ
६८–वरः–घ,
६९–नीलांशजलां–क, लीलांशजाताम्–क,घ,
७०–भवामि–ग,घ,
७१–सिषामणिः–क,
७२–शोभनीम्–क,
७३–देवीं–क,
७४–विधिसेन्द्रमुखामरैः–क,
विदिशेन्द्रमुखामरैः–घ,
७५–रनघैर–क,
७६–प्राथ–क, प्राप्य–घ,
७७–हरेः–क,
७८–प्रतिपत्याथ–क,
७९–सुषचर्यासुपृहृष्टस्सं–क, सुखचर्यानुहृष्टः–ग,घ
८०–सुहृद्भुवि–क,
८१–परवसस्थितः–क, परवशःस्थितः–घ
८२–एवम्–ग,
८३–कथयामास–क, कथयन्नास–ग,
८४–तद्विवप्र–क,

अनुक्तत्वात्सदा तेन न जानन्नृपतेर्मनः। सीतापहरणं तस्मै यथावृत्तं शशंस[८५] सः ।।६३।।
राजवर्योऽपि तच्छ्रुत्वा भक्तिसम्पूर्णमानसः। प्रत्यक्षमिव विज्ञाय दुःख[८६]– क्रोधसमाकुलः ।।६४।।
कथं हरति दुष्टात्मा जननीं जानकीं मम। शिरांसि[८७] पातयिष्यामि खड्गेनाद्यैव रक्षसः[८८] ।।६६।।
इत्युक्त्वा खड्गमादाय रवे[८९] – स्तुरगसन्निभम् । तुरङ्ग[९०]–श्रेष्ठमारुह्य लङ्कामभिमुखो[९१] ययौ ।।६७।।
तं दृष्ट्वा देवताः सर्वा[९२] विस्मयाविष्टमानसाः। मुमुचुः पुष्पवर्षाणि तुष्टुवुः[९३] कुलशेखरम् [९४] ।।६८।।
सीताहरणदुःखेन क्रोधेन कलुषीकृते[९५] । वायुवेगेन महता लङ्कां गच्छति राजनि ।।६८।।
तदा रघूणां प्रवरो रामो राजीवलोचनः। सीतालक्ष्मणसंयुक्तः पुष्प[९६] –केण विराजितः ।।६९।।
तस्य भक्त्या सुसंहृष्टस्तं समागम्य सादरम् । भुजाभ्यां पीनवृत्ताभ्यां परिष्वज्येदमब्रवीत् ।।७०।।
कुलशेखर योगीन्द्र मम प्रिय महायशाः[९७]! हत्वा राक्षस[९८] –राजेन्द्रमादाय जनकात्मजाम् ।।७१।।
अधुना ह्यागतो[९९] राजन् त्वं तु स्वस्थमना भव * ।इत्युक्त्वा रामचन्द्रोऽपि भक्तियन्त्रितमानसः ** ।।७२।।
अप्राकृतजनाकीर्णं[१००] योगिनामपि दुर्लभम्[१] । कुलशेखर[२] –मादाय जगाम परमं पदम् ।।७३।।

चरित्रमेतत्कुलशेखरस्य महानुभावस्य[३] हरिप्रियस्य ।
शृणोति नित्यं पठते लिखेद्[४] यो लभेत्[५] सुखं सोऽत्र[६] परत्र चैव।।७४।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
एकोनविंशो ऽध्यायः ।।१९।।

———

८५–सशंश–क,
८६–दुःक्रोधस–क,
८७–शिरांशि–ग,
८८–राक्षसाम्–क,
८९–तेजस्तुरगसन्निभम्–क,
९०–तुरगंछ्रेष्ठं–क,
९१–लङ्कामभिमुखम्–क
९२–सर्वे–ग,घ,
९३–तुष्टाव–क,
९४–कूलशेषरः–क,
९५–कलुखीकृते–क,
९६–पुष्पकेन–क,ग,
९७–महायशः–घ
९८–राक्षराजेन्द्र–क,
९९–आगतो–ग,
*–इयं पङ्क्तिः–क मातृकायां नोपलभ्यते।
अस्याः स्थाने– घ मातृकायां लिखितमिदमुपलभ्यते–
समागतो मा शुचस्तमिति रामेण सान्त्वितः–घ
**–पडिक्तरियं क – मातृकायां न प्राप्यते। घ–
मातृकायामस्याः स्थाने लिखितमिदमुपलभ्यते–
सीतारामपदाम्भोजःसक्तस्तत्पदमन्वगात्–घ
१००–जनाकीर्णे–क,
१–दुर्लभे– क,
२–कुलशेषर–क,
३–नुभावस्स–क,
४–लिषेद्–क,
५–लभते–क,
६–सोत्रयतत्त्ववित्–क,

विंशोऽध्यायः

श्रीनारायण उवाच

नर शृणुष्व वक्ष्येऽहं रक्षार्थं सर्वदेहिनाम् । धरायामवतीर्णायां लक्ष्मीचरितमुत्तमम् ।।१।।
लक्ष्मीः सर्वेश्वरी पद्मा कल्याणगुणशालिनी। कृपामयी[1] जगन्माता विष्णुवक्षःस्थलालया ।।२।।
संसाराम्बुधिनिमग्नान् जीवानालोक्य दुःखितान् । उद्धर्तुकामा तान् सर्वान् कृपया[2] परया[3] शुभा[4] ।।३।।
हेमापगातटे रम्ये सुधाम्बुपरिपूरिते। पद्माकरे प्रफुल्लाब्जवनराजि[5] –विराजिते ।।४।।
हंससारससङ्कीर्णे चक्रवाकोपशोभिते। पुष्परेणुपरिच्छन्ने[6] मृगराजनिनादिते* ।।५।।
कस्मिंश्चित्काञ्चनाम्भोजे फाल्गुने[7] मासि शोभिते[8] ** । उत्तरर्क्षे समुत्पन्ना सर्वलोकैकसेविता ।।६।।
चतुर्भुजा सुन्दराङ्गी पूर्णेन्दुसदृशानना।पद्मपत्रविशालाक्षी पीतकौशेयशोभिता ।।७।।
करयुग्मधृतोत्फुल्लरक्तपद्मयुगाञ्चिता। हिरण्यवर्णा हरिणी विद्युत्सङ्घसमप्रभा ।।८।।
तनुमध्या[9] पृथुश्रोणिः[10] पद्मपादतलाञ्चिता । सुभ्रूः सुनासा बिम्बोष्ठी नीलकुञ्चित[11] – मूर्द्धजा ।।९।।
कम्बुकण्ठी निम्ननाभिः पीनोन्नतकुचद्वया। पद्मासने समासीना पद्ममालाविराजिता ।।१०।।
किरीट[12] –हारकेयूरकङ्कणाङ्गदभासुरा। तरुणार्कप्रकाशाभ्यां[13] कुण्डलाभ्यां विराजिता ।।११।।
दिव्यचन्दनलिप्ताङ्गी दिव्यस्रग्गन्धशोभिता। तदा ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।।१२।।
गन्धर्वाश्चाप्सरःसङ्घाः समागत्य मुदान्विताः। पुष्पवर्षं ववर्षुश्च प्रणेदुर्दुन्दुभींस्तदा ।।१३।।
प्रणेमु[14] –र्दण्डवद्भूमौ स्तुवन्तो विविधैः स्तवैः। ततो ब्रह्मा जगद्धात्री[15] लक्ष्मीं तां लोकमातरम् ।।१४।।
स्तोत्रयामास सद्भक्त्या धृत्वा[16] करपुटाञ्जलिम् । नमो नमस्ते श्रीदेवी सर्वलोकेश्वरेश्वरी ।।१५।।
लोकमात्रे नमस्तुभ्यं सर्वलोकनियन्त्रिणि[17] ! नमो विश्वशरीरिण्यै विश्वरक्षणकारिणि[18] ।।१६।।
नमस्ते विश्वनयने नमस्ते विश्वतो मुखि ! विश्वपादे नमस्तुभ्यं नमस्ते शतबाहवे ।।१७।।
सहस्र[19] –शीर्षे देवेशि[20] सहस्राक्षि[21] नमो नमः। सहस्राङ्घ्रि नमस्तुभ्यं सहस्रकरपल्लवे ।।१८।।
हिरण्य[22] –वर्णे हरिणि[23] सुवर्णरजतस्रजे ! चन्द्रे हिरण्मये लक्ष्मि[24] सर्वसम्पत्प्रदे शुभे ।।१९।।

१–कृपासया–क,
२–दयया–क,
३–वरया– क,
४–सुभा–क,
५–वनराजी–क, ग, घ,
६–परिच्छन्न– क
*–ग, घ मातृकयोरियं पङ्क्तिर्न प्राप्यते।
७–फाल्गुणे–क,
८–सोभिते–क,
**–ग, घ मातृकयोरियं पङ्क्तिर् न प्राप्यते।
९–तनुमध्य–ग,
१०–पृथुश्रोणि– क, पृथु श्रोणी–ग,घ,
११–कुन्तल–ग, घ,
१२–किरीटि–क,
१३–प्रकासाभ्यां–क,!
–पुष्पवर्षाणि वर्षन्तो दुंदुभिस्ताडितैस्तदा–क,
पुष्पवर्षं ततो वर्षुः प्रणेदुर्दुन्दुभिस्तदा–ग
१४–प्रणम्य–क,
१५–जगदधाता–क
१६–धृता–क,
१७–नियन्त्रिणी–क नियन्त्रणे–घ,
१८–कारिणे–क,
१९–सहस्रीर्षे–क,
२०–देवीश–क,
२१–सहस्राक्षी–ग,घ
२२–हिरण्यवर्णा–ग,
२३–हरिणी–क,ग,
२४–लक्ष्मीः– ग, क,

कटाक्षवीक्षणैर्देवि [२५] जगन्त्यैतान्यनेकशः। उत्पद्यन्ते प्रवर्त्तन्ते प्राप्नुवन्ति परं सुखम् ।।२०।।
विष्णुवक्षःस्थला [२६]-वासे त्वद्विलासार्थमच्युतः। जनयत्यखिलांल्लोकान् पाति [२७] सम्प्रेरितस्त्वया ।।२१।।
त्वन्नेत्रोदञ्चि [२८]-दन्यञ्चिताभ्यां लोकाधिपाः स्वयम् । अथवाप्यपरे[२९] केचिदासन् तिर्यङ्नरादयः[३०] ।।२२।।
गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्[३१] करीषिणीम् । ईश्वरीं सर्वभूतानां विष्णोर्नित्याऽनपायिनीम् ।।२३।।
त्वामेवोपास्य सततं सर्वलोकनिवासिनः[३२]। धनमश्वांश्च गाश्चैव मातङ्गांश्च मदोत्कटान् ।।२४।।
कौशेयानि च वस्त्राणि रत्नानि विविधानि च। भूमिं च पुत्रपौत्रांश्च शास्त्राणि निगमानि च ।।२५।।
ज्ञानं च परमं लोके विष्णोःस्थानं च शाश्वतम् [३३]। सम्प्राप्नुवन्ति जनने कल्याणगुणसागरे ।।२६।।
सर्वलोकशरण्ये[३४] त्वां ये जनाः शरणागताः। ते प्राप्नुवन्ति परमं पदं शाश्वतमव्ययम् ।।२७।।
त्वमेव वाणी शर्वाणी[३५] शची[३६] स्वाहा स्वधा तथा। संहारिणी समुदया भार्गवी च सरस्वती[३७] ।।२८।।
रुद्राणी सर्वसम्पत्तिस्त्वमेव कमलेक्षणे ! रोहिणी च तथा सञ्ज्ञा प्रभा[३८] च शशिसूर्ययोः ।।२९।।
त्वमेव सर्वलोकेऽस्मिन् त्वदन्यत्रास्ति[३९] किञ्चन। त्वमेव चिदचिद्वस्तु दृश्यते श्रूयते हि यत् [४०] ।।३०।।
तत्सर्वं सर्वतो वृत्वा ह्यत्यतिष्ठद्दशाङ्गुलम् । यानि यानीह रूपाणि विभर्त्ति जगतां पतिः ।।३१।।
तेषां सदृशरूपाणि धृत्वा[४१] त्वं कमलेक्षणे ! आनन्दयसि[४२] गोविन्दं तुल्य [४३]-शीलवयोगुणैः ।।३२।।
प्रभा पञ्च [४४] -स्वरूपेषु त्वं[४५] हि पञ्चस्वरूपिणी। भूत्वा रमयसे देवं तत्कार्यसहकारिणी ।।३३।।
सर्वचेतनरक्षार्थमवतीर्णा[४६]ऽसि भूतले। रङ्गेशस्य प्रिये देवि[४७] रक्षार्थं[४८] सर्वदेहिनाम् ।।३४।।
अवतीर्णाऽसि जनने ![४९] वात्सल्यगुणसागरे ! एतदारभ्य लोकेऽस्मिन् त्वत्कृपासागरोद्भवैः ।।३५।।
तरङ्गैः प्लाविता जीवा जगतामादिदम्पती। उपासन्तो युवां शेषभावेनाऽखिलशेषिणौ [५०] ।।३६।।
भवबन्धविनिर्मुक्ताः प्राप्स्यन्ते परमं पदम्। करुणावीक्षणैरेवं[५१] भक्तं मामवलोकय[५२] ।।३७।।
त्वं[५३] पद्मिनी त्रिदशवन्दित[५४] -पादपद्मा
पद्मासना भगवती धृतहस्तपद्मा।
श्रीविष्णुपत्नि ! जगतां[५५] जननीं सुरश्रीः[५६]
त्वां मातरं शरणमब्जमुखीं प्रपद्ये।। ३८।।

२५–देवी–क, ग,
२६–वक्षःस्थले वासे–क,
२७–पति–घ
२८–त्वन्नेत्रोहं–क,
२९–अथवा मापरे–क, अथवा अपरे–ग,
३०–तिर्यङ्नकादयः –क,
३१–पुष्टीं–ग,
३२–निवासिनी–क
३३–शोभितम् –क,
३४–सरण्ये–क,
३५–सर्वाणी–क, ग,
३६–सची–क,
३७–शिवा मता–ग, घ,
३८–प्रभाव–क
३९–त्वदन्यं–क, ग,
४०–यतः–ग,
४१–धृता–क,
४२–अनादयसि–क,
४३–तुल्यशीलवयोगुणाः–घ,
४४–प्रभावं च स्वरूपेषु–क,
४५–त्वया–क, पंच–घ,
४६–मवतीर्ण स–क,
४७–देवी–क,
४८–रक्षार्थे–क,
४९–जननी–क, ग, घ
५०–शोषिणैः–क,
५१–रद्भि–क,
५२–मामवलोकयन् –क,
५३–त्वम् –ग,
५४–विदित–क,
५५–जगतां स्वरी–क, जगतामधीश्वरीं–ग,
५६–तामान्वहं श्रीशरणमुपागमत् –क,
श्रीस्त्वामहं शरणमब्जमुखीं प्रपद्ये–ग

एवं स्तुत्वा श्रियं देवीं प्रणम्य प्रीतमानसः। अनुज्ञां स तया प्राप्य रङ्गक्षेत्रमुपागमत् (*) ।।३९।।
श्रीरङ्गशायिनं दृष्ट्वा स्वकीयतपसः फलम् । प्रणम्य स्तुतिभिः स्तुत्वा पूजयित्वा यथाविधि ।।४०।।
विज्ञापयामास तदा श्रियो जन्म पितामहः। तत्काले पाण्ड्यधरणीनाथो राजर्षिसत्तमः[५७] ।।४१।।
रङ्गनाथस्य सेवार्थं गच्छन् पद्माकरं महत् । दृष्ट्वा सविस्मयो राजा रूपलावण्यकान्तिभिः ।।४२।।
श्रियं बुद्ध्वा[५८] प्रणम्याथ स्तुत्वा स्तोत्रैरनुत्तमैः। सर्वोपचारैस्तां देवीं पूजयित्वा यथाविधि ।।४३।।
काञ्चनं यानमारोप्य गृहं निन्ये नराधिपः। स तस्याः पद्मिनी नाम कृत्वा पद्मनिभेक्षणाम् [५९] ।।४४।।
प्रहृष्टः प्रणयात् [६०] प्रीत्या पुपोष सह भार्यया। ततः कालेन सा तन्वी यौवनं समुपस्थिता ।।४५।।
श्रीरङ्गनाथं रमणं कामयामास पद्मिनी। तमेव नित्यं ध्यायन्ती कीर्त्तयन्ती च तद्गुणान् ।।४६।।
वदन्ती[६१] तत्कथाः पुण्याः स्वसखिभ्यो निरन्तरम् । तमेव पूजयन्ती सा तच्चित्ता तत्परायणा ।।४७।।
स्थातव्यमेवं जीवेन दर्शयन्तीति भूतले। तस्थौ च तस्य[६२] भावेन तन्मयी[६३] कृतमानसा ।।४८।।
तदा श्रीरङ्गनाथोऽपि समारुह्य खगेश्वरम् । ब्रह्मणा सह देवेशो देवैश्च मुनिभिः सह ।।४९।।
अनन्तविष्वक्सेनाद्यैः कासाराद्यैश्च योगिभिः। लक्ष्मीं वरयितुं क्षिप्रं जगाम निचुलां पुरीम् ।।५०।।
तदा[६४] पाण्ड्यधराधीशः प्रत्युद्गम्य[६५] जगत्पतिम् । वेद्या [६६]–मग्निं समाधाय हुत्वा होमं यथाविधि ।।५१।।
पद्मिनीं पद्मपत्राक्षीं सर्वाभरणभूषिताम् । तस्मै[६७] श्रीरङ्गनाथाय प्रददावग्नि [६८] –सन्निधौ ।।५२।।
ततः श्रीरङ्गपृथ्वीशः श्रियमादाय पूजितः। तमनुज्ञाप्य राजानं देवैर्ब्रह्मपुरोगमैः ।।५३।।
श्रीरङ्गं समनुप्राप्य[६९] सौधे वेदमये शुभे। रराम स तया सार्धं [७०] – मीश्वर्या जगदीश्वरः ।।५४।।
सा लक्ष्मीर्जगतां माता सर्वजीव–दयापरा। रङ्गेशं प्राप्य भर्त्तारं चेतनान्भुवि संस्थितान् ।।५५।।
सान्द्रै[७१] –रालोकयामास कटाक्षैरमृतप्रदैः। तदा प्रभृति लोकेऽस्मिन् जीवाः सर्वे समाहिताः ।।५६।।
श्रित्वा [७२] कासारभूता[७३] –दीनुपासन्तः श्रियः पतिम् । महता न्यासयोगेन प्रयान्ति परमं पदम् ।।५७।।
महिष्या रङ्गनाथस्य पद्मिन्याः सत्कथामिमाम् । पठेद् यः शृणुयाद् भक्त्या लिखेद् वा तस्य सद्मनि ।।५८।।
कुलत्रयं[७४] भगवती[७५] श्री[७६] स्तिष्ठत्यनपायिनी ।। ५९।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
विंशोऽध्यायः।। २०।।

(*)–अयं श्लोकः –क मातृकायां नोपलभ्यते।
५७–सत्तमम् –क,
५८–बुध्या–घ,
५९–पद्मनिभेक्षणी–क, पद्मनिभेक्षणम् –घ,
६०–प्रणयप्रीत्या–ग, घ,
६१–वदन्ति–क
६२–तत्स्थापनस्य भावेन–क, तस्यानुभावेन–ग,
६३–तन्माया–क, तन्मया–ग,
६४–तथा–क,
६५–प्रत्युत्थाय–क
६६–वेद्यमग्नि–क,
६७–कृत्वा–क,
६८–प्रददावाग्नि–क,
६९–सौचे–ग,
७०– साद्धमीश्वर्या– ग, घ,
७१–सांद्रासा–क
७२–श्रुत्वा–क,
७३–भूतादिनुपासन्तः– क,
७४–कुलवयं–ग,
७५–भवेद्यावद् –घ,
७६–ह्रीस्तिष्ठ–क, श्रीस्तिष्ठेदनपायिनी–घ,

एकविंशो ऽध्यायः

श्रीनर उवाच

नारायण नमस्तुभ्यं जगत्तारणकारण ! त्वत्तो मया श्रुता[१] पुण्या कुलशेखर [२] –सत्कथा ।।१।।
पद्मिन्याश्च कथा दिव्या[३] सर्वपापहरा शुभा। ये ये भुव्यवतीर्णास्तान् नारायणपरायणान् ।।२।।
योगिनः कथयस्व त्वं भगवत्पाददायकान् ।

श्रीनारायण उवाच

मरुद्वृध्यास्तटे[४] रम्ये दक्षिणे निचुलापुरी।।।३।।
सर्वसम्पत्समापन्ना रम्योद्यानशतै[५]–वृता। तस्याः[६] समीपे कावेरीतटे परमपावने ।।४।।
अजायता[७] ऽमृतश्रीशः श्रीवत्सांशः शुभे दिने। रोहिण्यां[८] कार्त्तिके मासे[९] वैष्णवाम्भोधिचन्द्रमाः ।।५।।
जन्मप्रभृति रङ्गेशपदध्यानामृतं पिबन् । अन्वहं वर्द्धमानाङ्गो रोधनो[१०] धनवर्जितः [११] ।।६।।
देहात्मनो[१२]र्विभिन्नत्वं शेषत्वं शेषशायिनः। पश्यन्नध्यात्मधिषणो वैकुण्ठकृत [१३] –लक्षणः।।७।।
रङ्गक्षेत्रं हरेर्मूर्त्तिरिति विज्ञाय चेतसा। तत्क्षेत्रमभि[१४]विश्या ऽथ कावेर्यामवगाहयन् ।।८।।
तद्दक्षिणतटे रम्ये श्रीरङ्गाभिमुखः[१५] स्थितः। भगवच्चरणाम्भोजं हृदयाम्बुजमध्यमे [१६] ।।९।।
ध्यायन् सङ्कीर्त्तयन् नित्यं प्रणमन् [१७] प्रेमसंयुतः। हरेरनन्तकल्याणगुणानानन्दान् सुधीः [१८] ।।१०।।
अहोरात्रं गायमानो वीणामादाय पाणिना। दिव्यगान्धर्व[१९]–गानेन चिरं तस्थौ स गायकः * ।।११।।
तद्गानं[२०] मधुरं श्रुत्वा कावेरी[२१] स्तम्भितोदका[२२]। द्रवीकृताः[२३] शिलाश्चासन् पादपाश्च मधुस्रवाः [२४] ।।१२।।
पशवः पक्षिणश्चैव निराहारा[२५] – स्तदुन्मुखाः। ययुस्तन्मयतां सर्वे भगवद्गानवैभवात् ।।१३।।

कृतत्रेतादापरेषु ध्यानयज्ञार्चनादिभिः। यत्फलं लभते मर्त्यस्तल्लभेत्कीर्त्तनात्कलौ ।।१४।।
अनुस्मरन्त्रे[२६]–तदर्थं सदाऽभूत्कीर्त्तने रतः। तद्गीतं मधुरं दिव्यं सर्वसम्पन्नमद्भुतम् ।।१५।।

१–श्रुतो–क,
२–कौशलेश्वर–क,
३–दित्या–क,
४–मरुद्वृधात्प्रो–क, मरुद्वृधा रमातीर्थे–घ,
५–सतै–क,
६–तस्यां–क, ग,
७–आजयत भृतः–क,
८–रोहिणी–क,
९–मासि–क,
१०–रोटनो–ग
११–टनवर्जितः–ग,
१२–देहात्मनो सविभिन्नत्वं–क,
१३–वैकुण्ठाङ्कितलक्षणः –क,
१४–तत्क्षेत्रं प्रविश्याथ–क, तत्क्षेत्रमपिविश्याथ–ग,
१५–श्रीरङ्गाभिमुखे–क,
१६–मध्यग–घ,
१७–प्रणमेत् –क, ग,
१८–शुधीः–क
१९–गन्धर्व–क,
*–एतदनन्तरं –क मातृकायां पङ्क्तिरियमुपलभ्यते – "हरेरनन्तकल्याणगुणानां गुणनं कृतः" –क
२०–तद्गुणम् –क,
२१–कावेरि –क,
२२–स्यम्भितोदका–ग,
२३–द्रवीकृतशिलाश्चासन् –क, ग,
२४–मधुव्रताः–क, मधुश्रवाः– ग, घ
२५–निराहारस्य दुन्दुखाः –क,
२६–अनुसन्ने तदर्थं–क

श्रुत्वा श्रीरङ्गपृथ्वीशो हर्षाश्रुव्याकुलेक्षणः। रमामुखमवेक्ष्याऽऽह वाक्यमाश्रितवत्सलः[*] ।।१६।।
शृणु प्रिये मत्प्रियस्य गानं श्रोत्रमनोहरम् । सुधारसोत्सुकं भद्रे करोति मम सुन्दरि[**] ।।१७।।
तस्मिन् काले महापुण्ये रङ्गराजस्य सेवकाः। तत्रैवा[२७] –गताः शान्ता [२८] जलाहरणकारणात् [२९]+ ।।१८।।
तं दृष्ट्वा तन्मयं प्राप्ता गायन्त[३०] गायकोत्तमम् । क्वासि[३१] त्वमिति वाक्येन प्राहुस्तत्र[३२] मुहुर्मुहुः[(+)] ।।१९।।

सोऽपि श्रीश[३३]– गुणास्वादलग्नचित्तः सदा स्थितः।

तान् [३४] पृच्छतो [३५] न जानाति पृच्छन्तं वा न वा यदि[(X)] ।।२०।।
क्रोधेनाविष्टहृदया [३६] –स्ताडयन्तो मुहुर्मुहुः। वाक्यैः[३७] कङ्कजलै [३८] –श्चैव पङ्कै श्चैव[३९] पुनः पुनः[(!)] ।।२१।।
एते[४०] भागवताः शुद्धा भगवत्पादसेवकाः। एतेषामवमानं[४१] हि कृतं मे पापकर्मणा[४२] [(!!)] ।।२२।।
इति स्मृत्वा[४३] पलायन्त[४४] रुदन्तश्च[४५] मुहुर्मुहुः। पापोऽहं पापकर्माऽहं भगवद्भक्तहेलनात्[(!!!)] ।।२३।।

नास्ति मत्तो[४६] ऽधिको लोके पापकर्मेति चिन्तयन् ।

पादपस्यै [४७] – कच्छायायां स्थितवान् [४८] पापतो[४९] भितः [0] ।।२४।।
तस्मिन्नेव हि काले च रङ्गदेहमुपागताः। तस्य पङ्कादयः सर्वे श्रीश[५०] आह श्रियं प्रति [(ळ)] ।।२५।।
कोपेनारक्तनयनो शोकाविष्ट[५१]–मना हरिः[*] । एतादृशस्य[५२] भक्तस्य [५३] मत्प्रियस्य मम[५४] प्रिये।।२६।।
दत्वा[५५] चात्यन्तिकं दुःखं तद्दुःखं[५६] मां हि बाधते[५७]। तदाकर्ण्य हरेर्वाक्यं कमला कमलेक्षणम् [५८] ।।२७।।
भक्तेषु पुत्रवात्सल्याज्जगादैवं कृताञ्जलिः। देव तावक[५९] – पादाब्जभक्तं त्वत्प्रियगायकम् ।।२८।।
कथं बहिः स्थापयसि निकटस्थं कुरु प्रभो ! इत्युक्तवत्यां पद्मायां पद्मनाभः प्रहर्षितः ।।२९।।
लोकसारङ्गविख्यातं तीर्थाहरणकारकम् [६०]। आहूय[६१] ज्ञापयामास कावेरीतटसंस्थितम् ।।३०।।
स्कन्धाधिरूढं [६२] तं कृत्वा मद्भक्तगायकोत्तमम् । मत्प्राणभूतं योगीन्द्रं स्वयमेवाऽऽनयस्व ह ।।३१।।

(*)–क मातृकायां श्लोकोऽयं नोपलभ्यते।
(**)–क–मातृकायां श्लोकोऽयं नोपलभ्यते।
२७–तथैव आगताः–ग,
२८–संता–क, २९–कारणम् –क,
+–घ–मातृकायां श्लोकोऽयं न प्राप्यते।
३०–गायन्तो–ग, ३१–क्वासी –क,
३२–प्रछन्तस्ते–क
(+)–श्लोकोऽयं –घ–मातृकायां न प्राप्यते।
३३–श्रीस–क, ३४–तम् –क,
३५–प्रछन्त न जानन्त–क, पृछंतान्न जानाति–ग,
(X)–श्लोकोऽयं ५–घ–मातृकायां न प्राप्यते।
३६–हृदयास्ते ताडयन्ता–क,
३७–वाक्य–ग,
३८–कंकरजलै–क,
३९–कम्पैश्चैव–क,(!)–श्लोकोऽयं घ मातृकायां नोपलभ्यते।
४०–महाभागवता–क,
४१–तेषामवमानात्पतकृतोऽहं–क
४२–पापकर्मणः–क,
(!!)–अयं श्लोकः घ मातृकायां नास्ति,
४३–स्मृत–क, ४४–पलायन्ते–क,
४५–रुदंसंश्च–ग,
(!!!)–श्लोकोऽयं घ मातृकायां न प्राप्यते,
४६–मत्तोऽधिको–क, ४७–पादपसेकछायायां–क,
४८–स्थित–क, ४९–व्याकुलेक्षणाः–क,
()–अयं श्लोकः घ मातृकायां नोपलभ्यते,
५०–श्रीसमाह–क,(ळ)–घ मातृकायां श्लोकोऽयं न प्राप्यते।
५१–शोकाविष्टमनो–क,ग,
*–इयं पङक्तिः घ मातृकायां नोपलभ्यते। क – मातृकायामेतदनन्तरं पूर्वसम्पादिता इमे श्लोकाः प्राप्यन्ते "स्वस्य भक्तस्य गुणं दिव्यमिदं शृणु मे प्रिये। श्रुत्वा स्त्रीरंगपृथ्वीसो सोकाश्रुव्याकुलेक्षणः।। रमामुखमवेक्ष्याह वाक्यमाश्रितवत्सलः। शृणु प्रिये मत्प्रियस्य गानं श्रोतुं मनोहरम् ।। सुधारसात्सुखं भद्रे करोति मम सुन्दरी।।'
५२–ऐतद्रसस्य–क,
५३–नक्तस्य–क,
५४–समे प्रिये–क,
५५–दत्तमात्यन्तिकं–ग, दत्वा अत्यंतिकं–क
५६–तद्दुःखमपि–घ,
५७–तु मह्यहम् –क, मप्यहो–घ,
५८–कमलेक्षणो–क,
५९–देव तांतकपादाब्ज–क,
६०–कारिणम् –घ,
६१–योऽज्ञाना–क,
६२–स्कन्धादिरूढं –क.

एवं भगवतादिष्टः संप्रहृष्टतनूरुहः। अहो भाग्यमहो भाग्यं महतस्तस्य योगिनः ।।३२।।
ब्रह्मादीनां हरेर्यद्[६३] –वन्नास्त्यनुग्रहमीदृशम् । इति ब्रुवन् द्रुतं गत्वा समीपं तस्य योगिनः ।।३३।।
समभ्यर्च्य यथान्यायं विज्ञाप्य च हरेर्वचः। स्वभुजा[६४] –रोहणाद्भीतं मा मामिति[६५] संवा[६६] –दिनम् ।।३४।।
बलात्कारेण सङ्गृह्य स्कन्धमारोप्य गायकम् । निनाय रङ्गनाथस्य सन्निधिं मुनि–सत्तमः ।।३५।।
स गायकस्तदारभ्य मुनिवाहन[६७] ईरितः। ततो रङ्गेश्वरं दृष्ट्वा प्रणम्य पुलकाञ्चितः ।।३६।।
बद्धाञ्जलिपुटो भूत्वा परमानन्दनिर्भरः। आस्वाद्य चरणाम्भोजमकरन्दं[६८] मनोहरम् ।।३७।।
नानासद्रत्न[६९] –खचितं विलोक्य कटकद्वयम् । संस्पृश्य जङ्घायुगलमानु[७०]–पूर्व्यमनुज्ज्वलम् ।।३८।।
पीनोरुद्वितये[७१] स्थाप्य मनस्[७२] ताक्ष्र्यांशु[७३] – भूषणे।
तप्तचामीकराभासं[७४] दृष्टिं नीत्वा[७५] पराम्बरम्[७६] ।। ३९।।
प्रविश्य काञ्चीविलसद्[७७] – वृहत्कटितटीह्रदा[७८]। नाभिह्रदे[७९] विनिर्मज्य विधिसद्माम्बुजार्चिते ।।४०।।
चिरं विश्रम्य[८०] विवेश[८१] विशालपृथुवक्षसि। प्रयुज्य कौस्तुभोद्भूषकम्बुकण्ठे च[८२] मानसम् ।।४१।।
पीनवृत्तायतभुजकल्पोद्याने विहार्य च। पीत्वा प्रसन्ने वदने चन्द्रपीयूषवाहिनीम्[८३] ।।४२।।
दशदिक्षु[८४] प्रविद्योत[८५] –कान्तिमन्मणिशोभिते। मनः किरीटे निक्षिप्य चिरं परवशं[८६] गतः ।।४३।।
एवमा[८७]–पादचूडान्तं[८८] कुर्वन्ननुभवं सदा। रङ्गभर्तरि सर्वेशे परब्रह्मणि सर्वगे ।।४४।।
लयं जगाम लक्ष्मीशे योगिराण्मुनिवाहनः ।। ४५।।

एतां कथां ये मुनिवाहनस्य
महात्मनः श्रीधरगायकस्य।
पठन्ति[८९] शृण्वन्ति लिखन्ति[९०] ते वै
प्राप्नुवन्त्यक्षरमच्युतं पदम् ।। ४६।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
एकविंशो ऽध्यायः ।।२१।।

६३–हरेरन्यैर् –घ
६४–स्वभुजारोहणं कृत्वा–क, ग, स्वभुजारोहणे–घ,
६५–मा इति–ग, मेति–घ,
६६–वादिनम् –क, ग,
६७–मुनिवाहवतीरित–क, मुनिवाह इतीरितः–ग, घ,
६८–मकरन्दमनोहरम् –क,
६९–रत्नैसखचितं–क,
७०–मानुपूर्यम–क, नुपूरान्तम–ग,
७१–यानोरुद्वीतये–क, जानूरुद्वितये–ग,
७२–मवस–क,
७३–ताक्ष्र्य श्रृश्रूषणे–क, ताक्ष्र्ये शुभूषणे–ग
७४–कराभासे–ग,
७५–नीला–क,
७६–वरांबरे–क, परेंबरे–ग, परांवराम् –घ,
७७–विलस्तसत्–क, ७८–तदा–क,
७९ –नाभिह्रदि–क, नाभीह्रदे–ख,
८०–चिरं काले–क, चिरं विलंब्य–ग,
८१–विभावास–क, आविश्य–ग मावास–घ,
८२–कंठनमाननम् –क, तु चक्षुषी–ग,
८३–पीयूषवाहिनि–ग,
८४–दशदिश–क,
८५–प्रविद्योति–घ
८६–परवसं–क, ग, घ,
८७–सर्वमा–घ,
८८–चूडन्तं–क, घ,
८९–पठं–क, ९०–लिख्यन्ति–क

द्वाविंशो ऽध्यायः

श्रीनारायण उवाच

कथयिष्यामि ते भूयो विचित्रामपरां कथाम् । महाभाग नर श्रीमन् समाहितमनाः शृणु ।।१।।
हेमापगानदीतीरे मण्डिते[१] चोल[२]–मण्डले। मण्डनाख्यो [३] वरग्रामस्तत्रास्ते मण्डनं[४] भुवः ।।२।।
तस्मिन् ग्रामवरे सन्ति ब्राह्मणा[५] वेदपारगाः । नारायणपराः सर्वे सर्वशास्त्रविशारदाः [६] ।।३।।
स्वधर्मै[७] -निरता नित्यं भगवच्चिह्न[८] – चिह्नितः। तत्रस्थमिन्दिराधीशं कलिकल्मषनाशनम् ।।४।।
भजन्तः सततं[९] भक्त्या महान्तो[१०] विजितेन्द्रियाः। तेषां धर्मैकनिष्ठानां कस्यचित् सुमहात्मनः ।।५।।
वेदान्तविदुषो ज्ञानशीलस्य[११] विमलात्मनः। द्विजवर्यस्य धर्मपत्नी सा[१२] सर्वगुणान्विता[१३] ।।६।।
मार्गशीर्षे महेन्द्रर्क्षे शुभलग्ने शुभेऽहनि । असूत वनमालांशं पुत्रं भव्यगुणैर्युतम् ।।७।।
सूतकान्तेऽकरोत्तस्य पिता नारायणाह्वयम् । अथोपनयनं चैव चक्रे पञ्चमवत्सरे ।।८।।
नारायणाभिधानो ऽसौ केशवस्याऽखिलात्मनः। निर्हेतुककटाक्षेण स तु[१४] भक्तिपरोऽभवत्[१५] ।।९।।
पश्यन्नसारे[१६] संसारे दुस्तरेऽतिजुगुप्सिते। एषणा[१७] निखिलास्त्यक्त्वा वीतरागो जितेन्द्रियः ।।१०।।
श्रीरङ्ग[१८] –क्षेत्रमागम्य ज्ञानवान् सद्द्विजोत्तमः[१९]। रङ्गभूवल्लभं पश्यन्[२०] सेवयन्[२१] तमह[२२]–र्निशम् ।।११।।
भक्तानाराधयंस्तस्य तत्कैङ्कर्यरतः सदा । वृत्तिं माधुकरीं कुर्वन् भगवद्भक्तसद्मसु ।।१२।।
भक्ताङ्घ्रिरेणुरित्याख्यं ख्यापयन्न[२३] –वसद्द्विजः। ततो गोविन्दभक्ताङ्घ्रिरेणुः श्रीरङ्गशायिनः ।।१३।।
कैङ्कर्याणा[२४]–मशेषाणां किमिष्टं किं[२५] वरं[२६] त्विति। विचार्य मालाकरणमिष्टं श्रेष्ठमिति प्रभोः।। १४।।

इति निश्चित्य मनसा तस्य प्रतीचीभागसंस्थितम्[२७]।

जगाम त्वरितं[२८] हृष्टो द्वीपं[२९] श्रीमुकुटं[३०] त्विति।। १५।।

तत्रोद्यानं वरं रम्यं नानावृक्षसमन्वितम् । आरोप्य वर्द्धयामास[३१] जलसेकादि [३२] –कर्मभिः ।।१६।।
तस्मिन्नेवोटजं कृत्वा तत्रैवोवास सर्वदा। उषःकाले समुत्थाय कृत्वा स्नानादिकं यथा[३३] ।।१७।।

१–मण्डले– ग, घ,
२–चोरमंडले, क,
३–मण्डनाख्य–क, ग,
४–मण्डलं–घ,
५–ब्रह्मणाः– क,
६–विसारदाः –क,
७–सर्वा च धर्मनिरता–क, सद्धर्मनिरता–ग,
८–भगवन्निहचिंतिना–क,९–शततम् –क,
१०–योगिनो–क,
११–शीलस्य–क,
१२–साध्वी–घ,
१३–सा द्विगुणान्विता–क,
१४–कृष्ण–क,१५– भवेत् –क,
१६–पश्यन्नसारसंसारे–घ,
१७–ईषणानखिलांस्त्यक्त्वा– क, ग,
१८–रङ् गक्षेत्रमा–क,
१९–सद्द्विजोत्तमम् –क,
२०– पश्य– क,
२१–संस्तुवन् –क,
२२–समहर्निशम्–क,
२२–समहर्निशम्–क,
२३–ख्यापयन्निवसद् –ग, ख्यापयन् इव सद् –घ,
२४–कैंकर्यानाम–क,
२५–हि–घ,
२६–वरं त्विदम्– क, भवेदिति–घ,
२७–संस्थितः– क
२८–त्वरितम्–ग
२९–द्विपं–क, ३०–श्रीमूकुट–क
३१–वर्धयामास–क, ३२–जलकेसादि–क,
३३–तथा–घ,

मन्त्रराजं ततो जप्त्वा[३४] जगाम तुलसीवनम् । प्रणम्य[३५] स्तुतिभिः स्तुत्वा तुलसीं हरिबल्लभाम् ।।१८।।
तां तत्र जातां बहुलां कोमलां दिव्यसौरभाम् [*]। सङ्गृह्य वेदिकामध्ये निक्षिप्यानन्तरं मुनिः ।।१९।।
चम्पकाशोकबकुलमल्लिका[३६] -पाटलादिकान् । केतकीनागपुन्नागजातीकुन्दा[३७] -दिकान् बहून् ।।२०।।
पुष्पाणां निवहं लूत्वा[३८] मन्त्रराजमनुस्मरन् । चकार मालिका[३९] रम्यास्[४०] तुलसीपुष्प[४१] -संयुताः ।।२१।।
ताः[४२] पेटिकायां निक्षिप्य रङ्गेशस्यान्तिकं गतः[४३]। परिक्रम्य प्रणम्याथ संस्तुत्योत्तमसंस्तवैः ।।२२।।
नानावर्णविचित्रा [४४] -ढ्या मालिकाः सुसमाहितः[४५]। तस्मै समर्पयामास सर्वाङ्गपरिशोभितः ।।२३।।
दामोदरं पुनर्नत्वा परमानन्दपूरितः। निर्जगाम हरेस्तस्मान्मन्दिराद् द्विज[४६] - पुङ्गवः ।।२४।।
माधुकर्या महावृत्त्या श्रीवैष्णवगृहेषु च। अन्नं सङ्गृह्य नियतः प्रविवेश स्वमाश्रमम् ।।२५।।
तदन्नं हरये भक्त्या निवेद्य परमात्मने। भक्ताङ्घ्रिरेणुर्बुभुजे विष्णौ[४७] संन्यस्तमानसः ।।२६।।
दिनशेषं च तुलसीसेवनादिषु कर्मसु[४८]। नीत्वा सायन्तनीं सन्ध्या[४९] -मुपास्याथोटजं गतः ।।२७।।
हरिपादाम्बुजध्यानात्सर्वां[५०] रात्रिं व्यपानयत्[५१]। एवं प्रतिदिनं विष्णो[५२] -र्वर्तयन् योगिशेखरः[५३] ।।२८।।
कर्मणा मनसा वाचा तत्कैङ्कर्यरतः[५४] सदा। विधीश[५५] -गोत्रभिद्भोगान्निराकुर्वन् मधुद्विषः ।।२९।।
कैङ्कर्यभोगानुभवं कुर्वंस्तस्थौ समाहितः। कुर्वत्येवं मुनौ नित्यं परिचर्यां महात्मनि ।।३०।।
श्रीरङ्गशायी[५६] भगवान्सन्तुष्टश्चास्य सेवया । प्रियायै[५७] कथयामास वैराग्या[५८] -दिगुणान् मुनेः ।।३१।।
गुणांस्तान् कमला श्रुत्वा विस्मयं परमं गता । ईदृशस्यापि[५९] भोगेषु मतिर्वर्त्तेत वा न किम् [६०] ।।३२।।
इति पप्रच्छ भर्त्तारं तामाह जगतां पतिः। एतादृशस्य भक्तस्य मत्प्रियस्य महामुनेः ।।३३।।
लेशमात्रोऽपि नास्यैव विषयेषु मनोरथः। अहं करोमि यदि चेद् विषयाभिरतं त्वमुम् ।।३४।।
भवेदेव[६१] न सन्देहो माया मम दुरत्यया। तद् वाक्यमिन्दिराकर्ण्य सस्मिता [६२] -ननपङ्कजा ।।३५।।
तमुवाच विनोदार्थं[६३] प्रियं भक्त[६४] प्रियं सदा। निष्कामोऽयं मुनिश्रेष्ठस्तव[६५] मायाऽतिगो महान् ।।३६।।
न त्वन्माया[६६] -वशं याति न ते भक्तो हि नश्यति। इत्युक्तः प्रियया देवः प्रहसन् तां विलोकयन् ।।३७।।
देवि ! पश्यस्व[६७] मे मायाप्रभावमतिदुस्तरम् । इत्युक्त्या तद्विलासार्थं काञ्चिद [६८] प्सरसं शुभाम् ।।३८।।

३४-गत्वा-क,
३५-प्रणत-क
*- तां पत्रजातं बहुलं कोमलं दिव्यसौरभम् -घ
३६-मल्लका-क,
३७-कुन्दकान् -क,
३८-कृत्वा-क,
३९-मालिकां -क, ग,
४०-रम्याम् -क, ग,
४१-पुष्पसंयुताम् -क, ग,
४२-ताम् -ग,
४३-गताः -क,
४४-विचित्राद्या-क, ग,
४५-सुसमाहिताः -ग,
४६-विप्रपुङ्गवः- क,
४७-विष्णो-क
४८-कर्म च-क, कर्मसु-ग,
४९-सन्ध्याम् उपास्याथो-घ,
५०-सर्वशत्रं -क, सर्वरात्रं-ग,
५१-व्युपानयत् -घ
५२-विप्रो-क, ग
५३-शेषरः -क,
५४-तत्कैकर्यरतिः- क, घ,
५५-विद्वान् स गोत्रभिद् -घ,
५६-श्रीरंगसायि-ग
५७-कथयामास सकलान् -ग, घ,
५८-वैराज्ञादिगुणान् -क, ५९-ईद्रसस्यास्य-क,
६०-हि -घ,
६१-भवेद्देव -ग
६२-सोभिताननपङ्कजा-घ
६३-विनोदार्थी-क, विनोदार्था -ग,
६४-प्रियभक्ता प्रियं -घ,
६५-मुनिश्रेष्ठः तव -क, ग, मुनिश्रेष्ठः तपसां पारगो-घ,
६६-न तत्माया-क,
६७-पस्यस्व-क, ६८-कांचीद-क,

आहूय नर्तकीवंशे जाता भव सुमध्यमे । इति तां सन्दिदेशाऽथ सापि जज्ञे[६९] तथा भुवि ।।३९।।
देवदेवीति विख्याता सखीजनसुसंवृता। भगिन्या सह गच्छन्ती[७०] सेवितुं रङ्गशायिनम् ।।४०।।
तत्र स्थितं वनं रम्यं प्रविश्य मुनिपुङ्गवम् । कीर्त्तयन्तं गिरा नाम ध्यायन्तं मनसा हरिम् ।।४१।।
कुर्वन्तं वनकर्माणि कायेन वनसंस्थितम् । दृष्ट्वाऽब्रवीदिदं वाक्यं भगिनीं सा विलासिनी[७१] ।।४२।।
मुनिमेनं स्थिरस्वान्तं जितकामं जितेन्द्रियम् । कन्दर्पवशगं कर्तुं त्वं वाऽहं वा ब्रवीषि[७२] मे ।।४३।।
इत्युक्त्वा भगिनी ज्येष्ठा स्थैर्यं ज्ञात्वा महात्मनः। न मोहयति[७३] रम्भाऽपि मुनिमेनं दृढव्रतम् ।।४४।।
अहं तु किं पुनस्त्वं वा किं करोषि शिलाकृतिम् । यदि त्वं मोहयस्येनं तव दास्यं करोम्यहम् [७४] ।।४५।।
ततोऽब्रवीद् देवदेवी भगिनीं देव[७५]–चोदिता। अहमेनं मोहयिष्ये नो चेद् दासी भवामि ते ।।४६।।
अन्योऽन्यमेवं शपथं[७६] कृत्वा त्यक्त्वा सखीजनान् । उपायं संविचिन्त्येमं विसृज्या [७७]–भरणादिकम् ।।४७।।
धृत्वा[७८] श्वेतोर्ध्वपुण्ड्रं च तुलसीपद्म [७९] –मालिके। काषायवासिनी विष्णुनामसङ्कीर्त्तने रता ।।४८।।
मुनेरन्तिकमागम्य पपात पद[८०] –पद्मयोः। तां दृष्ट्वा दुःखितां दीनां कुलं गोत्रं च जन्म च ।।४९।।
पृष्ट्वा[८१] निवेदितं[८२] सर्वं तया कपटवेषया। आश्वास्य कृपया नारीं[८३] तुलसीवनसेचने ।।५०।।
करणे चालवालानां[८४] सन्दिदेश[८५] महामुनिः। शुश्रूषमाणा सा नित्यं शीताम्बु[८६] –हरणादिभिः ।।५१।।
भुञ्जाना भुक्तशेषान्नं[८७] सेवयामास वत्सरम् । ततोऽतिदुःखिता भूत्वा मोघाशा [८८] मुनिपुङ्गवे ।।५२।।
पुनर्गन्तुं[८९] स्वकं गेहमियेषा[९०] –ऽतीव लज्जिता। ततो रङ्गेश्वरो देवः स्वप्ने तामब्रवीत्पुनः[९१] ।।५३।।
तव प्रतिज्ञा सफला भविष्यति न संशयः[९२]। अथोत्थाय निशायां सा सन्तुष्टा [९३] भूषणादिकम् ।।५४।।
निकुञ्जमध्यादाहृत्य स्वलङ्कृत्य स्वकां तनुम् । तदा वर्षति पर्जन्ये पर्णशालां गणवधूः[९४] ।।५५।।
अश्वत्थमूले संतस्थौ तत्[९५] समागमकाङ्क्षिणी। ततो विप्रोत्तमो दैवादुत्थाय द्वारसंस्थितः ।।५६।।

दिशो ऽवेक्ष्या[९६] – ऽम्बुदैस्साद्रांस्तिमिरेण सुसंवृताः[९७]।
ददर्शाऽश्वत्थ[९८] – मूलस्थां स्त्रियं वर्षेण पीडिताम् ।।५७।।
निनाय कृपया पर्णशालां[९९] तां मुनिपुङ्गवः[१००]। ततः सा तस्य पादाब्जौ लालयन्ती [१] कराम्बुजैः ।।५८।।
रराम तेन मुनिना देवाच्चलितमानसा [२] ।।५९।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
द्वाविंशो ऽध्यायः ।।२२।।

६९–यज्ञे–क ७०–गच्छन्ति –क
७१–विनीतवत्–ग, घ ७२–ब्रवीहि–घ,
७३–न मोहयितुमिच्छामि–घ,
७४–गता ह्यहम् –ग, घ,
७५–दैवनोदिता–ग,७६–सपथम् –क,
७७–विसर्ज्याभरणा– क, ग, घ, ७८–धृतो–क,
७९–तुलसीमणि–मालिका–क, तुलसीमस्तमालिका–ग,
८०–पादपद्मयोः–क, ८१–पृष्टा–ग,
८२–निवेदितः–क, ८३–नारिम्–क,
८४–करणेष्वालवालानां –घ,
८५–संविवेश–क, स विवेश–ग,
८६–श्रान्ताम्बुहरणादिभिः क, ग,
८७–भुक्तशेषात्तम् –क ८८–मोघासा–क,
८९–पुनागतम् –क, पुनर्गत्वा–ग,
९०–विवेषातीव –क, विवेशातीवे–ग,
९१–तामब्रवीदिति– क ९२–शंशयः– क,
९३–सन्तुष्ट–क, ९४–गणेवधू–क, ग, घ,
९५–तस्यभागमकांक्षिणी–क,
९६–वीक्ष्य–घ, ९७–सुसंहताः– क, सुसंहता–घ,
९८–ददर्शास्वत्थ–ग, ९९–पर्णसालाम् –क,
१००–मुनिसत्तमः–क, १–ललायान्ती –क
२–चलिततेजसा–ग, चलितचेतसा–घ

त्रयोविंशो ऽध्यायः

श्रीनारायण उवाच

अथ तं मुनिमादाय गृहं गत्वाऽसितेक्षणा[१]। भगिन्यै कथयामास तत्सर्वं हर्षिता सती[२] ।।१।।
तन्मातासहमानाऽऽह[३] धनं मे देहि भूसुर ! नोचेन्निर्गच्छ भवनादद्यैव[४] त्वरितं मम ।।२।।
एवमुक्तस्तया विप्रो निर्गत्य बहुनिःश्वसन् । स बहिर्वेदिकामध्ये तस्थौ दीनमना निशि[५] ।।३।।
तस्मिन्काले जगन्नाथो रङ्गेशो भक्तवत्सलः। जहास सुन्दरीं वीक्ष्य जगतां जननी[६] प्रियाम् ।।४।।
सा दृष्ट्वा हसितं तस्य[७] पप्रच्छ कमलालया। किमर्थं कुरुषे हास्यं पृच्छन्तीमिति[८] सोऽवदत् ।।५।।
भक्ताङ्घ्रिरेणुर्मद्भक्तो वीतरागो जितेन्द्रियः। इदानीं गणिका[९] -सक्तो मम मायावशं गतः ।।६।।
वेश्यागारबहिर्वेदिमध्ये[१०] तिष्ठत्यसौ[११] मुनिः। तं दृष्ट्वा हसितोऽस्म्यद्य पश्य त्वमपि मत्प्रियम्[१२] ।।७।।

इत्युक्ता[१३] तेन भर्त्रा[१४] सा दृष्ट्वा तं विरहातुरम् । कृपालया जगन्माता प्राञ्जलिः प्राह केशवम् ।।८।।
नित्यं त्वत्कर्म कुर्वन्तमीदृशं[१५] विजितेन्द्रियम् । एकान्तिनं वीतरागं भक्तं दास्यैकभोगिनम् (*) ।।९।।
ईदृशं[१६] करुणाब्धे त्वमकरोत्कामुकं कथम् । पुरोक्तवत्या लीलार्थं मम वाक्येन सुन्दर ।।१०।।
ईदृशं कामुकं कर्तुं नार्हसि श्रितवत्सल ! दुस्तरं तव मायाऽब्धिं तर्तुं ब्रह्माण्डपेटिषु[१७] ।।११।।
समर्था योगिनः के स्युर्जितकामादयोऽपि वा। त्वदङ्घ्रिनावमारुह्य तरन्त्येव त्वदाश्रिताः।।१२।।
एनं[१८] त्वदाश्रितं देव रक्षस्वाऽखिलरक्षक ! इति ब्रुवन्त्यां पद्मायामवो[१९] -चज्जगदीश्वरः।।१३।।
मया[२०] कृत[२१]-मिदं सर्वं लीलार्थमसितेक्षणे[२२] ! मदेक[२३] - भोग्यं मद्भक्तमेनं[२४] पापं न गच्छति ।।१४।।

अस्माद् दुःखान्मोचयामि मुनिमद्यैव मत्प्रियम् । एवमुक्त्वाथ रङ्गेशो विभीषणसमर्पितम् ।।१५।।
सुवर्णचषकं श्रेष्ठमादाय वटुरूपधृक्[२५]। गणिकाया गृहं प्राप्य ददौ तस्यै वटुस्तथा ।।१६।।
मुनिमभ्यन्तरं[२६] तस्याः प्रस्थाप्याऽन्तर्दधौ[२७] ततः। स्वधामपरमं हृष्टो जगाम भगवान् हरिः ।।१७।।
अथ रात्र्यां व्यतीतायां प्रातराराधका[२८] हरेः। रङ्गेश्वरमुपागम्य जाम्बूनदमयं वरम् ।।१८।।

१-सितेक्षण-क,
२- शती-क,
३-सा-क, ग,
४-भवनात् अद्यैव-घ,
५-निसि-क,
६-जनिं-क, ग
७-देवी-क,
८-पृच्छन्तीमिव-क, ग
९-कणिकासक्तो-क
१०-वेंदी-घ,
११-तिष्ठति सो-क, ग
१२- तं प्रियम्-क
१३-इत्युक्त्वा-क, ग,
१४-भक्तं-घ,
१५- कुर्वन्तं ईदृशं-ग, तादृशं-घ,
१६-तादृशम् -घ,
१७-पेठिषु-ग
१८-एवं-ग,
१९-पद्मायाम् अवोचज् -क, ग,
२०-माया-क,
२१-कृतामिदम् -क,
२२- मसितेक्षणी -क,
२३-मदैक - भोग्यं-क, ग,
२४-मद्भक्तंएनं-क, ग,
२५-धृत् -क,
२६- मुनिमप्यन्तरम् -ग, मुनिमश्येत्यतं-घ,
२७-ऽन्तः पुरं ततः- ग, घ,
२८- मातराराधका-क,
(*)-श्लोकोऽयं 'क'-मातृकायां नोपलभ्यते।

पात्रं त्वपहृतं ज्ञात्वा राज्ञे सर्वं न्यवेदयन्[२९]। राजाऽप्युपायैर्बहुभिर्लब्ध्वा सौवर्णपात्रकम् ।।१९।।
स्तेय[३०] –मारोपयामास श्रीभक्ताङ्घ्रिरजोऽभिधे[३१]। अथ राज्ञि[३२] यथा[३३] –न्यायं तं दण्ड[३४]–यितुमुद्यते ।।२०।।
रङ्गेशवरो वासुदेवः पुरुषः पुरुषोत्तमः। नीलाभ्रश्रीस्तिरस्कार[३५]–कोमलश्यामविग्रहः ।।२१।।
निरस्तधवलाम्भोजपत्रा[३६] –यतसुलोचनः। कोट्यर्कद्योतविमल[३७]–दिव्यतेजो–विराजितः ।।२२।।
चम्पा[३८] –प्रभापरिभवचारुजाम्बूनदप्रभः। विकचद्[३९]–रक्तपाथोजशोभा[४०] –मुट्चरणाम्बुजः ।।२३।।
श्रीवत्सकौस्तुभोरस्क[४१]–श्चन्दनस्रग्विराजितः। किरीटहारकटककङ्कणाद्यैर्विराजितः[४२] ।।२४।।
शङ्खचक्रगदाखड्ग[४३] –प्रमुखायुधशोभितः। पद्मालयासमायुक्तः पन्नगा[४४] – धीशवाहनः ।।२५।।
जलेश[४५] –भवपाकारिप्रमुखामरशोभितः। प्रादुर्भूतोऽथ[४६] राजानमुवाच जगतां पतिः ।।२६।।
मद्भक्तोऽयं महाभाग सम्पूज्योऽहं यथा द्विजः। एतस्यार्थ[४७] मया दत्तं पात्रं वारस्त्रियै निशि ।।२७।।
तस्मात्तस्यै[४८] पुनर्दत्वा[४९] स्वर्णपात्रमनुत्तमम्। सम्पूजया[५०] ऽमुं विप्रं त्वं[५१] मत्प्रियं मामिवानिशम् ।।२८।।

इत्युक्त्वा तमुपस्पृश्य[५२] कराम्भोजेन योगिनम्[५३]। विवेश हृदयं तस्य सलक्ष्मीः सायुधः प्रभुः ।।२९।।
ततः स राजा योगीन्द्रमारोप्य शिविकान्तरे। स्वयं भुजाभ्यां सन्धार्य तूर्यघोषपुरस्कृतम् ।।३०।।
पुरीं परिययौ पश्चाद् भक्त्या[५४] नत्वा च योगिनम्। ततः स योगी हृष्टात्मा रङ्गेशं शेषशायिनम् ।।३१।।
प्रणम्य स्तुतिभिः स्तुत्वा (चो) वाच जगतां पतिम्। मया निकृष्टं कर्मेदं कारयित्वा कृपाम्बुधे ।।३२।।
लीलाभुवनकर्तस्त्वं[५५] किं लीलामनुभूयसे। इत्युक्ते[५६] भक्त[५७] – वर्याग्रे स रङ्गेशो[५८] धराधरः।।३३।।
करुणावलोकनैः सान्द्रैर्वीक्ष्योवाच स्मयन्निदम्। योगिन् मद्दास्यभागित्वचरित्रमिदमुत्तमम् ।।३४।।
कृष्णरूपस्य मे यद्वद् गोपीविहरणा[५९] – दिकम्। तद्वत्पवित्रं परमं शृण्वतां पठतामपि ।।३५।।
कल्मषहरणं[६०] मुक्तिदायकं स्यान्न संशयः[६१]। मन्मना भव हे ब्रह्मन् त्वत्कृतेन दिने दिने ।।३६।।
तुलसीवनमालानां कैङ्कर्येणाऽस्मि तोषितः। यदभीष्टं तवास्तेऽद्य[६२] तद् वृणीष्व [६३] ददामि ते ।।३७।।
तद्वाक्यं रङ्गनाथस्य श्रुत्वा हर्षसमन्वितः। भक्ताङि.घ्रेणुरित्याख्यं सत्यं कुरु रमेश मे ।।३८।।
अस्मान्नास्ति वरं[६४] स्वामिन्निदमेव परं वरम्[६५]। तथेत्याह स देवोऽपि ततो येगिवरा[६६] – ग्रणीः ।।३९।।

२९–न्यवेदयेत–क, न्यवेदयत्–ग
३०–स्तैन्य–घ
३१–रजाभिदे–क
३२–राजा–क
३३–जथा–क
३४–दडयतुमुद्यते–क
३५–निरस्तरे–क
३६–कर्णायत– क
३७–कोट्यार्कद्योतयाभाजः दिव्य–क
३८–शंपा–घ
३९–विकसद्रक्त–ग, विकचारक्त–घ
४०–शोभाच्च–क, शोभावच्चरणाम्बुजः–ग
४१–रस्कः चन्दनस्रग् –क, ग, घ
४२–विराजितैः–क
४३–पद्म –ग, घ
४४–पतगाधीश–ग, घ
४५–अजनशिवपाकारि–क
४६–प्रादुर्भूताथ–क
४७–एतस्यार्थे–घ
४८–तस्मै–क
४९–नत्वा–घ
५०–सपूज्ययोर्म–क
५१–त–क
५२–तं परिस्पृश्य–क
५३–योगिनाम–क
५४–भक्तांघ्रेरघ योगिनः–घ
५५–भवनकर्तृत्व–क, भुवनकर्तृत्व –ग
५६–इत्युक्तो –घ
५७–भर्तृवर्याग्रे –क
५८–रेरंग –क
५९–विरहणादिकम् –क
६०–कलौघहरण –क, ग
६१–शंशयः– क
६२–तवास्तौव्य–क, तवास्तेन –ग
६३–वृणिष्व–क
६४–परम् –क घ
६५–परपरम् –क, वर परम् –घ
६६–योगीवराग्रणीः– क

भक्ताङ्घ्रिरेणुरित्यादि [६७] – श्रुत्यर्थप्रतिपादकौ। प्राबोधकश्रीमारेति प्रबन्धावमृतप्रदौ। ।।४०।।
कृत्वा रङ्गेशयानाय समर्प्याथ स पूर्ववत् । तुलसीपुष्पमालाभिः कुर्वन् कैङ्कर्यमन्वहम् ।।४१।।
तस्थौ तत्र महाभागस् [६८] – तद्ध्यानानन्दमानसः ।।४२।।

श्रीभक्तपादसरसीरुहरेणुनाम्नः

श्रीरङ्गनाथपदपद्मनिकेतनस्य।

श्रीमत्कथां पठति यः शृणुते परत्र

श्रीवल्लभस्य निलयं स [६९] लभेच्छ्रियं च ।।४३।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
त्रयोविंशो ऽध्यायः ।।२३।।

६७–रित्याख्य–घ
६८–महाभागो महानान्दमानसः– क
६९–लभतेश्रिय च–क

चतुर्विंशोऽध्यायः

श्रीनर[1] उवाच

सम्यक्[2] श्रुता महाभाग मया पुण्यकथा शुभा। विष्णुभक्ताङ्घ्रिरेणोश्च महापापौघनाशनी ।।१।।
भूयः कथय देवेश परमव्योमवासिनाम् । अवतारकथा दिव्याः श्रवणादेव मोक्षदाः ।।२।।
अभीष्ट[3] – दाश्च सर्वेषां समस्तकलुषापहाः ।

श्रीनारायण[4] उवाच

विष्णुचित्त इति ख्यातो रथांश[5] प्रभवो द्विजः ।।३।।
सर्वागमांश्च शास्त्राणि प्राहाऽभ्यासं विना हरेः। कृपयाऽतुल[6] – मैश्वर्यमिह चान्ते परं पदम् ।।४।।
श्रीलाभं तत्प्रवक्ष्यामि शृणुष्वैकमना नर! धन्वीपुरीति विख्याता पाण्ड्यदेशे मनोहरे।।५।।
दिव्या स्व[7] –र्गोपमा रम्या पुण्या परमपावनी। तस्यां वसति लक्ष्मीशः[8] सर्वदेवर्षिसेवितः ।।६।।
न्यग्रोघपत्रशायीति मुक्तिदः सर्वदेहिनाम् । भूसुराः सन्ति तद्भक्ताः शतशोऽथ सहस्रशः[9]।।७।।
वेदवेदाङ्गविदुषः सर्वशास्त्रविशारदाः। दिव्यज्ञानोपपन्नाश्च यज्वानो विमलाशयाः ।।८।।
तेषामग्रेसरः कश्चिद् योगविद्या[10] – विशारदः। सर्वागमज्ञः शान्तात्मा विष्णुभक्तो जितेन्द्रियः *।।९।।
मुनिनाथ इति ख्यातो हरौ संन्यस्तमानसः। तस्य पत्न्यां समभवत्सुपर्णा[11] –शस्त्रयीमयः ।।१०।।
ज्येष्ठमासे स्वातिनक्षत्रे[12] मिथुने[13] शुभे दिने**। विष्णुचित्तो महायोगी भट्टनाथ इतीरितः ।।११।।
स तमाराधयन् विष्णुं सदाऽनन्यप्रयोजनः[14]। धूपदीपैश्च नैवेद्यैर्नित्यगेयैः प्रदक्षिणैः ।।१२।।
चन्दनैः[15] सद्म सम्मार्ज्य[16] .विशोधनविलेपनैः। बहुभिर्दीपिकाभिश्च कलशैस्तीर्थपूरितैः ।।१३।।
स्वहस्तेनाहृतसुमैः[17] – तुलसीमालिकादिभिः । चतुर्विधै[18]– रलङ्कारैस्तद्भक्त्योपार्जितैर्वरैः ।।१४।।
सर्वर्तुकुसुमै[19] – र्वृक्षैः[20] परितस्तुलसीद्रुमैः। संयुक्तं चित्रमारामं कृत्वा तद्वृक्षसेचनैः ।।१५।।
विचित्रमालाकरणैर्दीर्घिकाकरणैस्तथा। श्रीवैष्णवानां पूजाभिः सर्वकालं समाहितः ।।१६।।
निग्रहात्करणानां च सेवैव[21] श्रीपतेः परम् । इति मत्वा भट्टनाथः करणैर्बहुचेष्टितैः ।।१७।।

१–श्रीनर–ग,घ
२–संश्रूयते – क, ग
३–अभिष्टदा च– क, अभीष्टदा च–घ
४–नारायण –क
५–रथांस –क, विष्णोरंशभवो– घ
६–तुल्यमैश्वर्य –क
७–ललामं –क, ग
८–दिव्यसर्गोपमा –क
९–लक्ष्मीशो –क,ग
१०–सहस्त्रसः– क
११–विद्यो –क
*–क –मातृकायां पङ्क्तिरियं न दृश्यते।
१२–पुत्रश्रीमान् –क, गरुत्मांशे –ग
१३–स्वाति ऋक्षे–क
१४–मिथुने च शुभे–क, ग, घ
**–शुभदे शुभे च पवमानभे –घ
१५–प्रयोजकः क, ग,
१६–बन्दनैः– क, ग,
१७–संमार्ग–क, संमार्ज–ग, घ,
१८–सुमनः–ग,
१९–चतुर्विद्याद्यलङ्कारैः–घ
२०–कुशुमै–क,
२१–वीक्ष्यैः– घ,
२२–सेवेत–क

कैङ्कर्यमनिशं कुर्वंस्त्यक्त[२३]–त्रैवर्गिको महान् । शेषशेषित्वविज्ञानभगवद्दास्यजीवनः[२४] ।।१८।।
उपायोपेयरूपेण समाश्रित्य श्रियः[२५] पतिम् । तस्मिन्न्यस्तभरः श्रीशे तत्पादन्यस्तमानसः ।।१९।।
निर्भयो[२६] निर्भरो[२७] ह्यात्मभरणे दृढनिश्चयः। कालमेवं क्षिपन् [२८] विष्णोः[२९] परिचर्यापरायणः ।।२०।।
यदृच्छा[३०]–लाभसन्तुष्टस्तस्थौ[३१] योगिवराग्रणीः[३२]। तस्मिन् काले पाण्ड्यराजा[३३] मधुरां परिपालयन् ।।२१।।
धर्मज्ञस्तत्त्वजिज्ञासुस्तत्त्वज्ञान् सेवयन् स्थितः । तदा कश्चिद् विप्रवर्यस् [३४]तीर्थयात्रापरो महान् ।।२२।।
तत्पुरीं प्राप्य राजानं ददर्शाऽतिथिपूर्वकम् । राजाऽपि तं नमस्कृत्य समभ्यर्च्य यथाविधि ।।२३।
विशेषार्थो ऽस्ति चेद् ब्रूहि तत्त्वज्ञैः[३५] समुदाहृतः । तद्वाक्यं नृपतेः श्रुत्वा सचिन्त्याथ स भूसुरः ।।२४।।
निश्चितार्थं समालोक्य विद्वद्भिः प्राह भूपतिम् । प्रयतेताऽष्टभिर्मासैर्वर्षा [३६] –कालार्थमात्मवित् [३७]।।२५।।
निशार्थं [३८] प्रयतेताऽह्ना यतेत वयसा[३९] नरः । वार्धक्यार्थ[४०] च विज्ञाताजन्मनेहैव मुक्तये ।।२६।।
य एतद् [४१] बुद्धिमांल्लोक[४२] उवाच द्विजसत्तमः। तच्छ्रुत्वा वचनं राजा पूजयित्वा विसर्ज्य[४३] तम् ।।२७।।
पुरोहितं समाहूय शशंस द्विजभाषणम् । यतेऽहं परलोकार्थमयं लोकस्त्वशाश्वतः[४४] ।।२८।।
शाश्वतं साधयिष्यामि पदं ब्रह्मादिदुर्लभम् । गुरुर्मे हितकामस्त्वमत्राऽमुत्र पुरोहितः ।।२९।।
तमुपायं[४५] विनिश्चित्य ब्रूहि मे द्विजपुङ्गव । एवमुक्तस्तदा राज्ञा[४६] प्रत्युवाच पुरोहितः।।३०।।
राजन्नियं मनीषा ते कालेऽस्मिन्नुचिता खलु। इह जन्मवतां पुंसा[४७]–मुचिता हीदृशी[४८] मतिः।।३१।।
वेदान्तविज्ञानविद्वद्भिरुपास्यं परमं विभुम् । दैवतं समुपाश्रित्य मुक्तिं व्रज सुदुर्लभाम् ।।३२।।
तं राजा पुनरप्याह नमस्कृत्य कृताञ्जलिः। वेदान्तविद्भिर्ध्येयः[४९] कः को वेद्यो वेदमूर्द्धभिः [५०]।।३३।।
परापरेशः को देवः पुराणः पुरुषोत्तमः। कस्य भ्रुवोर्विलासेन ब्रह्मण्डानि[५१] विभ्रमन्ति, [५२]हि ।।३४।।
विधिरुद्रार्कचन्द्रेन्द्रवह्निकालानिलादयः। समस्तनिर्जरगणाः कस्याज्ञावशवर्तिनः ।।३५।।
परतत्त्वार्थवान् कोऽस्ति को महान्नित्य ईश्वरः। कमाश्रित्य[५३] न सीदन्ति तं विनिश्चित्य मे वद[५४]।।३६।।
तच्छ्रुत्वोवाच भूदेवः समालोच्य[५५] पुनः पुनः। एतत्प्रभावसंयुक्तो विष्णुरेव न संशयः [५६]।।३७।।
स एव परमं तत्त्वमात्मा[५७] यो जगतां पतिः। केचिद् वदन्ति तत्पुत्रपौत्रयोः सात्त्विकं परम् (?) ।।३८।।

२३–त्यक्त्वा–क, घ, त्यक्ता–ग,
२४–जीविनः– क,
२५–जगत्पतिम् –क, २६–निर्भरो–क, ग,
२७–निर्भयो–क, ग,
२८–छिद्रम् –क,
२९–विष्णुपरिचर्या –ग, घ,
३०–यदृक्षा–क,
३१–स्त–क,
३२–योगी–क, ग,
३३–राजा–क, ग,
३४–विप्रवर्यो–क, ग,
३५–तत्तवज्ञै–क, ग, तत्त्वज्ञ–घ,
३६–वृथाकालार्थ–क,
३७–मात्मनि–क,
३८–विलपन् निशार्थे–क
३९–यसा–क,
४०–वार्थकार्थ–क, व्यर्थकार्थम् –ग, आत्मकार्थ–घ,
४१–येन–क, यस्तु तत् –ग,
४२–लोकेत्युवाच क, ग, लोके इत्युवाच–ग,
४३–विशर्ज–क,
४४–सास्वतः– क,
४५–त्वमुपायम् –क,
४६–राजा–क,
४७–पुंसाम् उचिता–क, ग, पुंसा मुक्ता –क,
४८–सा कीदृशी–क, ईदशी–ग, घ,
४९–धेयं–क,
५०–वद्यमूर्धभिः –क, वेदमूर्धभिः–ग,
५१–ब्रहमाण्डम् –क,
५२–विभ्रमन्ति–क,
५३–कामाश्रित्य–क, यमाश्रित्य –ग, घ,
५४–मेव च–क,
५५–समालोक्य–क,
५६–शंशयः–क
५७–मात्मको–ग, गाल यो–क,

तस्मात्तद्भूतमध्यस्थान् वेदवेदान्तवेदिनः[५८]। समानीयाथ[५९] तैः सर्वैर्यत्सत्यं निश्चितं भवेत् ।।३९।।
ततत्त्वं समुपाश्रित्य साधयस्व परं पदम् । तच्छ्रुत्वा बुद्धिमान् राजा पुरोहितवचः शुभम् ।।४०।।
असङ्ख्यशुल्कं सौवर्णं निक्षिप्योन्नततोरणे। परतत्त्व विनिश्चित्य निगमार्थविदां वराः ।।४१।।
एतद्गृह्णन्तु सुमहच्छुल्कं प्रत्ययपूर्वकम् । इति सर्वेषु देशेषु घोषयामास पार्थिवः ।।४२।।
तच्छ्रुत्वा भूसुराः सर्वे वेदवेदान्तवेदिनः। आगच्छन् मथुरां[६०] शीघ्रं शतशोऽथ [६१] सहस्रशः।।४३।।
तत्र राजसभां प्राप्य राज्ञा ते प्रतिपूजिताः। वादांश्चक्रुस्तदाऽन्योऽन्यं सिद्धान्तैस्तैः स्वकैः स्वकैः ।।४४।।
एवं बहुविधं वादं कुर्वद्भिर्ब्राह्मणोत्तमैः । इदमेव परं तत्त्वमित्य[६२]भूत्र च निश्चितम् [६३]।।४५।।
राजा संशयसंयुक्तस्तस्थौ व्याकुलमानसः।। ४६।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
चतुर्विंशोऽध्यायः ।।२४ ।।

५८–वेदिनान् –क,
५९–समानिप्याथ–क, ग,
६०–मथुराम–घ,
६१–सतसोत्थसहस्रः–क
६२–मित्यभू च –क, इत्यूचुर्न –घ,
६३–निर्नितम्–ग, निर्णितम्–घ

पञ्चविंशोऽध्यायः

श्रीनारायण उवाच

तथा धन्वीपुराधीशो वटपत्रशयो हरिः । विष्णुचित्तं योगिवर्यं सदाराधनतत्परम् ।।१।।
समीक्ष्योवाच कृपया विलासार्थं जगत्पतिः[१]। पाण्ड्यराजसभां गत्वा जित्वा ब्राह्मणपुङ्गवान् ।।२।।
शुल्कं गृहाणीष्व सुमहत्परतत्त्वं प्रकाशय। एवमुक्ते रमानाथे प्रणिपत्य कृताञ्जलिः।।३।।
तस्मै विज्ञापयामास स्वमनोऽभीप्सितं द्विजः। त्वत्सद्मार्जनं वा किं जलाहरणमेव[२] च ।।४।।
मालिकाहरणं किं वा शिविकावाहनं हि वा । ध्वजातपत्रव्यजनधारणं वा किमीश्वर ।।५।।
दीपिकावहनं[३] वा मे किमिदं दिशसि[४] प्रभो ! न गच्छेत्संसदं प्राज्ञो राज्ञां दुरभिमानिनाम् ।।६।।
त्वन्मण्डपं विहायाऽहं कथं गच्छे[५] नृपालयम्[६]। त्वत्कैङ्कर्यं विना तत्र निमेषं वा कथं वसे[७] ।।७।।
त्वन्नामकीर्त्तनं त्यक्त्वा विवदिष्ये[८] कथं वद। त्वत्कैङ्कर्यं विना नान्यं जानामि श्रीधर प्रभो ।।८।।

श्रीभगवानुवाच[९]*

आगमांश्चापि शास्त्राणि दास्यामि तव भूसुर ! जयं च दास्ये संस्थित्वा तव हृत्पङ्कजान्तरे ।।९।।
अद्यैव गच्छ त्वरितं पाण्ड्यराजसभां प्रति । अहमप्यनुयास्यामि[१०] वत्सं प्रति यथैव[११] गौः ।।१०।।

श्रीनारायण उवाच

एवमुक्ते तु देवेशे सन्तुष्टहृदयो द्विजः । ओमित्यानम्य देवेशं प्रययौ मधुरां[१२] पुरीम् ।।११।।
मध्ये वेगवतीं तीर्त्वा प्रविश्य मधुरां पुरीम् । पाण्ड्यराजसभां विद्वज्जनकोलाहलाञ्चिताम्[१३] ।।१२।।
प्रविवेश महायोगी निःशङ्केनान्तरात्मना। तं ददर्श महाराजो[१४] दिव्यतेजोविराजितम् ।।१३।।
अत्युन्नतलसत्कायं हृष्टपुष्टाङ्गशोभितम् । पृथुवक्षो[१५] विशालाक्षं दीर्घबाहुं लसत्पदम् ।।१४।।
पूर्णचन्द्राननं चारुश्वेतमृत्पुण्ड्रशोभितम् । शङ्खचक्राङ्कितभुजं सुकपोलं शुचिस्मितम् ।।१५।।
तुलसीनलिनाक्षाणां मालिकालग्नकन्धरम् । जिताक्षं सजितक्रोधं यमादिगुणसंयुतम् ।।१६।।
हृत्पङ्कजस्थभगवत्पादपद्मार्पिताशयम्[१६]। दृष्ट्वैवं[१७] सहसोत्थाय सपुरोधाः[१८] सुसमाहितः ।।१७।।
प्रत्युद्गम्य प्रणम्याथ सन्निवेश्यासने[१९] शुभे। पूजयामास विधिवद् राजा परमहर्षितः ।।१८।।
तं दृष्टवाऽसहमानास्ते[२०] वेदशास्त्रविचक्षणाः[२१]। तत्रस्था भूसुराः सर्वे तदसूयापराः[२२] स्थिताः ।।१९।।

१–जगत्पसः– क, २–मेव वा –घ,
३–वाहनम् –क,
४–दिससि–क,
५–गछेन् –क, ग,
६–नृपालये–क,
७–वसेत् –क, ग,
८–वादयिष्ये–क, ग,
९–नारायण उवाच–क,
*– घ– मातृकायामेतत्पूर्वं पङ्क्तिरियमुपलभ्यते "श्रुत्वेति वाक्यं भगवानुवाच च ततोमुनिम्" । अत्र भगवानुवाच इति न प्राप्यते।
१०–नुयास्ये त्वां –ग, घ,
११–यथा च–क,
१२–मथुरां –ग,
१३–कोलाहलोचिताम् –क,
१४–महाराजा–क, ग,
१५–पृथुवक्षं–क, ग, पृथुवक्षसं –घ,
१६–शयाम् –क,
१७–दृष्टैव–घ,
१८–सायुधास–क, सायंधः–घ,
१९–निवेश्या चासने–क, निवेश्याथासने –ग
२०–हसमानास्ते–ग, घ, सुसमासीनम्–घ,
२१–विचक्षणान् –क, विचक्षणम् –घ,
२२–तदसूयपराः– क, ग,

ततः प्रणम्य तं राजा कृताञ्जलि[२३] –पुटो मुदा। प्रोवाच तत्त्वजिज्ञासुस्तत्त्वज्ञं सपुरोहितः ।।२०।।
भक्तवत्सल योगीश निगमार्थविदां वर ! त्रिषु देवेषु को देवः परतत्त्वं वदस्व मे ।।२१।।
तच्छ्रुत्वा[२४] विष्णुचित्तोऽपि श्रीधरं जगतां पतिम् । हृत्पङ्कजस्थं सम्प्रार्थ्य [२५] प्राह तत्कृपया वचः ।।२२।।
नारायणः परं ब्रह्म तत्त्वं नारायणः परम्[२६]। नारायणः परो ध्याता ध्यानं नारायणः परम्[२७] ।।२३।।
सर्वशेषी सर्ववपुः सर्वज्ञः सर्वगोऽव्ययः। लक्ष्मीपतिरनाद्यन्तः शाश्वतः[२८] पुरुषोत्तमः ।।२४।।
स एव परमं तत्त्वं सत्यं सत्यं न संशयः। नारायणात्परं दैवं[२९] नास्ति नास्ति नृप [३०] द्विजाः ।।२५।।
इदं सत्यमिदं सत्यं सत्यमेव[३१] वदाम्यहम् । एवमुक्ते विष्णुचित्ते हेमशुल्कं महत्तरम् ।।२६।।
पपात शिरस[३२] –स्तस्य पुष्पवृष्टिः पपात च। नेदुर्दुन्दुभयश्चापि ननृतुश्चाप्सरः स्त्रियः ।।२७।।
तदा[३३] प्रहृष्टो राजेन्द्रः परमाह्लादनिर्भरः[३४]। तत्पादपद्मयोराशु दण्डवन्निपपात सः ।।२८।।
संस्तुत्य स्तुतिभिर्दिव्यै[३५]–रलङ्कृत्य महोज्ज्वलैः। भूषणैर्वस्त्रगन्ध[३६]–स्रङ्मालिका [३७]–भिर्मुनीश्वरम् ।।२९।।
औपवाह्यमहानागमारोप्याऽनर्घ्यभूषणैः[३८] । पुरीं प्रस्था [३९] –पयामास चतुरङ्गबलैः सह ।।३०।।
तदा सर्वेश्वरो विष्णुः कोटिकन्दर्पसुन्दरः। श्रिया सह समारूढः पतगेन्द्रं त्रयीतनुम् ।।३१।।
पद्मसूतिभवेन्द्रादिप्रमुखैऋर्षि [४०]–भिर्युतः। जगाम मधुरां[४१] दिव्यां सर्वमङ्गलशोभिताम् ।।३२।।
तं द्रष्टु[४२]– कामः सहसा गजस्कन्धगतं मुनिम्[४३]। सौन्दर्यस्याऽस्य वेषस्य वैभवस्य[४४] रमापतेः[४५] ।। ३३।।
दृष्टिदोषो भवेन्नेति[४६] चिन्तयन् [४७] तन्निरासितुम् [४८]। मङ्गलाशासनं तस्य कर्तुमुद्युक्तवान् मुनिः ।।३४।।
गजघण्टे समागृह्य तालान् कृत्वा मुदान्वितः । साम[४९] –गानस्वरेणेदमुवाचाऽऽ[५०]नन्दसंप्लुतः[५१] ।।३५।।
सुमङ्गलं मङ्गल[५२] –मीश्वराय ते सुमङ्गलं मङ्गलमच्युताय ते।

सुमङ्गलं मङ्गलमन्तरात्मने सुमङ्गलं मङ्गलमब्जनाभ ते।। ३६।।

सुमङ्गलं श्रीनिलयो[५३] –रुवक्षसे सुमङ्गलं पद्मभवादिसेविने[५४]।

सुमङ्गलं सर्व[५५]–जगन्निवासिने सुमङ्गलं चाश्रितमुक्तिदायिने ।।३७।।

२३–पुटम् –क, ग,
२४–तत् श्रुत्वा–घ,
२५–संप्राप्य–क,
२६–परः– घ,
२७–परः– क, घ,
२८–शास्वतः –क,ग,
२९–देवम् –क,
३०–नृपा –क,
३१–सत्येनैव–क, घ,
३२–सिरसस्तस्य–क,
३३–ददौ–घ,
३४–निर्भराः– क,
३५–भव्यैर–ग, घ,
३६–गन्धैः –क,
३७–स्रक् आलेपैश्च–घ,
३८–तोद्य भूषणैः–क, मारोप्यातेद्य भूषणैः– ग,
३९–पर्यापयामास–क, ग,
४०–प्रमुखैः ऋषिभिर् –क, ग, घ,
४१–मथुराम् –ग
*– इयं पङ्क्तिः– क, घ, मातृकयोर्नोपलभ्यते
४२–दृष्ट्वा कामः– क,
४३–गतो मुनिः–क,
४४–सहजस्य –घ
४५–जगत्पतेः–ग,
४६–भवेतेति–क, ग,
४७–चिन्तयन्तम् –ग, घ,
४८–न निरासितुम् –क, निरासितुम्–ग,घ,
४९–समागान –क,
५०–णेद उवाचा–क,
५१–नन्दनप्लुतः –क,
५२–ममलमी–क
५३–श्रीनिलयो सुवक्षसे–क,
५४–सेविते–क, घ,
५५–पद्म–ग, घ,

चाणूर[५६]–दर्पघ्नसुबाहुदण्डयोः सुमङ्गलं मङ्गलमादिपूरूषे।
बालार्ककोटिप्रतिमाय ते विभो चक्राय दैत्येन्द्रविनाशहेतवे ।।३८।।

शङ्खाय कोटीन्दुसमानतेजसे शाङ्र्गाय रत्नोज्ज्वलदिव्यरूपिणे।
खड्गाय विद्यामयविग्रहाय ते सुमङ्गलं मङ्गलमाश्रिताय ते[५७*] ।।३९।।

सुमङ्गलं श्रीधररङ्गशायिने[५८] पादारविन्दाय च मङ्गलं च ते।
सुमङ्गलं माधव ते महिष्यै सुमङ्गलं मङ्गलमस्तु ते विभो[(*)] ।।४०।।

तदावयोस्तत्त्वविशिष्टशेष–शेषित्वसम्बन्धनिबोधनाय।
यन्मङ्गलानां च सुमङ्गलस्त्वम्[५९] पुनः पुनर्मङ्गलमस्तु सन्ततम् ।।४१।।
एवं कृत्वा हरेर्मौनी[६०] मङ्गलाशासनं मुदा। दिव्यप्रबन्धान् देवाय कृतवान् संयमीश्वरः ** ।।४२।।
तेन तुष्टो रमानाथः कृपयाऽवेक्ष्य तं मुनिम् । तस्य हृत्कर्णिकामध्ये विवेशाश्रितवत्सलः ।।४३।।
ततः सम्पूजितो राज्ञा वस्तुभिर्बहुभिर्मुनिः। तमनुज्ञाप्य राजानं स्वां पुरीं प्रययौ द्रुतम् ।।४४।।
श्रुत्वा पौरजनाः सर्वं भट्टनाथस्य वैभवम् । पुरीं सुमङ्गलाङ्कृत्य[६१] सेवितुं[६२] तु विनिर्ययुः[६३] ।।४५।।
प्रत्युद्गतैः[६४] पौरजनैः[६५] पूजितः स यथाविधि। प्रविवेश पुरीं श्रीमान् गजयानेन[६६] योगिराट् ।।४६।।
वटपत्रशयानस्य[६७] देवदेवस्य शाङ्र्गिणः[६८]। मन्दिरं प्राप्य मौनीशः प्रणम्य हरिमव्ययम् [६९] ।।४७।।
तद्धनं तं च हस्तीन्द्रं समर्प्य स्वामिने तथा। तत्कैङ्कर्यरतो भूत्वा तमेवाराधयन् स्थितः ।।४८ ।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
पञ्चविंशोऽध्यायः ।।२५ ।।

५६–चानूर–क,
५७–नः –क,
*–इयं पङ्क्तिः ग–मातृकायां नोपलभ्यते।
५८–शायि–क
(*)–अस्य श्लोकस्य प्रथमद्वितीय –
तृतीयपादाः–ग मातृकायां नोपलभ्यन्ते।
५९–सुमङ्गलं त्वत्–ग,घ,
६०–मौनि–क
**–दिव्य–प्रबन्धान् गायमानः
देवाय संयमीश्वरः –घ
६१–पुरीं मङ्गलं कृत्य तत्पाद–क,
पुरीमलंकृत्य तदा–घ,
६२–शेवितुः– क,
६३–ययौ–क,ग,
६४–स्तुतैः प्रत्युद्गतैः–क,
६५–पौरैः –क,
६६–जानेन–क,
६७–सयानस्य–क,
६८–साङ्र्गिणः– क,
६९–हरिमन्दिरम् –क

षड्विंशोऽध्यायः

श्रीनारायण उवाच

एवं कैङ्कर्य-निरतो विष्णुचित्तो हरिप्रियः। कृतकृत्योऽपि सततमिन्द्रियाणां कृतार्थताम् ।।१।। सञ्चिन्त्य कमलाभर्तुः कर्मणान्यन्य[1] -गामिना। कृतार्थयितु[2] -मारब्धः करणानि स्वकानि[3] सः ।।२।। तुलसीनन्दनवनं गत्वा पूर्व[4] यथा मुनिः। दृढमावरणं कुर्वन् कुल्याश्चैव[5] तथैव सः।।३।। आलवालानि मूलेषु कुर्वाणः[6] पुष्प[7]-शाखिनाम् । वनं संरक्षयंस्तस्थौ स्वपुत्रमिव सन्ततम् ।।४।। ततः खनित्रमादाय तुलसीमूलभूतलम् । खनति[8] क्षितिं विप्रेन्द्रे विष्णुचित्ते महात्मनि ।।५।। आषाढे पूर्वफाल्गुन्यां शुभलग्ने शुभे दिने। तुलसीमूलमेदिन्यामदृश्यत शुभावहा[9]।।६।। बाला भूम्यंशजा पूर्णचन्द्ररेखेव शारदी[10]। दृष्ट्वा मरकतश्यामां दिव्यलक्षणलक्षिताम् ।।७।। गृहीत्वा सम्परिष्वज्य केयमस्याः कथं भवः[11]। इति चिन्तापरश्चासीत्तदा प्राहा[12]ऽशरीरिणी ।।८।। अस्याः समुद्भवं वक्ष्ये शृणु योगीश्वरेश्वर। सृष्ट्यादौ जलसम्मग्नां भुवं वीक्ष्य जनार्दनः।।९।। उद्धर्तुकामस्तां भूमिं वाराहं वपुरास्थितः[13]। महार्णवं प्रविश्याऽथ धरामुद्धृत्य भूधरः[14] ।।१०।। रराम स तया देव्या तदा तं प्राह भूः सती। तवेष्टाः के नरा लोके पूजा का कतमा प्रिया[15]।।११।। वदस्व देवदेवेश गुह्याद्गुह्यतमं त्विमम् । तच्छ्रुत्वा भगवानाह प्रियामालिङ्ग्य सम्भ्रमात् ।।१२।। शृणु[16] देवि[17] प्रवक्ष्यामि[18] रहस्यमिदमुत्तमम् । मत्कीर्त्तनपरा देवि ममेष्टा मत्समाहिताः।।१३।। प्रसूनपूजया[19] प्रीतिर्मम पूजास्वनुत्तमा[20] * । सुमनः[21] पूजापराणां गुणकीर्त्तनकारिणाम् ** ।।१४।। सर्वाभीष्टानाशु दत्वा प्रददे शाश्वतं पदम् *** । तच्छ्रुत्वा भगवद्वाक्यं भूदेवी हरिवल्लभा ।।१५।। प्रसूनमालिकापूजां करिष्ये श्रीपतेः प्रियाम् । कीर्त्तनं च करिष्यामि तस्यैव गुणकर्मणाम् ।।१६।। इति सञ्चिन्त्य मनसा त्वयि[22] योगीश्वरेश्वरे[23] । विश्वम्भरा जगन्माता जज्ञे[24] सीता यथा[25] पुरा ।।१७।। कृपया पोषयस्वैनां पुत्रिकां गुणशालिनीम् । स्थानं च शाश्वतं दिव्यं प्राप्स्यसे सर्वसिद्धि[26]-मान् ।।१८।। तच्छ्रुत्वाऽऽकाशवचनं प्रहृष्टो द्विजसत्तमः। गृहमागत्य भार्यायै प्रददौ पुत्रिकां शुभाम् ।।१९।।

१-कर्मणामन्यगामिना-घ
२-कृतार्थयतुमा-क
३-श्वकानि-ङ,
४-पूर्व-क,
५-कुल्यानि च-क, ग,
६-कुर्वान्-क
७-पुष्पसाशाखिनाम् -क,
८-खतन्ती-क,
९-सुभावहा-क,
१०-शारदा-क,
११-भवा -क, घ
१२-प्राह शरीरिणी-क,
१३-वाराहं च पुरा स्थितः -क,
१४-भूधराः- क,
१५-कतमः प्रियाः -क,
कतमप्रियाः स्तुतिः प्रिया -घ
१६-शृणुष्व -क, घ,
१७-देवी-क,
१८-वक्ष्यामि-क, घ
१९-प्रसूनपूजा मे प्रीतिः-ग,
२०-सर्वपूजास्वनुत्तमा-ग,
*-प्रसूनपूजानुत्तमा मम पूजा परायणान् -क
२१-सुमनः पूजा-ग, सुमपूजा-घ,
**-गुणकीर्त्तनकराणां हं प्रददे शाश्वतं पदम् -क
***-षड्क्तिरियं -क मातृकायां न प्राप्यते।
२२-नत्वा-घ,
२३-योगीश्वरेश्वर-क, योगीश्वरेश्वरम् -घ,
२४-जाता-क
२५-जथा-क,
२६-शिद्धिमान्-क

प्रोवाच तस्या[२७] वृत्तान्तं गृहीत्वा सा च पुत्रिकाम् । पुपोष परमप्रीतः[२८] पद्माभां पद्मलोचनाम् ।।२०।।
गोदाऽभिधानं[२९] कृतवांस्तस्याः प्रीतमनाः पिता। साऽपि संवर्द्धिता काले दिव्य–सौन्दर्यसंयुता ।।२१।।
सौशील्यादि[३०] –गुणैर्युक्ता यौवनारम्भ–विग्रहा। पितृवत् सन्ततं कृष्णगुणान् भद्रकरान् बहून ।।२२।।
गायन्ती तद्गतस्वान्ता हर्षेण परिपूरिता। तातेन सा वनं गत्वा लूत्वा पुष्पाण्यनेकशः[३१] ।।२३।।
नानाविधैः प्रसूनैस्तैः पूजयत्यनिशं हरिम् । पित्रा[३२] योगीशकल्पस्य पूजार्थं मालिकाः कृताः ।।२४।।
तस्मै समर्पयामास हरये वनमालिने। एवं कालं चिरं विप्रो बालिका[३३] भुक्तमालिकाः [३४] ।।२५।।
समर्पयत्नविज्ञाय स तस्थौ हरये मुनिः। तदा कदाचिद् धम्मिल्ले स्रजोऽलङ्कृत्य दर्पणे ।।२६।।
प्रतिच्छायां दर्शयन्ती[३५] ददर्श स्वात्मजां[३६] मुनिः। कथं धारयसे पुत्रि[३७] मालिकाः श्रीधरोचिताः ।।२७।।
इत्युक्त्वाऽन्याः स्रजः कृत्वा देवेशाय समर्पयत् [३८]। अभुक्तशेषा गोदायास्ताः स्रजो मधुसूदनः ।।२८।।
विसृज्य प्रहसन् देवो ययाचे[३९] विप्रपुङ्गवम् । त्वत्सुताभुक्तशेषास्ता मालिका एव देहि नः ।।२९।।
इत्येवं याचमानं तं प्रणम्याश्चर्यमानसः। ताः पुष्पमालास्तां पुत्री चार्पयद् हरये मुदा ।।३०।।
देवस्तु तुष्टहृदया मालास्ताः शिरसा[४०] वहन् । अहमेव वृणे कन्यामिमां कालेन मत्प्रियाम् ।।३१।।
तावत्तिष्ठतु ते गेहे कन्या भूम्यंश[४१]–सम्भवा। इति ब्रुवति सर्वेशे प्रणम्यानन्दनिर्भरः ।।३२।।
सह पुत्र्या ययौ गेहं[४२] स्वकीयं[४३] योगिसत्तमः। ततः कदाचित् सा गोदा नारायणपरायणा ।।३३।।
तत्कथाश्रवणासक्ता[४४] तत्पादन्यस्त[४५] –मानसा। पितरं तं समासाद्य प्रणिपत्येदमब्रवीत् ।।३४।।
अर्चावतारः सन्त्यत्र देवदेवस्य शाङ्र्गिणः। सुलभा[४६] मुक्तिदा लोकेऽसङ्ख्याः सर्वाधिकारिणाम् ।।३५।।
तेषु प्रसिद्धा[४७] –नाचक्ष्व शृणोमि श्रोत्रसौख्यदान् । येषां श्रवणमात्रेण मुक्तिं गच्छन्ति देहिनः ।।३६।।
एवं तां परिपृच्छतीं दृष्ट्वा संहृष्टवान् पिता। प्रशंस्य बहुभिर्वाक्यैर्जगादैवं वचः[४८] सुताम् ।।३७।।
इदं गुह्यतमं लोके ह्यर्चाव्यूहमनुत्तमम् । शृणुष्व ते प्रवक्ष्यामि श्रवणान्मोक्षदायकम् ।।३८।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
षड्विंशोऽध्यायः ।।२६।।

२७– तस्य–क,
२८–प्रीतौ–ग,
२९–विधानम् –क
३०–शौशील्यादि–क,
३१–नेकसः–क,
३२–पुष्पैर् –घ
३३–कन्यका–घ,मालिका–ग,
३४–कालिका–क,
३५–ददर्श–घ,
३६–स्वांसोप्यवेक्ष्यात्मजाम् –घ,
३७–पुत्री–क
३८–समर्पयेत् –क,
३९–उवाच –क,
४०–सिरसा–क,
४१–भूम्यांश–ग, भूम्यांस–क,
४२–गेहे–क,
४३–प्रहृष्टो–ख
४४–शक्ता–ग,
४५–तत्पादे–ख,
४६–सुलभान् –ख,
४७–सिद्धाना–क,
४८–च तां –क, ख,

सप्तविंशोऽध्यायः

श्रीविष्णुचित्त उवाच

श्रीवैकुण्ठे महालोके[१] वासुदेवः सनातनः। मुक्तैरष्टाक्षर[२] – मन्त्रोपासकैरात्मवेदिभिः ।।१।।
सारूप्यधारिभिः पुम्भिः सेवितः संस्थितः सदा। आमोदलोके परमे तथा सङ्कर्षणः स्थितः ।।२।।
प्रमोदाख्ये[३] निवसति प्रद्युम्नो भक्तवत्सलः। सामोदे परमे लोकेऽनिरुद्धः श्रितवत्सलः[४] ।।३।।
सदा तिष्ठति सद्भक्तैरानन्दमयविग्रहैः। सत्यलोके महाविष्णुः सर्वलोकशिरोमणिः[५] ।।४।।
द्वादशाक्षरमन्त्रज्ञैः सेव्यते[६] सुरसत्तमैः। पद्माक्षो भ्राजते लक्ष्म्या[७] सूर्यमण्डलमन्दिरे ।।५।।
अनन्ताद्यैर्नित्यमुक्तैः सूरिभिः परिसेवितः। दुग्धाब्धिमध्ये भोगीन्द्रशयने मणिमण्डपे ।।६।।
शेषशायीति भगवांश्छेते[८] विष्णुः सनातनः। श्वेतद्वीपे हरिः श्रीमान् तारकब्रह्मसञ्ज्ञकः[९] ।।७।।
देवर्षिभिर्नारदाद्यैः सततं वेदमूर्धिभिः[१०]। स्तूयते सनकाद्यैश्च देवैर्ब्रह्मभवादिभिः[११] ।।८।।
बदर्याम्राश्रितो देवः पावनायां[१२] नराग्रजः। नारायणो योगिवर्यैः सनकाद्यैर्मुनीश्वरैः ।।९।।
नारदाद्यैश्च सततं सेवितः सुरसत्तमैः। तेषां ज्ञानरहस्यार्थान् बोधयन् भक्तवत्सलः ।।१०।।
नैमिषे परमक्षेत्रे शौनकाद्यैर्महर्षिभिः[१३]। सम्पूजितस्तत्र[१४] योगे[१५] हरिस्तिष्ठति मुक्तिदः ।।११।।
हरिक्षेत्रे महापुण्ये शालग्रामस्वरूपवान् । ददन्मुक्तिं परां नृणां स्वाभिषेकाम्बुसेवनात् ।।१२।।
संस्थितो मुनि[१६] –कन्यायां गण्डक्यां मुदितो हरिः। अयोध्यायां महाभागः सानुजः सह सीतया ।।१३।।
सकृत्प्रपन्नजनसंरक्षणव्रतदीक्षितः। राघवो वसति श्रीमान् परमात्मा सनातनः ।।१४।।
मधुरायां[१७] बालकृष्णः प्रपन्नजनवत्सलः। मुनैः सम्पूजितः सर्वैः संस्थितः परमेश्वरः ।।१५।।
मायायां रमते देवो मधुघ्नो[१८] भक्तवत्सलः। कृपाब्धिः सिन्धुतनयासहितोऽभीष्टदो नृणाम् ।।१६।।
काश्यां भोगीन्द्रशयनो ब्रह्मरुद्रादिभिः सुरैः। पूजितस्तत्र भक्तेन संस्थितेन कपर्दिना ।।१७।।
तारकब्रह्ममन्त्रं स्वं दापयत्यनिशं नृणाम् । अवन्त्यामवनीनाथः कृपामूर्त्तिः शुभालयः ।।१८।।
आश्रिताघहरः श्रीमान् सेव्यते मुनिभिः सदा। द्वारावत्यां[१९] यादवेन्द्रः[२०] संस्थितो हरिरव्ययः[२१] ।।१९।।
शरण्यः सर्वलोकानां शरणागतवत्सलः। नन्दव्रजे सगोगोपवृन्दसुन्दरविग्रहः ।।२०।।
विहरत्यनिशं[२२] कृष्णो गोपस्त्रीभिर्यदूत्तमः[२३]। वृन्दावने मनोरम्ये नन्दसूनुर्महात्मभिः ।।२१।।

१–महल्लोके–क,
२–रष्टाक्षरी–घ, रष्टाक्षरो–क,
३–प्रमोदाखे–ख,
४–श्रितलक्षणः–क, घ,
५–सिरोमणिः– क, ख,
६–सेवितः–ख,
७–लक्ष्मी–ख,
८–भगवान्शेते–ख, ग, घ,
९–संज्ञितः –घ, संज्ञिकः– क, ख, ग,
१०–देवमूर्द्धिभिः–ख
११–देवे ब्रह्मात्मवादिभिः –क,
१२–पावनाय– ग, घ,
१३–सततं सेवितः सुरसत्तैर्महर्षिभिः–ख,
१४–संपूजीतश्च –ख
१५–योगेन–क, योग–ग,
१६–मनि–ख,
१७–मथुराख्ये–क,
१८–प्रद्युम्नो–क,
१९–द्वारवत्याम् –क, ग,घ
२०–जादवेन्द्रः–क,
२१–व्ययम् –क
२२–विरहत्यनिशम्–क,
२३–यदुत्तमः– ख, ग,

सम्पूज्यते[२४] भक्तवर्यैस्तच्चित्तस्तत्परायणैः। गोविन्दो योगिभिर्ध्येयः[२५] संस्थितः कालिये[२६] ह्रदे।।२२।।
गोवर्द्धने गिरिवरे गोपवेषो हरिः परः। तारयत्यखिलान् मर्त्यान् भवाब्धेः स्वस्य सेवया ।।२३।।
भवघ्ने स्मरतां नृणां भवघ्नः[२७] पद्म[२८]–लोचनः। कलौघहरणः[२९] श्रीमान् रक्षयत्यखिलान् जनान् ।।२४।।
गोमन्तपर्वते सानौ[३०] वननिर्झरशोभिते। सदाऽऽस्ते भगवांश्छौरिर्विकसत्कञ्जलोचनः ।।२५।।
हरिद्वारे महापुण्ये कलौघहरणे[३१] वरे। भक्तैर्जनौघैः सततं जगत्पतिरुपास्यते ।।२६।।
सितासिते महानद्यावुभे ते[३२] यत्र सङ्गते। तस्मिन् प्रयागे महति क्षेत्रे परम–पावने ।।२७।।
उमाधवाद्यैस्त्रिदशैर्माधवः सेवितः सदा। दर्शनात्सर्वलोकेभ्यो ददाति परमं पदम् ।।२८।।
गयायां तु पवित्रायां सर्वलोकाधिपो महान् । गदाधरा[३३]–ह्वयः श्रीमानास्ते सर्वफलप्रदः।।२९।।
क्षेत्रोत्तमे महापुण्ये गङ्गासागरसङ्गमे। विष्णुर्जगत्पतिः सर्वैः सेव्यते योगिभिर्वरैः।।३०।।
विचित्रकूटैर्बहुभिरुन्नतैः परिशोभिते। नानामृगगणाकीर्णे नानाकाननशोभिते ।।३१।।
चित्रकूटे महाशैले राघवः सहलक्ष्मणः। श्रितोऽभयप्रदः शत्रु[३४] –भयदाता जगत्पतिः ।।३२।।
सीतया क्रीडते[३५] सार्द्धं वाल्मीक्याद्यैर्निषेवितः[३६]। नन्दिग्रामे [३७] जनानन्दो[३८] राक्षसघ्नः सतां गतिः।।३३।।
उपासितो मुनिवरैर्बहुभिर्भक्तिशालिभिः। प्रभासे भासुरक्षेत्रे देवब्रह्मर्षिसेविते ।।३४।।
विश्वरूपोऽधिवसते विश्वकृद् विश्वभावनः।। श्रीकूर्म[३९] श्रीकरं पुण्यं सरोवर–विराजितम् ।।३५।।
अध्यास्ते श्रीकरः श्रीमत्कूर्मरूपधरोऽव्ययः। नीलाद्रौ[४०] महति क्षेत्रे सर्वलोकैकपावने ।।३६।।
देवर्षिगणगन्धर्वयक्षकिन्नरसेविते। बलभद्रसुभद्राभ्यां भगवान् पुरुषोत्तमः ।।३७।।
सेवया स्वप्रसादस्य पतितानामपि प्रभुः। ददन्मुक्तिं दयासिन्धुः श्रीमान् पतितपावनः ।।३८।।
निवसत्यखिलात्मेशः सर्वलोकैकनायकः। सिंहव्याघ्रगजाकीर्णे पुण्यतीर्थोपशोभिते ।।३९।।
सिंहाद्रौ श्रीमहासिंहः स्तूयते देवतागणैः। तुलसीकानने रम्ये दिव्यगन्ध[४१]–मनोहरे ।।४०।।
नाम्ना गदीति[४२]विख्यातो भगवान् कमलेक्षणः। कृतशौचे महापुण्ये स्मृतः पापहरो हरिः।।४१।।
श्वेताचले[४३] नृसिंहोऽत्र जलगौडं[४४] पिबन् सदा। भुक्तिमुक्तिप्रदो नृणां सर्वेषामपि तिष्ठति[४५]।।४२।।
पारमात्म्ये[४६] महाक्षेत्रे साक्षान्ना –रायणः स्मृतः। गोदावरीतटस्थायां धर्मपुर्यां दयानिधिः।।४३।।
योगानन्द इति प्रोक्तो नृसिंहो भक्तवत्सलः[४७]। कृष्णवेणी[४८] – नदीतीरे काकुले त्वान्ध्रनायकः[४९] ।।४४।।
अहोबले सुपर्णाद्रौ[५०] हिरण्यकशिप्वन्तकः[५१]। पाण्डुरङ्गोऽरविन्दाक्षो विठ्ठलः[५२] परिकीर्त्तितः ।।४५।।

२४–संपूजिते–क,
२५–ध्ययो–क, ख,
२६–कालियह्रद–घ
२७–भवघ्नो–क,
२८–भक्तलोचनः–क, ग, घ,
२९–कलि अघहरणः (आर्षसन्धिः),
३०–शानौ–क,
३१–कल्येनोहरणे–घ
३२–बभूतां–ग,
३३–गदाधरहरिः–क, ख,
३४–सर्वा–,ख, शची–क,
३५–क्रीडिते–क,
३६–निसेवितः–ख,
३७–नन्दीग्रामे–ख,
३८–जनानन्दे–क, ख,
३९–श्रीकूर्मे–ख
४०–नीलाद्रै–ख,
४१–गन्ध–घ
४२–गदिन–क, ख, ग,
४३–स्रोताचले–ग, स्तोताचले–घ,
४४–जलगौदं–क, जलं गंगोदकं–ख,
४५–मवतिष्ठते–घ, मद्यतिष्ठति–ग,
४६–परमात्मे–ख, ग, परमात्म–घ,
४७–भक्तिवत्सलः–क,
४८–वेणा–ग,घ, ४९–नायकम् –घ,
५०–सुवर्णाद्रौ–ख,
५१–कशिपान्तकः –क, ख, ग, कशिपुघातकः–घ,
५२–विठ्ठलः– क, ख,

श्रीवेङ्कटाद्रिशिखरे [५३] वनराजि[५४] – विराजिते। अष्टोत्तरसहस्रैश्च पुण्यतीर्थैः समन्विते ।।४६।।
स्वामिपुष्करिणीतीरे श्रीनिवासः श्रियोज्ज्वलः। अनन्तकल्याणगुण[५५]–परिपूर्ण [५६]–सुधाम्बुधिः ।।४७।।
अरीणां[५७] विकटानां च काणाना[५८] मप्यभीष्टदः । ददन्मुक्तिमपि श्रीमान् रमया रमते हरिः ।।४८।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
सप्तविंशो ऽध्यायः ।।२७।।

———

५३ –शिषरे–क,
५४ वनराजी–ग, घ,
५५- गुणः–घ,
५६–पूर्णः–घ,
५७–आरायाम् –क, ख, अन्धानां–घ,
५८–करणमप्यभिष्टदः– ख

अष्टाविंशोऽध्यायः

श्रीविष्णुचित्त उवाच

ततो[१] यादवशैलेन्द्रे[२] परमेशः परात्परः। नारायण इति प्रोक्तः सदा भक्तैरुपासितः ।।१।।
घटिकाद्रौ श्रीनृसिंहो घटिकामात्रसेवया। मनुजानां ददन्मुक्तिं तिष्ठत्याश्रितवत्सलः ।।२।।
वेगवत्या महानद्यास्तटे पुण्ये मनोहरे। श्रीहस्तिशैलशिखरे[३] काञ्च्यां योगीन्द्रसेविते ।।३।।
भगवान् भक्तमन्दारः श्रितानां वरदायकः। वरदः सर्वलोकेशो देवराजो[४] दयानिधिः ।।४।।
प्रणतार्तिहरः श्रीमांश्छि या सह विराजते[५]। तस्मिन्नेव पुरे दिव्ये हरिः कमललोचनः ।।५।।
यथोक्तकारी[६] च तथा परमेशः पुराश्रयः[७]। तथा पाण्डवदूतश्च नृसिंहश्च त्रिविक्रमः ।।६।।
प्रवालवर्णदीप्त्याभौ द्वौ चाष्टभुजसञ्ज्ञकौ[८]*। श्रीगृध्रसरसस्तीरे स्मृतो विजयराघवः ।।७।।
दीक्षारम्ये[९] महापुण्ये शालिहोत्राश्रमान्तरे। हृत्तापनाशनसरस्तीरस्थो वीरराघवः ।।८।।
तोताद्रौ रङ्गशयननाम्ना भाति जगत्पतिः। गजस्थले गजार्तिघ्नः पूज्यते मुनिसत्तमैः ।।९।।
बलिपुर्यां पवित्रायां विराजति महाबलः। भक्तिसारे महाक्षेत्रे प्रोच्यते जगतां पतिः ।।१०।।
ऐन्द्रे महेन्द्रमुख्यैस्तु सुरैरभ्यर्चितः सदा। संस्थितो देवदेवेशः सर्वेषां कलुषापहः ।।११।।
गोपपुर्यां मनोज्ञायां गोपतिः परिकीर्त्तितः। श्रीमुष्णे[१०] श्रीमति[११] क्षेत्रे सद्भिः सेवितुमर्थिते ।।१२।।
महावराहरूपेण हरिरास्ते स्वयं प्रभुः। महिताख्ये महापुण्ये[१२] भ्राजते[१३] पद्मलोचनः ।।१३।।
मध्ये कवेरकन्यायाः[१४] द्वीपे महति पुत्रिके। श्रीरङ्गमिति विख्यातं सर्वलोकैकमङ्गलम् ।।१४।।
पावनं परमं पुण्यं क्षेत्राणामुत्तमोत्तमम् । तस्मिन् विमानमुत्तु[१५]-ङ्गाम्नायशृङ्ग[१६] -विराजितम् ।।१५।।
अस्ति[१७] रत्नमयं रम्यं प्रणवाकारमव्ययम् । तन्मध्ये पन्नगाधीशवपुःपर्यङ्कमध्यगः[१८] ।।१६।।
कृपारत्नाकरः श्रीमान् नतचिन्तामणिः प्रभुः। श्रिया च भूमिनीलाभ्यां[१९] शेते श्रीरङ्गनायकः ।।१७।।
इक्ष्वाकोर्वरदः साक्षात्[२०] परं ब्रह्म परात्परः। योगिनां भजितुं योग्यो दृष्टेन चार्त्यघापहः[२१] ।।१८।।
स एव परमं ब्रह्म तदेव परमं पदम् । सा कावेर्येव विरजा तस्मात् तत्रैव माधवः[२२] ।।१९।।

१–श्रुतो–घ,
२–शैलेन्द्रो–क,
३–शिषरे–क,
४–देवराज–ग,
५–विराजिते–क,ख, विराजितः– ग,
६–कारि–क, ख,
७–पुरालयः– ग, घ,
८–संज्ञिका–ग, संज्ञिकौ–क,
*–प्रबालवर्णदीपाभौ मेघाकारं शुभाकरम् शेषाकारं सुशोभितं प्रवालवर्णदीपाभः काञ्च्यामष्टादसाख्यतः –क
९–वीक्षारण्ये–ग,
१०–श्रीमुखे–क,
११–श्रीमते–क,
१२–महास्थाने–क,
१३–भ्राजिते–क, ग, घ,
१४–कुवेरकन्याया–क,
१५–पुतंगा–क, ग,
१६–श्रंग–क, सृंग–ग,
१७–अति–क,
१८–मध्यगम् –क, घ, मध्यमः –क,
१९–लीलाभ्याम् –घ,
२०–साक्षी–क
२१–इष्टेनार्त्यगापहः– क, दृष्टेनार्त्ति अघापहः –ग, घ,
२२–मानवा–क, मानवः– ग

मोक्षार्थि [२३] – सेवितः[२४] सुभ्रुः[२५] श्रीवैकुण्ठे[२६] यथा तथा। श्रीरामाख्ये पदे दिव्ये जानकीरमणः स्मृतः ।।२०।।
श्रीनिवासस्थले पूर्णे पूर्ण इत्युच्यते बुधैः। लसत्सुवर्णनगरे सुवर्णास्यो[२७] हरिः परः ।।२१।।
शुभदे व्याघ्रनगरे महाबाहुरवस्थितः। आकाशनगरे चित्रे हरिस्तत्र समाश्रितः[२८] ।।२२।।
उत्पलावर्त्तकक्षेत्रे शौरि[२९] – स्तिष्ठति शाश्वतः[३०]। मणिकोट्यां [३१] मनोज्ञायां विरोचति महाप्रभुः ।।२३।।
विश्रुते [३२] कृष्णनगरे महाकृष्ण इति श्रुतः। विष्णु[३३] – स्थाने तु विमले भक्तिदः परिकीर्त्तितः ।।२४।।
विष्णोः पदे श्रीकृष्णो लक्ष्मीनारायणः स्मृतः। श्वेताद्रौ[३४] सुरुचिरे[३५] तु शान्त [३६] –मूर्त्तिरितीरितः ।।२५।।

अग्निहोत्रपुरे श्रेष्ठे प्रोच्यते वै सुरप्रियः। भर्गस्थाने भार्गवाख्यः[३७] सेव्यते सुकृतैर्जनैः।।२६।।
वैकुण्ठाख्ये महाक्षेत्रे माधवः पूज्यते बुधैः। श्रीमान् भक्तसखः प्रोक्तो गरिष्ठे पुरुषोत्तमे[३८] ।।२७।।
सुदर्शन इति ख्यातश्चक्रतीर्थे जनार्दनः। कुम्भकोणे पुण्यतमे शुभे सर्वाघनाशने ।।२८।।
शाङ्र्गपाणिरिति ख्यातो मुक्तिदः सर्वदेहिनाम् । भूतस्थाने[३९] भूतिकरे [४०] शाङ्र्गी निवसति प्रभुः ।।२९।।
कलुषघ्ने कपिक्षेत्रे गजास्निघ्नाह्वयो हरिः। गोविन्दो योगिभिर्ध्येयः[४१] संस्थित[४२]– श्चित्रकूटके ।। ३०।।

अनुत्तमाह्वयो विष्णुरुत्तमायां सदा स्थितः। विचित्रशिखरे[४३] श्वेत[४४] – पर्वते पद्मलोचनः ।।३१।।
पार्थस्थले हृषीकेशः परब्रह्मेति कीर्त्यते। कृष्णकोट्यां मधोर्वैरी मुनिभिः पूज्यते सदा ।।३२।।
महानन्दो नन्दपुर्यां ब्रह्माद्यैः परिसेव्यते[४५]। वृषाश्रयाख्यो भगवान् वृद्धपुर्यां विराजते [४६] ।।३३।।
उत्तमे सङ्गमग्रामे श्रीधरोऽसङ्ग उच्यते। शरण्याख्यो हरिर्देवः शरणग्राम उच्यते[४७] ।।३४।।
सिंहक्षेत्रे महापुण्ये श्रीनृसिंहो विराजते[४८]। मणिमण्डपे महाक्षेत्रे मल्लारि[४९] – रिति विश्रुतः [(*)] ।।३५।।
निविडाकारो [५०] भगवान् निविडे च विराजते[५१*]। धानुष्के[५२] धर्मदक्षेत्रे विभाति जगदीश्वरः ।।३६।।
कालमेघाह्वयो देवो मौद्गरेऽति मनोहरे। मधुरानगरे[५३] श्रेष्ठे सुन्दरः शोभते [५४] महान् ।।३७।।
भ्राजते परमस्वामी[५५]पुण्ये वृषभपर्वते। श्रीमद्वरगुणे क्षेत्रे नाथनामा हरिः स्थितः ।।३८।।
कुरुकायां महापुर्य्यां विद्योतति रमासखः। गोष्ठीपुरवरे[५६] श्रेष्ठे गोष्ठी [५७] पतिरधिष्ठितः ।।३९।।

२३–मोक्षार्थी –क, ग,
२४–वसत् –क,
२५–छुभ्र–क, शुभ्रु–ग,
२६–वैकुण्ठम् –ग,
२७–सुवर्णाख्यो–क, २८–विराजितः– ग, घ
२९–सौरिः –ग, घ,
३०–साश्वतः– क,
३१–कोटर–क,
३२–विश्रुत्ये–क
३३–किंतुस्थाने–क,
३४–श्वेतहदे –क
३५–शुरुचिरे–क,
३६–शांति–क,
३७–भार्गवाख्ये–क, ग, घ
३८–पुरुषोत्तमः –घ,
३९–भूतिने–क, ग, भूतिस्थाने–घ,
४०–भूतस्थाने–क, ग, घ
४१–ध्येयः –क,
४२–संस्थितो –क,
४३–शिषरे –क,
४४–स्वेत –क
४५–परिसेविते–ग, घ,
४६–विराजितः –क,
४७–उत्तमे–ग,
४८–विराजिते–क,
४९–मल्लारीरिति–क
(*)–श्लोकोऽयं ग–मातृकायां नोपलभ्यते।
५०–निविडाख्येति–घ,
५१–विराजितः– क
*–इयं पङ्क्तिः– ग – मातृकायां नोपलभ्यते
५२–धनुष्के– क,
५३–मथुरा– ग, घ,
५४–शोभिते–क,
५५–स्वामि–ग, घ,
५६–गोष्ठि–ख, गोष्ठीपुरवर–क, ग,
५७–गोष्ठि–ख,

पावने दर्भशयने[५८] शयानो[५९] भाति राघवः। धन्वीमङ्गलके दिव्ये शौरि[६०]– रास्ते जगत्पतिः ।।४०।।
श्रीमति भ्रमरस्थाने बलाढ्यो भ्राजति प्रभुः। पूर्णेन्दुवदनः पूर्णः कुरङ्गे लोकमङ्गले ।।४१।।
सर्वज्ञः सर्वगो विष्णुस्तिष्ठत्येको वटस्थले[६१]। क्षुद्रनद्यां पवित्रायामच्युतः[६२] परिकीर्तितः ।।४२।।
अनन्तशयने भद्रप्रदेशे पाप[६३]– नाशने। पद्मनाभो ददन्नेत्रं[६४] परश्रेयसि[६५] संस्थितः ।।४३।।
एवमादिषु देशेषु ग्रामे ग्रामे गृहे गृहे। अर्चाविग्रह[६६]– रूपेण स्थित्वा सर्वेश्वरो हरिः !।४४।।
पूजामात्रेण सर्वेषां ददाति परमं पदम् । परस्वरूप[६७]– व्यूहेभ्यो विभवेभ्योऽन्तरात्मनः ।।४५।।
अर्चास्वरूपाः[६८] सौलभ्या[६९] मुक्तिं ददति[७०] देहिनाम् । तदग्रे भुक्तसङ्गन्धवासोऽलङ्कारचर्चिताः [७१] ।।४६।।

तदर्पितान्नं भुञ्जन्तो जित्वा मायां दुरत्ययाम् । गच्छन्ति परमं स्थानं योगिनामपि दुर्लभम् ।।४७।।
यत्र यत्रापि पूज्यते[७२] हरेरर्चा शुभावहा। तदेव परमं स्थानं सैव [७३] विष्णुः परात्परः ।।४८।।
अर्चास्वरूपिण [७४] – श्चापि परं धामाधिपस्य [७५] च। नास्त्येव न्यूनमाधिक्यं भेदो वा नास्ति पुत्रिके।। ४९।।

चक्षुर्गम्यं तु सर्वेषामर्चारूपं[७६] हरिं विभुम् । योऽवमन्येत दुष्टात्मा सौलभ्यान्मुक्तिदायकम् ।।५०।।
धर्मार्थ[७७]– कामान्नोपेयान्न[७८] परं चाधिगच्छति। तस्मादर्चास्वरूपस्य हरेर्वात्सल्यशालिनः ।।५१।।
कैङ्कर्यमेव मोक्षस्य सद्यः फलित[७९]– साधनम् । संसारसागराद् [८०] घोरात्तर्तुकामाः सुदुस्तरात् ।।५२।।
अर्चास्वरूपिणं देवमर्चयन्ति सदा बुधाः। ब्रह्मापि विश्वसृग् [८१] धाता विष्णोर्ज्ञानाधिको महान् ।।५३।।
अर्चाविग्रहपूजैव सुलभा मोक्षदायिनी*। इति विज्ञाय रङ्गेशं त्रिकालं पूजयेत् सुधीः** ।।५४।।
शिवोऽपि सततं काश्यां माधवं कल्मषापहम् । गन्धपुष्पैर्धूपदीपैर्भक्त्या पूजयति प्रभुम् [८२] ।।५५।।
महेन्द्रश्च[८३] हरिं देवमर्चारूपं[८४] शिलाकृतिम् *** । प्रत्यहं पूजयित्वा तं ततो याति त्रिविष्टपम् ।।५६।।

योगिनः सनकाद्याश्च नारदाद्याः सुरर्षयः। ब्रह्मर्षयो वसिष्ठाद्या[८५] भूसुरा [८६] ब्रह्मवादिनः ।।५७।।
सर्वे भरतखण्डेऽस्मिन् पर्वतेषु नदीषु च। अर्चारूपं हरिं नित्यं त्रिकालं पूजयन्ति हि ।।५८।।

५८–सयने–क,
५९–सयानो–क, शयने–ग, शयनो–घ,
६०–शौरी –ख
६१–तटस्थले–ग, घ,
६२–पवित्रायां अच्युतः –क, ख, ग
६३–षाद्य –क, ख,
६४–ददन्नत्र –क, ग, पद्मनेत्र– ख,
६५–परत्रश्रेय–क, परत्रश्रेयसे–ख,
पर त्रश्रेय–ग,
६६–अर्चावतारूपेण–ग, घ,
६७–परस्वरूपाद्देहेभ्यो–ग, घ,
६८–स्वरूपः– क, ख
६९–सौलभ्यो–क, ख,
७०–ददाति–क, ख,
७१–तस्योपभुक्त–क, ख
७२–यत्राभिपूज्येत–क,
पूज्येत – ग, घ, ७३–स च–घ,
७४–आर्चापिरूपिणं हरेश् –क,
अर्चारूपिहरेश–ख,
अर्चादिरूपिणश्–घ,
७५–धामाविधस्य–ख,
७६–सर्वेषां अर्चारूपं –क, ख, ग, घ,
७७–धर्मार्थ–क,
७८–नोपायान् –घ,
७९–फलति–क, ख,
८०–संसारसागराम्भोधेः – ग, घ,
सृदुधाता–क,
सृक्धाता ख, सृक्कर्त्ता –ग, सृट्कर्त्ता–घ,
*–इयं पङ्क्तिः – क, ख, मातृकयोर्न प्राप्यते।
**–अर्चाविग्रहमास्थाय पूजयेत्सततं सुधीः– क, ख,
८२–प्रभुः– ग,
८३–महेन्द्रश्चापि –क,
८४–देवं अर्चा – क, ख,
***–इयं पङ्क्तिः– ग – मातृकायां नोपलभ्यते।
८५–वशिष्ठाद्या–क, ख,
८६–भासुरा – क, ग, घ,

त्वं नित्यं पूजयस्वाद्यमर्चाविग्रहरूपिणम् । गन्धैः पुष्पैस्तुलस्या च नैवेद्यैश्च पृथग् [८७] – विधैः ।।५९।।
अर्चास्थानानि दिव्यानि वाचा नित्यं पठन्ति ये । शृण्वन्ति श्रोत्रयुग्मेन स्मरन्ति मनसा सदा ।।६०।।
ते प्राप्नुवन्ति परमं पदं विष्णोः सुदुर्लभम् ।। ६१।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये –
ऽष्टाविंशो ऽध्यायः ।।२८।।

———

८७–प्रथग् –क

एकोनत्रिंशो ऽध्यायः

श्रीनारायण उवाच

एवं गोदा महाभागा जनकेन महात्मना । अर्चाव्यूहांश्छ्रियः[१] पत्युः श्रुत्वा प्रमुदिताऽभवत् ।।१।।
ततो[२] ऽर्चाः संस्मरन्ती[३] सा गायमाना दिवानिशम् । तद्गतेनैव मनसा नान्यं सस्मार सुन्दरी ।।२।।
सर्वार्चामूर्त्तयः श्रीमद्रङ्गनाथमया इति। मत्वा तमेव रङ्गेशममंस्त[४] रमणं सदा ।।३।।
सदा स्मरन्ती[५] रङ्गेशं तच्चित्ता तत्परायणा। संस्तुवन्ती[६] हरिं दिव्यैः प्रबन्धैर्भगवत्प्रियैः ।।४।।
बभूव तन्मया देवी कन्दर्पशर[७] – पीडिता। एवं स्थितायां गोदायां रङ्गनाथो जगत्पतिः ।।५।।
वैनतेयं समारुह्य नित्यमुक्तैर्महात्मभिः । पद्मासनभवाद्यैश्च देवैर्ब्रह्मर्षिभिः सदा ।।६।।
सिद्ध[८]– चारणगन्धर्वैः सेव्यमानोऽप्सरोगणैः। वन्दिभिः स्तूयमानः सन् [९] छत्रचामरशोभितः ।।७।।
परिणेतुं[१०] ययौ गोदां धन्वीनगरमुत्तमम् । विष्णुचित्तो महायोगी पौरैः परिवृतस्तदा ।।८।।
प्रत्युज्जगाम संहृष्टो ननाम च पुनः पुनः। विनयेन समानीय रङ्गेशं[११] भक्तवत्सलम् ।।९।।
प्रवेशयामास गृहं महेन्द्रभवनोपमम् । तत्र सिंहासनासीनं कृत्वा योग[१२] – विदां वरः ।।१०।।
पूजयामास विधिवदर्घ्यपाद्यादिभिर्हरिम् । ततो देवीमलङ्कृत्य गन्धपुष्पाक्षतादिभिः ।।११।।
तस्यामग्निं प्रतिष्ठाप्य हावयामास शास्त्रतः। ततो गोदां समानीय भूषितां भूषणोत्तमैः ।।१२।।
अग्नेः समीपे[१३] देवाय[१४] मन्त्रोच्चारण[१५] – पूर्वकम् । श्रीरङ्गनाथो गोदायाः पाणिं सङ्गृह्य पाणिना ।।१३।।
लाजा[१६] – होमादिकं सर्वं ततः कृत्वा यथाविधि। अग्निं प्रदक्षिणी[१७] – कृत्य मुमोद सह भार्यया ।।१४।।

विष्णुचित्तेन महता देवतैः सह पूजितः। कासाराद्यैर्योगिमुख्यैर्विवाहं द्रष्टुमागतैः ।।१५।।
तमनुज्ञाप्य योगीशं गोदया सह रङ्गराट् । श्रीरङ्ग[१८] – निलयं प्राप[१९] सदेवः [२०] सपरिच्छदः[२१] ।। १६।।
श्रीभूमिनीला [२२] – गोदाभिः स तत्र रमयन् सदा । शयानो भोगिशयने तस्थौ मुक्तिं ददन्नृणाम् [२३] ।। १७।।
विष्णुचित्तो महाभागः श्वसुरो रङ्गभूपतेः। तत्कैङ्कर्यं सदा कुर्वंस्तस्थौ दास्यैकजीवनः[२४] ।।१८।।

१–व्यूहान् श्रियः – क, ख, ग, घ,
२–ततो अर्चा–ख,
३–स्मरन्ती –क, स्मरन्ति–ख,
४–रङ्गेशं ममंस्त–क, ख,
५–स्मरन्ति –क, ख,
६–संस्तुवन्ति–ख,
७–सर – क, ख,
८–सिद्ध – क
९–सन् छत्र–क, ग, घ,
१०–परिणयतु–क,
११–रंगिणम् –ग, घ,
१२–योगिविदां–क
१३–समीपम् – ग,
१४–देवीय– क,
१५–मन्त्रोच्चारणसत्कृतम् –घ,
१६–लाजहोमा – क, ग, घ,
१७–प्रदक्षिणं कृत्य– क, ग,
१८–श्रीरंगे–क,
१९–प्राप्य –क,
२०–सदेवैः– क, ग,
२१–सा परिछदैः– क, सपरिछदैः– ग,
२२–लीला – ग, घ,
२३–मुक्तिप्रदोनृणाम् –घ
२४–तस्यैक –क

चरित्रमेतत्कलिकल्मषापहम् ।
मुक्तिप्रदं[२५] श्रीहरिचित्तयोगिनः।
पठन्ति शृण्वन्ति लिखन्ति[२६] ये जनाः
व्रजन्ति लक्ष्मीशपदं च सम्पदः ।।१९।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्य
एकोनत्रिंशो ऽध्यायः ।।२९।।

२५–परम् –क,
२६–वदन्ति- क, लिषनति–ग

त्रिंशो ऽध्यायः

श्रीनारायण उवाच

महाभाग नर श्रीमन् वक्ष्येऽहमपरां कथाम् । श्रोतृणां विस्मयकरां शृणुष्वैकाग्रचेतसा ।।१।।
दुष्टकर्म सुकर्म[1] स्यात्परकालस्य योगिनः। वैष्णवाराधनान्नित्यं कथा सा श्रूयतां त्वया ।।२।।
चोलदेशे[2] सुरम्ये[3] कमला[4] – पूर्णाख्यपत्तने[5]। कार्त्तिके कृत्तिकायां तु जातो[6]ऽशः शार्ङ्गधन्वनः ।।३।।
परकाल इति ख्यातः प्रजज्ञे[7] भगवत्प्रियः। कालेन वर्द्धितो[8] भूत्वा योगिविद्याविशारदः ।।४।।
धर्मज्ञः परतत्त्वज्ञो भगवद्धर्मकोविदः। नीतिशास्त्रविशेषज्ञः सत्यवादी महाबलः ।।५।।
सर्वशास्त्रार्थवित् प्राज्ञो युद्धमार्गविचक्षणः[9]। चोलराजो[10] महाराज्यभारं सर्वं समुद्वहन् ।।६।।
सदा हिते रतस्तस्य बभूवाऽमात्यसत्तमः। तस्मिन् काले नागपुरी – प्रान्ते फुल्लोत्पलाम्बुजे ।।७।।
मनोज्ञे श्वेतसरसि प्रफुल्ल[11] – कुमुदान्तरे। सरःस्थां बालिकां पद्मपत्राक्षीं पङ्कजाननाम् ।।८।।
कश्चिद् भागवतो दृष्ट्वाऽनपत्योऽपत्यकाङ्क्षया। तां गृहीत्वा स्वभार्यायै ददौ सा वर्द्धिता[12] तया[13] ।।९।।
तस्याः[14] सौन्दर्यशीलादिगुणांश्छ्रुत्वा[15] परान्तकः। तदासक्तमनाः[16] क्षिप्रं गत्वा नागपुरीं शुभाम् ।।१०।।
ययाचे पितरं तस्याः कन्यां देहीति सुव्रत। तं प्राह जनकः सम्यक् सम्पूज्यार्घ्यासनादिभिः ।।११।।
सहस्रं विष्णुभक्तानां भोजयेद् यस्तु सन्ततम् । तस्मै दास्याम्यहं कन्यां शङ्खचक्राङ्किताय वै ।।१२।।
इति पूर्वं प्रतिज्ञातं मया सद्धर्मकाङ्क्षिणा। तथा करिष्ये[17]ऽहमिति प्रतिज्ञाय परान्तक[18] ।।१३।।
गृहाण त्वं[19] निजां कन्यां विष्णुभक्तिपरायणाम् । इति तस्मिन् ब्रुवाणे[20] तु महाभागवतोत्तमे[21] ।।१४।।
परकालस्तथाकर्ण्य भोजयिष्ये[22]ऽहमन्वहम् । सहस्रं हरिदासानां सत्येनैव[23] शपामि ते ।।१५।।
पूर्वमेव प्रपन्नोऽहं[24] भगवद्हेतिचिह्नितः। इत्युक्त्वा तेन दत्तां तामुपयेमे विधानतः ।।१६।।
ततस्तया सह पुरीं गत्वा बन्धुजनैर्युतः। स्वलङ्कृतः प्रहृष्टः सन् प्रविवेश स्वमन्दिरम् ।।१७।।
परान्तकः तदारभ्य[25] भार्यया भर्तृदेवया। श्रीनिवासा[26]– ङ्घ्रिसद्भक्तान् सहस्रं भक्तितोऽन्वहम् ।।१८।।
चन्दनाऽभ्यङ्गवस्त्रस्रगर्चनार्घ्यैश्च [27] भूषणैः*। समभ्यर्च्य ततः स्वादु कृतमन्नं चतुर्विधम् ।।१९।।
भोजयन्[28] षड्रसोपेतं भुक्तशेषं स्वयं ततः। भुञ्जन्नर्पित[29]–ताम्बूलैः स्तुतिभिश्च प्रहर्षयन् [30] ।।२०।।

१–साधनस्यात् –क, साधनस्य– ग,
२– चोलदेशेषु–क, ग, घ, ३– रम्येषु–क, ग, घ,
४– कलापूर्णा–क,
५– पूर्णपट्टने –क, पट्टने–ग, घ,
६– स जातो–क, ७– प्रयज्ञे–क,
८–वर्धितो–ग, ९–विचक्षनः– क,
१०– चोलराज–क, ग, घ,
११–प्रफुल्ले–घ, १२–वर्धिता–क,
१३– तदा–क, यतः– घ,
१४– तस्य–क, तस्यां– ग, घ,
१५– गुणान् श्रुत्वा–क, ग, घ
१६– मनः– क, तदाशक्तमनाः– क,
१७–करिष्यसे त्वं हि– ग,
१८–परान्तकः– क, घ, १९–स्व–ग, घ,
२०–ब्रुवाने– क, २१–तोत्तम :– क,
२२–भोजइष्ये–क, २३–शत्येनैव– क,
२४–प्रसन्नोऽहं–क २५–तदाभ्यर्च्य –क
२६–श्रीनिवासस्य भक्तानां सा–क,
२७–नर्घ्यसुभूषणैः –ग
*–तैलाभ्यंगवस्त्रस्रक्चन्दनानर्घ्यभूषणै :–क
२८–भोजनम् –क, २९–दाप्यितां–क,
३०–च हर्षयन् –क,

श्रीशोऽस्य जगतो राजा वैष्णवास्तस्य नन्दनाः। पैत्र्यं[३१] वस्तु सुता लोके भुञ्जन्त[३२] इति संस्मरन् ।।२१।।
तदीयदास्यनिरतस्तस्थौ संहृष्टमानसः। एवं कुर्वति कैङ्कर्यं तद्दासानां[३३] महात्मनाम् ।।२२।।
परकाले महाभागे महा[३४]- भागवतोत्तमे। तस्य वृत्तान्तमखिलं श्रुत्वा चोलक्षितीश्वरः ।।२३।।
धनं सर्वं वैष्णवेभ्यो ददात्युल्लङ्घ्य मामिति। दूतानाज्ञापयामास क्रोधसंरक्तलोचनः ।।२४।।
समानयध्वं त्वरितं परकालं ममान्तिकम् । दूतास्तु त्वरितं गत्वा निवेद्य[३५] नृपशासनम् ।।२५।।
निरस्ता तेन भूयोऽपि नृपमेत्य न्यवेदयन्*। ततो राजा भृशं क्रुद्धश्चतुरङ्गबलैः सह ।।२६।।
परकालपुरीं गत्वा रुरोधाऽमितविक्रमः। परकालोऽपि रुधन्तं राजानमरिमर्दनः ।।२७।।
श्रुत्वा स्वयं विनिर्गत्य युयुधे सबलो बली। हताश्वरथमातङ्गः पदातिश्चोलभूपतिः ।।२८।।
परकालेन सङ्गम्य चक्रे युद्धमनूपमम्[३६]। उभौ शस्त्रास्त्र[३७] - सङ्घातैर्विनिघ्नन्तौ[३८] परस्परम् ।।२९।।
कृतप्रतिकृतौ छित्र[३९] - ध्वजचापासिकृन्तनौ[४०]?। युयुधाते महावीरौ चिरं युद्धविशारदौ ।।३०।।
ततः क्षीणबलो[४१] राजा बाणौघैः पीडितो भृशम् । स्थातुं तत्पुरतोऽशक्तः प्रदुद्राव पराङ्मुखः ।।३१।।
एवं पराजयं प्राप्य धन[४२] - नाशाद् विनिःश्वसन् । धर्मेण यावद् द्रव्यं मे त्वया देयं[४३] परान्तक ।।३२।।
तावद्वापि ददस्वेति[४४] प्रेषयामास मन्त्रिणः[४५]। तद्राजवाक्यं संश्रुत्य मन्त्रिभिस्तैः परान्तकः ।।३३।।
इदं तु धर्ममेवेति सम्भाव्याङ्गीचकार सः। वैष्णवाराधनार्थं[४६] तद् धनं सर्वमभूद् व्ययम्[४७] ।।३४।।
केनोपायेन सङ्गृह्य राज्ञे देयं धनं बहु। एवं तस्मिंश्चिन्तयति श्रीहस्तिगिरिनायकः ।।३५।।
स्वप्ने[४८] तं समुपागम्य संस्पृशम् करपल्लवैः। कांचीमागच्छ दास्यामि धनं तुभ्यं महायशाः[४९] ।।३६।।
इत्युक्त्वाऽन्तर्दधे स्वामी प्रबुद्धयाथ[५०] परान्तकः। कांचीपुरीं ययौ तूर्णमादाय नृपमन्त्रिणः ।।३७।।
दृष्ट्वा वारणशैलेशं वरदं भक्तवत्सलम् । प्रणम्य दण्डवद् भूमौ प्रमोदाङ्कुरुहाञ्चितः[५१] ।।३८।।
स्तुतिभिः स्तोत्रयामास कृत्वा शिरसि चाञ्जलिम् । एतस्मिन्नन्तरे श्रीशो मर्त्यरूपमुपाश्रितः ।।३९।।
दत्वा धनममात्येभ्यः[५२] प्रेषयामास[५३] देवराट् ।।४०।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
त्रिंशोऽध्यायः ।।३०।।

३१–पित्र्यं–ग, घ,
३२–भुंजते–घ,
३३–तदिय्यानां–क
३४–यतो–घ,
३५–परकालं निवेदयन् –क,
*–इयं षड्क्तिः– क, मातृकायां नोपलभ्यते।
३६–मनुपमम् –ख,
३७–शास्त्रा–ग,
३८–निघ्नन्तश्च–क,
३९–छत्र–क, ग,
४०–कृत्तनौ–क,
४१–छीण –क,
४२–धनलोभाद् –क, ग,
४३–देवम् –क,
४४–ददाचेति–क
४५–मन्त्रिणम् –घ,
४६–राधने मे तद् धनं –क,
४७–क्षयम् –क, व्ययः– ग, घ,
४८–स्वप्नेन–क, घ,
४९–महायश–ग,
५०–बुद्धाथ–क, प्रतिबुद्धवा–घ,
५१–रुहान्वितः –क,
५२–चामात्यान्–क,
५३–प्रापयोमास–क, प्रेरयामास–घ,

एकत्रिंशो ऽध्यायः

श्रीनारायण उवाच

ततः परान्तको भार्यां समालोक्याऽब्रवीद् वचः। कदाचिदपि[1] न त्याज्यं वैष्णवाराधनव्रतम् ।।१।।
धनं नास्ति कथं कुर्वे[2] वैष्णवाराधनं शुभे[3]। राजाऽयं वैष्णव[4] –द्वेषी नार्हणीयमसद्धनम् ।।२।।
न वासयोग्या भूस्तस्य[5] द्रष्टुं नार्हामि[6] तन्मुखम् । तस्मादस्य धनाच्छे ष्ठं[7] स्तेयत्वोपार्जितं धनम् ।।३।।
निषिद्धमपि यत्कर्म भगवद्भक्तिसाधनम् । पुण्यत्वेनोच्यते देवि ! यागहिंसा यथा भुवि ।।४।।
चौरवृत्तिं[8] करिष्यामि वैष्णवाराधनाय वै। न दोषः स्तेयजः[9] स्यान्मे विषयार्थमकुर्वतः ।।५।।
अस्मादुपायो[10] नास्त्यन्यो[11] वैष्णव[12]–व्रतरक्षणे। इत्युक्त्वात्मसमैः[13] शूरैः खड्गचापधरैर्भटैः ।।६।।
चर्मी खड्गी स्वयं सार्द्धं[14] – मब्धितीरा[15] –टवीषु सः। प्रविश्य मार्गमावृत्य स्थितो रत्नादिकं धनम् ।।७।।
विष्णुचिह्नविहीनेभ्यः पथिकेभ्यः सदा हरन् । प्रत्यहं वस्तुना तेन वैष्णवानां महात्मनाम् ।।८।।
आराधयन् सहस्राणि तस्थौ सम्पूर्णमानसः। कदाचित् परकालस्तु विभावर्यां स्वयं बली[16] ।।९।।
जगाम नगरं कञ्चिद् धनार्थी वैष्णवप्रियः। स तत्र वैष्णवागारद्वारोपान्ते समास्थितः ।।१०।।
तदा तद्गृहिणी स्वर्णपात्रं सङ्गृह्य पाणिना। गृहाद् विनिर्ययौ तस्याः करस्थं दुग्धभाजनम् ।।११।।
विद्योतमानं प्रभया जहार स परान्तकः। गुरुभ्यो नम इत्युक्त्वा सा[17] विवेश गृहं पुनः ।।१२।।
तदुक्त्या[18] वैष्णवधनमिदं[19] त्विति भयाकुलः। पुनः पात्रं विनिक्षिप्य द्वारि तत्रैव संस्थितः ।।१३।।
सा देवी सहसोपेत्य[20] भर्त्रे सर्वं न्यवेदयत् [21]। स वैष्णवोत्तमः श्रुत्वा तं वृत्तान्तं प्रहर्षितः ।।१४।।
श्रीवैष्णवाराधनार्थं त्विदं[22] वस्तु परान्तकः। दिष्ट्या नो हरति स्माऽद्य वयं धन्याः सुभाषिणि[23] ।।१५।।
एतस्मिन्नन्तरे द्वारे[24] पात्रं दृष्ट्वा वधूः पुनः। शशंस तस्मै तद्भर्त्ता तां प्रोवाच सुदुःखितः ।।१६।।
पात्राहरणकाले तु किमवोचो[25] वदस्व[26] तत् । मया किमपि नोक्तं तं प्रोक्तमाचार्यवन्दनम् ।।१७।।
मुग्धे तदा किमर्थं त्वं तादृशं[27] सहसाऽवदः। तदुक्त्या वैष्णवानस्मानिति ज्ञात्वा परान्तकः ।।१८।।
पुनर्द्वारि विनिक्षिप्य गतो वैष्णवव[28]–स्त्विति। त्वं[29] भागवतकैङ्कर्यविरोधं कृतवत्यसि ।।१९।।

१–कदाचिनपि न–क,
२–कुर्म–क, कुर्मः–घ,
३–श्रुते–क, प्रभो–घ,
४–वैष्णवे–क,
५–भूमिस्याद–क
६–नार्हति–क, ग,
७–धनात् श्रेष्ठं –ग, घ,
८–चोर– ग, घ,
९–स्तेयतस्य–क,
१०–तस्मादु–क,
११–नास्त्वन्यदु– क, नास्त्यन्य– छ
१२–पायो–क,उपायो–घ,
१३–शमैश् –क,
१४–सार्धम् –घ,
१५–अध्वतीराटवीषु–क,
अध्वनी अटवीषु–ग,
१६–बला–क,
१७–संविवेश–घ,
१८–तदुक्त्वा–क,
१९–धनं इदम् –घ,
२०–सहसोपेता–क, घ,
२१–न्यवेदयेत्- क,
२२–तु इदं–क, ग,
२३–सुभाषिणी–क
२४–द्वाःस्थं–ग, घ,
२५–किमवोचद् –क, घ,
२६–वंस्व–क,
२७–मुवाचमीदृशं वचः– क, मुवाचाऽसदृशं वचः– घ,
२८–वैष्णवस्त्विताम् –क,
२९–तम् –ग,घ

ब्रह्महत्यादिपापानि प्रणश्यन्ति[३०] प्रयासतः[३१]। श्रीवैष्णवापराधस्तु न नश्यति कदाचन ।।२०।।
एवं भार्यां भर्त्सयति[३२] तस्मिंश्छ्रुत्वा[३३] परान्तकः। गृहं प्रविश्य तत्पादौ प्रणिपत्येदमब्रवीत् * ।।२१।।
अद्याज्ञानात् [३४] कृतमिदं महात्मन् वैष्णवोत्तम । मेऽपराधं क्षमस्वैनं भगवत्तत्त्वविद् गुरो ** ।।२२।।
धन्योऽस्मि कृतकृत्योऽस्मि मन्द-भाग्योऽपि[३५] सुव्रत। इति तस्मिन् प्रार्थयति[३६] तं विज्ञाय परान्तकम् ।।२३।।
प्रणतः[३७] स्तोत्रयामास विविधैरुत्तम[३८]-स्तवैः। ततस्ताभ्यामनुज्ञातः प्रविश्य स्वनिकेतनम् ।।२४।।
अन्वहं विष्णुभक्तानां कुर्वन्नाराधनं स्थितः ।।२५।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्य
एकत्रिंशो ऽध्यायः ।।३१।।

३०–प्रणस्यन्ति–ग,
३१–प्रयता भुवि–क,
३२–भर्त्सति–ग,
३३–तस्मिन् श्रुत्वा–ग, घ,
*–ग्रहं प्रविश्य तत्पादं मस्तकेमवधारयत् –क
३४–अद्याज्ञानकृत–ग,
**–श्लोकोऽयं –क मातृकायां नोपलभ्यते।
३५–भाग्योमहं प्रभो–क,
३६–प्रार्थयन्तम् –क,
३७–प्रणुतः– ग,
३८–रुत्तमैः– क

द्वात्रिंशो ऽध्यायः

श्रीनारायण उवाच

एवं परान्तको[1] नित्यं पथिकेभ्यो धनं बहु। हरति त्यक्त्वा तद्वर्त्म पथिकाश्चान्यगामिनः ।।१।।
श्रीवैष्णवेषु सर्वेषु पीडितेषु क्षुधा[2] तथा। चिन्तयन्नयने स्थित्वा लोकयन् सकला दिशः ।।२।।
व्रतस्थितो निराहारः क्षपाः[3] कत्यत्यवर्त्तत। ततस्तस्य मनःशुद्धिं प्रियभक्तस्य योगिनः ।।३।।
ज्ञात्वा सन्तुष्ट-हृदयः[4] सहन् भक्तशुचं[5] हरिः। अनन्तार्द्यैर्नित्यमुक्तैः शठकोपादियोगिभिः ।।४।।
सनकाद्यैर्मुनिश्रेष्ठैः पद्मजेशादिदेवतैः। विनतासुतमारुह्य जगन्मात्रा श्रिया सह ।।५।।
समागत्य महारण्यं[6] परकालनिकेतनम् । परान्तकोऽयं योगीशो मम प्राणा[7] बहिश्चराः ।।६।।
मम प्रियाणां साहस्रमनाराध्य दिने दिने। न भुञ्जीत स्वयं भक्त्या प्रियया तुल्यशीलया[8] ।।७।।
एवं बहुसमाः[9] सोऽयं कुरुते मामकार्चनम् । अनागतेषु पान्थेषु धनाभावाद् दृढव्रतः ।।८।।
निराहारो मदीयानां पूजां त्यक्तुमनुत्सहन् । अद्यापि पान्थागमनं क्षुधार्त्तः सन् प्रतीक्षते ।।९।।
पूजा या मम भक्तानां पूजा श्रेष्ठोत्तमा प्रिया[10]। अनया पूजया तस्मात्सन्तुष्टहृदयोऽस्म्यहम् ।।१०।।
अस्याभीष्टं प्रदास्यामीत्युक्त्वा[11] रङ्गेश्वरो वरः। स्वयं श्रीश्च महाभागा माया [12] मनुजदम्पती ।।११।।
भूत्वा दिव्यं समारुह्य गरुडं तुरगीकृतम् [13]। बन्धुरूपाश्रितैर्भक्तैर्देव्या[14] च सनकादिभिः ।।१२।।
पुरोधसाऽब्ज[15] – गर्भेणाग्रेसरेण समन्वितौ। भूषितौ भूषणै[16] – र्दिव्यैरसङ्ख्यैश्च महाधनैः ।।१३।।
चामराभ्यां वीज्यमानौ[17] पाण्डुरच्छत्रशोभितौ। सर्ववादित्र[18] – निर्घोषैर्नृत्यगीतैर्मनोहरैः ।।१४।।
बधूवरौ[19] दर्शयन्ताव[20] –सङ्ख्यधनसम्पदौ[21]। परकालेन संरुद्धं पन्थानमभिजग्मतुः ।।१५।।
परकालः स्थितस्तत्र भक्तार्थं चार्थलालसः। वरदण्डधरो दृष्ट्वा तान् बहून् सम्पद[22]–न्वितान् ।।१६।।
विष्णुभक्ताराधनार्थं दैवादेवागतं धनम् । इति प्रहर्षितो भूत्वा खड्गी चर्मी महाबलः ।।१७।।
सह सर्वैर्महाबाहुरसिचर्मधरैर्भटैः। निवारयामास जनान् [23] समस् [24]–तांस्तान् [25] वरायुधः ।।१८।।
भूषणानि महार्हाणि[26] रत्नानि विविधानि च। विचित्राणि[27] च वासांसि कौशेयानि तथैव च ।।१९।।
अपहृत्याथ दम्पत्योः सर्वाण्याभरणान्यपि[28]। अनर्घ्याणि समागृह्य हर्षसम्पूर्णमानसः ।।२०।।

१–परान्तके –ग,
२–क्षुधा–क,
३–क्षपं क्रिओत्य –क,
४–हृदयौ–क, ग, घ,
५–सुचं –क,
६–महारन्यम् –क
७–प्राणो बहिश्चरः –क, ग, घ,
८–सीलया–क
९–बहुदिनानार्थं यम्–क,
१०–श्रिया–क,
११–प्रदास्यामि इत्युक्त्वा–क,
१२–रमयामास–क,
१३–तुरगाकृतिम् –ग, घ,
१४–दिव्यैश्च–क,
१५–धसानुगर्भेण–क,
१६–भूषणैर्भूषितौ–क,
१७–माणौ–क,
१८–सर्ववाद्या– क,
१९–वधूरूपम् –घ,
२०–दर्शयन्तौ असंख्य–क, ग, घ,
२१–सम्पदः– क, सम्पदैः– ग,
२२–सम्पदान्वितान् –क,
२३–जनम् –ग, घ,
२४–समस्तम् –ग, घ, २५–तम् –ग, घ,
२६–महार्हानि–क, २७–विचित्रानि–क
२८–भरणानि च–घ.

वरस्य करशाखायां दृष्ट्वा रत्नाङ्गुली[२९] – यकम् । इदं विचित्रं रत्नाढ्यं भवेद् भागवताय च ।।२१।।
इति सङ्कल्प्य मनसा दन्तैरादाय तद्बलात्। एतत्सर्वं वेदिकासु विनिक्षिप्य मुमोद सः ।।२२।।
धनभारं समुद्धर्तुमशक्तः सर्वशक्तितः। तुल्यै[३०]–र्महाबलैस्तस्य सहितस्यापि तैः स्वकैः ।।२३।।
परकालस्तदा काल इव क्रुद्धो[३१] महाबलः। वृद्धं पुरोधसं दृष्ट्वा सायुधो दण्डनोद्यतः ।।२४।।
भारोऽयं मन्त्रितो ब्रह्मन् भवता मन्त्रिणा[३२] वर। अधुनैव हनिष्ये त्वां तथा मा कुरु बाधकम्* ।।२५।।
इत्युक्त्वा स पुरोधा तु प्रत्युवाच परान्तकम् **। किमप्यहं न जानामि मन्त्रं तस्करशेखर ।।२६।।
अयमेव महामायो[३३] वरो मान्त्रिक[३४] एव च। इत्युक्ते भगवांस्तस्मिन् प्रहसन्वाक्यमब्रवीत् ।।२७।।
मयैव मन्त्रितो भारो येन मन्त्रेण दुर्द्धरः। तन्मन्त्रमुपदेक्ष्यामि[३५] समागच्छ महाबल ।।२८।।
इत्युक्त्वा स्वान्तिकं नीत्वा भक्ताना[३६] राधनोत्सुकम् । मस्तके तस्य निक्षिप्य करपल्लवमच्युतः ।।२९।।
तत्कर्णे दक्षिणे स्वस्य मन्त्रमष्टाक्षरं शुभम् । स्पृशन्नुप[३७] – दिदेशाऽस्य गात्रं प्रणतवत्सलः ।।३०।।
स्वरूपं दर्शयामास ततः स भगवान् हरिः। शङ्खचक्रधरो देवः[३८] पीतवासा जनार्दनः ।।३१।।
किरीटी [३९] कुण्डली हारी वनमाली जगत्पतिः। नीलाम्बुद[४०] – निभः कोटिमीनकेतनसुन्दरः ।।३२।।
नित्यमुक्तैः परिवृतो देवैर्ब्रह्मपुरोगमैः। ऋषिभिर्नारदाद्यैश्च सेवितोऽप्सरसां गणैः ।।३३।।
वामाङ्कस्थितया लक्ष्म्या भूमिनीलादि[४१] –भिर्युतः। ताल[४२] –व्यजनपर्यन्तः श्वेतच्छत्रेण शोभितः ।।३४।।
वेदान्तवेद्यो भगवान् कोटिसूर्यसमप्रभः। तं दृष्ट्वा जगतामीशं प्रणम्याऽष्टाक्षरात्मकम् ।।३५।।
स्तोत्रयामास विविधैः संस्तवैर्निगमोक्तिभिः। हर्षेण महताविष्ट आनन्दाश्रु – परिप्लुतः ।।३६।।
कृत्वा प्रबन्धान् कृपया देवदेवस्य शाङ्गिणः। तस्मै समर्पयामास श्रीधराय महात्मने ।।३७।।
ततस्तं भगवान् वीक्ष्य कृपापूर्णावलोकनैः। सम्भाव्य सम्परिष्वज्य स्वधाम परमं ययौ ।।३८।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
द्वात्रिंशोऽध्यायः ।।३२।।

२९–रक्तांगुलीयकम् –क,
३०–बलैर्–क, तलैर्–ग,
३१–परकालः काल इवातिक्रुद्धो–ग
परकालः काल इव ह्यतिक्रुद्धो–घ,
३२– मायिनाम् –ग,
*–इयं पङ्क्तिः ग मातृकायां नास्ति।
**–इयं पङ्क्तिः ग मातृकायां नोपलभ्यते।
३३–महामाया–क,
३४–मन्त्रिक–ग,
३५–मुपदेष्यामि–क,
३६–स्वभक्ताराधनोत्सुकम् –क,
३७–स्पृशंसु–क,
३8–देवो–क, ग,
३९–किरीटकुण्डली –क,
४०–नीलाभिर्निभः–क,
४१–लीला–घ,
४२–बाल–ग, घ,

त्रयस्त्रिंशो ऽध्यायः

श्रीनारायण उवाच

ततः परान्तकः श्रीमान् परिवारसमन्वितः। गत्वा रङ्गेशयं देवं ददर्शाह्लादनिर्भरः ।।१।।
तत्पादराजीवयुगं[१] प्रणम्यापादमस्तकम् । संस्पृशन् प्रीतिहृष्टाङ्गरुहो गद्गदनिस्वनः ।।२।।
संस्तुत्य कुर्वंस्[२] तत्सेवां दिनानि कतिचित् स्थितः। ततः श्रीवेङ्कटाधीशं द्रष्टुकामः परान्तकः ।।३।।
रङ्गेश्वरेणानुज्ञातः प्रययौ वेङ्कटाचलम् । मध्ये काञ्चीपुरीं प्राप्य तत्पुरापबने स्थितम् ।।४।।
क्षुधासम्पीडितं दृष्ट्वा नृसिंहोऽष्टभुजाह्वयः। आश्रितस्य क्षुधार्त्तिं तामसहन् द्विजरूपधृक् ।।५।।
तस्मै च भृत्यवर्गेभ्यो ददावन्नमुत्तमम् । परान्तकोऽपि तद्भुक्त्वा दिव्यान्नममृतोपमम् ।।६।।
कस्त्वं किन्नाम ते प्रोक्तमिति पप्रच्छ भूसुरम् । अहं काञ्चीपुराधीशो नृसिंहोऽष्टभुजः स्मृतः ।।७।।
इत्युक्त्वान्तर्दधे विप्रो विस्मितोऽभूत् परान्तकः। तत्पादमूले न्यवसद् भक्त्या[३] तीर्थे दिनत्रयम् ।।८।।
ततः श्रीशैलनाथोऽपि श्रीनिवासो जगन्मयः। दिव्यपीताम्बरधरः[४] शङ्खचक्रविराजितः ।।९।।
चतुर्भुजः सुन्दराङ्गो वनमालासमन्वितः। किरीटहारकेयूरकुण्डलाङ्गदभूषितः ।।१०।।
दिव्यचन्दनलिप्ताङ्गः श्रीभूनीला[५]-समन्वितः। द्रष्टुकामः स्वभक्तं तं[६] समेत्यालिङ्ग्य तत्तनुम् ।।११।।
कराम्भोजेन संस्पृश्य पितृवत् पर्यलालयत्[७]। तत्पादपद्मयोः सोऽपि प्रणिपत्य परान्तकः ।।१२।।
स्तुत्वा तेनाऽभ्यनुज्ञाय स्वगृहं पुनरागमत्[८]। अस्य श्रीरङ्गनाथस्य करिष्ये सप्तशालकम्[९] ।।१३।।
इति सङ्कल्प्य[१०] मनसा[११] स्तेयोपार्जितवस्तुभिः। शिल्पिभिः[१२] कारयामास सप्तशालान् सगोपुरान् ।।१४।।
एतस्मिन्नन्तरे ऽभावाद् धनस्य[१३] स विचिन्तयन् । जैनीयां[१४] प्रतिमां स्वर्णमयीं नागपुरे स्थिताम् ।।१५।।
श्रुत्वा जनैः स्वयं तत्र गत्वा सह बलैः स्वकैः। उपायैर्बहुभिर्हत्वा[१५] तामादाय परान्तकः ।।१६।।
रङ्गक्षेत्रमुपागम्य दत्वा तां शिल्पिभिः[१६] मुदा। सम्पूर्णान् कारयामास प्रकारानायतान् दृढान् ।।१७।।
शिल्पिभ्यो वस्त्वदत्वैव द्वात्रिंशन्मण्डपांस्तु तैः। कारयित्वा वस्तुलाभं याचितेभ्यः[१७] परान्तकः ।।१८।।
शिल्पिभ्यो ऽल्पधनं त्वेतत् कथं दास्याम्यहं पराम्[१८]। मुक्तिमेवेह दास्यामि तत्कैङ्कर्यसमृद्धिदाम्[१९] ।।१९।।
इति निश्चित्य मनसा नावमारोप्य शिल्पिनः। कावेरीसलिले[२०] ऽगाधे निमज्य[२१] श्रीपतिं हरिम् ।।२०।।
प्रार्थयामास शिल्पिभ्यो मुक्तिं देहीति शाश्वतीम् । एवं सम्प्रार्थितस्तेन भगवान्[२२] भक्तवत्सलः ।।२१।।
अपवर्गं ददौ तेभ्यः सर्वेभ्यो योगिदुर्लभम् । ते चापि शिल्पनः सर्वे विमानैर्मणिशोभितैः ।।२२।।

१–युगलम् –ग,
२–पूर्ववत् –क,
३–भक्तमूले तीर्थो–क, भक्ततीर्थे–ग,
४–धरो–क,
५–लीली–ग, घ,
६–तु –घ,
७– पर्यलालयात्–
८–पुनरायतत्–क,
९–शालसप्तकम् –क, ग,
१०–संकल्प–ङ,
११–मनसो–क,
१२–सिल्पिभिः–क,
१३–धनतस्य–क,
१४–जयनीम् –क, ग,
१५–हृष्टास् –क, हृष्टस् –घ,
१६–शिल्पिनां –क, ग, घ,
१७–याचकेभ्यः– घ,
१८–परम् –घ,
१९–समृद्धिदम्– क
२०–शलिले–क,
२१–मज्जयत् –घ,
२२–भक्तेन–ग

पश्यतां[२३] सर्वलोकानां प्रजग्मुः परमं पदम् । ततो बौद्धा[२४] जिनाः सर्वे तं विज्ञाय परान्तकम् ।।२३।।
सुवर्णप्रतिमाचौरं[२५] राज्ञे सर्वं न्यवेदयन् । तेषां तद्वचनं श्रुत्वा पाण्ड्य[२६] –राजो महाबलः ।।२४।।
स्वदूतैरानयामास परकालं निजं गृहम् । पाण्ड्यराजसभां गत्वा सर्वान् बौद्धजिनानपि[२७] ।।२५।।
निगमान्तोक्तिभिर्जित्वा नृपेण परिपूजितः। मत्तमातङ्गमारूढो घोषयन् विजयं स्वकम् ।।२६।।
कार्तिकेयांशसंजातं सर्वविद्याविशारदम् [२८]। जित्वा शैवगुरुं कञ्चित् त्रिकविं तेन पूजितः ।।२७।।
आससाद पुनः श्रीमद्रङ्गक्षेत्रमनुत्तमम् । ततः परान्तको भूत्वा विरक्तः सह भार्यया ।।२८।।
श्रीरङ्गपतिना ऽनुज्ञां प्राप्य भद्राश्रमं परम्। प्रविश्य तत्र सन्तस्थौ योगी[२९] योगसमाधिना ।।२९।।

एतां कथां पठति यः शृणुतेऽपि भक्त्या

रङ्गेशदास्यप्रति [३०] –भोगपरान्तकस्य[३१]।

लब्ध्वा स[३२] श्रीशपुरुषोत्तमसम्पदश्च

यायाद् हरेर्निलयमव्ययमीश्वरस्य ।।३०।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
त्रयस्त्रिंशो ऽध्यायः ।।३३।।

२३–पश्चात्ताम् –क,
२४–बौद्धजनास् –क, बौद्धा जनाः–ग, बौध्वजनाः– ख,
२५–चोरम् –ग, घ,
२६–पाण्डु–क,
२७–जनान्नति–क, जनानपि–ग, घ, वैधजनानपि–ख,
२८–विसारदा–ख,
२९–योगि–ख,
३०–प्रतियोग–ख, पति भोग–ग,
३१–परांतिकस्य–क, ख,
३२–पुनः पुरुषसत्तमसम्पदश्च –घ, स श्रीश्च पुरुषोत्तमशम्पदश्च–क,

चतुस्त्रिंशो ऽध्यायः

नर उवाच

सर्वेषां सूरिणां[१] जन्म भूतले कथ्यते त्वया। शेषस्य शेषभूतस्य रूपभेदैर्हरेः सदा।।१।।
कथ्यते[२] नावतारस्तु नारायण मुनीश्वर। इति ब्रुवति मौनीशे नरे नारायणो मुनिः ।।२।।
कथामेतां प्रवक्तुं मे सन्तोषो जायते महान्[*]।

श्रीनारायण उवाच

शृणुष्व सावधानेन वक्ष्ये पुण्यकथामिमाम् ।।३।।
द्राविडे विषये[३] दिव्ये सर्वभूतमनोहरे। पुण्ये पृथुपुरे रम्ये काञ्च्या[४] अनतिदूरगे ।।४।।
महासूर्यान्वये पुण्ये केशवस्य त्रिपाठिनः। जज्ञे [५] पुण्यवतः पुत्रोऽनन्तांशोऽनन्ततेजसा [६] ।।५।।
चैत्रमासे शुभाऽऽर्द्रायां शुभलग्ने शुभे दिने। तस्य रामानुज इति पिता नामाऽकरोन्मुदा ।।६।।
स तातेनोपनीतः सन् पञ्चसंस्कारसंस्कृतः। अधीतो निगमान् सर्वान्[७] शास्त्राणि विविधानि च ।।७।।
ततः पिता सुतं दृष्ट्वा समुपस्थितयौवनम्। कृत्वा विवाहं विधिना मुमोद सह बान्धवैः।।[(**)] ।।८।।
ततो[८] विवाहसमये भगवान् भक्तवत्सलः। आविरभूच्छ्रिया सार्द्धं द्रष्टुं रामानुजं मुनिम् [(***)] ।।९।।
ततो रामानुजः श्रीमान् तं प्रणम्य यथा-विधि। स्तोत्रं चक्रे शुभैः स्तोत्रैर्वेदवेदान्तगोचरैः[(!)] ।।१०।।
ततो रामानुजः प्राज्ञो गत्वा काञ्चीपुरोत्तमम्[(!!)]। वरदं सर्वलोकेशं कोटिसूर्यसमप्रभम् ।।११।।
नीलमेघनिभश्यामं दिव्यपीताम्बरोज्ज्वलम्। चतुर्भुजं सुन्दराङ्गं वनमालाविराजितम् ।।१२।।
श्रीवत्सकौस्तुभोरस्कं दिव्यचन्दनलेपितम्। प्रसन्नसुमुखाम्भोजं नलिनायतलोचनम् ।।१३।।
हारकेयूरमुकुटकुण्डलाङ्गदशोभितम्। शङ्खचक्रधरं लक्ष्मीभूमिनीलादि[९]-संयुतम् ।।१४।।
पारिषदै[१०]-रनन्ताद्यैः सूरिभिः परिसेवितम्। सुरेशैर्ब्रह्मरुद्राद्यैस्सनकाद्यैश्च सेवितम् ।।१५।।
दृष्ट्वा प्रहृष्टमनसा हर्षपर्याकुलेक्षणः। प्रणम्य स्तोत्रयामास संस्तवैर्निगमोक्तिभिः ।।१६।।
प्रपद्ये हस्तिशैलेश श्रीमन्नारांण प्रभो। चरणौ सर्वलोकानां शरणं ते व्रजे विभो ।।१७।।
नमो विश्वशरीराय नम आत्मेश्वराय च। विभूतिद्वयनाथाय नमस्ते सर्वशेषिणे ।।१८।।

१-शूरिणाम् -क, ख, सूरीणां-घ,
२- कथातेनावतारस्तु-ख,
*-प्रचक्रमे कथामेतां प्रवक्तुंतोषितो महान् -घ,
३-विशसे-क,
४-कांची अनतिदूरगे-क, ख, कांच्यामनतिदूरगे-ग, घ,
५-यज्ञे -क, ख,
६-तेजसः- ग,
७-सर्वशास्त्राणि-ख,
(**)-श्लोकोऽयं -क, मातृकायां नोपलभ्यते,
८-ततोपनीतं समये-क
(***)-श्लोकोऽयं -ग, घ, मातृकयोर्नोपलभ्यते।
(!) श्लोकोऽयं-ग, घ, मातृकयोर्नोपलभ्यते।
(!!)-अस्या पङ्क्तेरनन्तरं-घ मातृकायां पाठोऽयं दृश्यते-
"ततो विवाह समये यादवेन जिघांसितः।
मार्गे भ्रष्टं पालयत्स भगवान् भक्तवत्सलः।।
आविर्भूतः श्रिया सार्द्धं शर्वरीशवरण्यमः।
— मास च जलं पातु रामानुजं मुनिम्।
तं प्रणम्य ततो रामानुजस्तं स्वांजली ददौ।
तत अगत्य कांचीं स शालरूपजलेन तु।।
सतर्पयन्हि वरा - दर्शय —। — लन्धवीस्तदा।।"
विशेषः-११-१७ संख्याकाः श्लोकाः क, ख मातृकयोर्नोपलभ्यन्ते।
९-लीलादि-घ,
१०-पारिषादिभ - क, ग, घ,

नमः सर्वनियन्त्रे ते लोकभर्त्रे नमोऽस्तु ते। सर्वभोक्त्रे नमस्तुभ्यं धर्मिणे ते नमो नमः ।।१९।।
यस्त्वं समस्तभूतानामादिभूतः सतां पते ! पञ्चविंशतितत्त्वानि हेतूनि जगतां[११] विभो ।।२०।।
अस्त्रभूषणरूपाणि धृतवानसि माधव ! परं ज्योतिः परं ब्रह्म परमात्मा परात्परः ।।२१।।
सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात् । नित्यः सर्वगतो यज्ञो यज्ञेशो यज्ञभुग् हविः ।।२२।।
अच्युतः शाश्वतः कृष्णो लोककृल्लोक-भृद्गुरुः। सर्वलोकाधिपः श्रीमान् कल्याणगुणसागरः ।।२३।।
अकारवाच्यस्त्वं देवः श्रीभूनीला[१२] -पतिः प्रभुः। त्वमेव विश्वतो वृत्वा चात्यतिष्ठद्दशाङ्गुलम् ।।२४।।
उतामृतत्वस्येशानस्त्वमेव पुरुषोत्तम । त्वमेव व्यापको मन्त्रो वासुदेवः सनातनः ।।२५।।
आदिमध्यान्तरहितः शुद्धः सात्त्विकविग्रहः। वेदवेदान्तमृग्यस्त्वं वेदवेदान्तकृद्विभुः ।।२६।।
त्वमेव सर्वभूतात्मा सर्वभूताश्रयः परः। अव्यक्तस्त्वमप्रमेयस्त्वं सर्गस्थित्यन्तकारणम् ।।२७।।
त्वमेवषड्गुणाधीशः[१३] सर्वसाक्षी च सर्वगः। चतुःपञ्चनवव्यूहभेदरूपस्त्वमेव हि ।।२८।।
नित्यशुद्धोऽविकारस्त्वं हेयप्रतिभटो[१४] हरिः। त्वमेव चिदचिन्नाथस्त्वच्छरीरमिदं जगत् ।।२९।।
त्वमेव सर्वजीवानां प्रेरकः सर्वकर्मणाम् । त्वत्कटाक्षवशाल्लोका गच्छन्ति[१५] परमां[१६] गतिम् ।।३०।।
त्वयैव स्थापिता लोकास्त्वया[१७] चैव प्रवर्त्तिताः। त्वय्येव परिलीयन्ते त्वयैवाङ्कुरिताः पुनः ।।३१।।
प्राप्यस्त्वं प्रापकश्चासि सर्वेषां सर्वपालकः। सर्वा[१८]- भीष्टप्रदस्त्वं हि भक्तानामात्मदो ह्यसि ।।३२।।
सर्वलोकशरण्यस्त्वं प्रपन्नानां महात्मनाम् । विधूय सर्वपापानि ददासि परमं पदम् ।।३३।।
एवं त्वयि न्यस्तभराः संन्यस्ता[१९]-त्मीयलक्षणाः। भवांस्तेषामधीनोऽसि शरणागतवत्सलः ।।३४।।
त्वमेव सर्वलोकानामुपायोपेयकः[२०] प्रभो । त्वमेव दाता गोप्तासि त्वदन्यः को भवेत्प्रभुः ।।३५।।

प्रसीद प्रसीद प्रभो देवराज

प्रसीद प्रसीद प्रपञ्चा[२१]ऽधिनाथ !

प्रसीद प्रसीद प्रपन्ना[२२]ऽऽर्त्तिहारिन्

प्रपद्ये प्रपद्ये पदाब्जे मुकुन्द* ।। ३६।।

एवं स्तुत्वा देवदेवं रामानुजमुनीश्वरः। वरदं सर्वलोकेशं तत्रावासं धियाऽकरोत् ।।३७।।
तत्र वेदान्तसच्छास्त्रमधिकर्त्तुं स यादवम् । सम्प्राप्य तस्माद्वेदान्तमधिकुर्वन् महामुनिः ।।३८।।
तस्थौ श्रीहस्तिशैलेशं सेवयन्नपि[२३] सर्वदा। तदा[२४] चोलधराधीशपुत्रिकां ब्रह्मराक्षसः ।।३९।।
सङ्गम्य मन्त्रतन्त्रैश्च न शक्योऽभूत्रिवारितुम् । ततो[२५] राज्ञा[२६] समाहूतो यादवः सहलक्ष्मणः ।।४०।।
सर्वैश्च शिष्यैः सहितो गत्वा[२७] राजपुरं प्रति। तां दृष्ट्वा राक्षसग्रस्तां भिक्षुकः सर्वमन्त्रवित् ।।४१।।

११-जगतो -घ,
१२-लीला-ग, घ,
१३-षड्गुणाधीशः सर्वज्ञः- क, ख,
१४-प्रतिभयो-क,
१५-प्रयच्छन्ति -क,ख,
१६-पराम् -क, ख,
१७-त्वयादैव-क, त्वयादौ च-क,
१८-सर्वभीष्टप्रद-ख, पराभीष्टप्रदस्त्वम् -ग
१९-ये संन्यस्तात्मलक्षणाः- ख,
२०-पेयवाचकः-ग, घ. प्रभुः-क,
२१-प्रसीदाधिनाथ-घ,
२२-प्रपन्नार्त्तिहारी-ख, प्रपन्नसुरेश-घ
*-चरेश प्रपद्ये प्रपद्ये पदाब्जे-क सुरेश प्रपद्ये प्रपद्ये पदाब्जे-ख, विशेषः- १८-२७ श्लोकाः क, ख मातृकयोर्नोपलभ्यन्ते।
२३-शेवयन्नपि -क, ख,
२४-तथा-ग, घ,
२५-तदा-ख,
२६-राजा-क,
२७-गतो-क, ख,

उग्रबीजाक्षरयुतैरुग्रमन्त्रैरमन्त्रयत् [२८]। तं[२९] ब्रह्मराक्षसो दृष्ट्वा यादवं यतिसत्तमम् ।।४२।।
उवाच प्रहसन् सत्यं वाक्यं निखिलजन्मवित् । श्रीवेङ्कटाद्रि[३०]-यात्रायै गच्छद्भिर्मनुजैः[३१] सह ।।४३।।
सङ्कीर्णे ऽध्वनि सर्वत्र विशाले सुमनोहरे[३२]। तडाग[३३]-प्रान्तवल्मीके[३४] गोधुक् त्वं पूर्वजन्मनि ।।४४।।
पथिकानां वैष्णवानां भुक्तशेषान्नभोजनात् । ईदृशं[३५] रूपमगमो[३६] मज्जन्म शृणु भिक्षुक ।।४५।।
मयि पूर्वं याजकत्वं प्रकुर्वति महाध्वरे* । मन्त्रलोपवशाद् ब्रह्म [३७] – राक्षसत्वमुपागतः ।।४६।।
ईदृशेन[३८] त्वया भिक्षो न शक्योऽहं निवारितुम् । सर्वचेतनरक्षार्थं[३९] – मवतीर्णं दयानिधिम् ।।४७।।
एनं शेषांशसम्भूतं रामानुजमुनिं विना। नान्यः पुमान् समर्थः स्यान्मज्जन्मेदं निवारितुम् ।।४८।।
त्यक्त्वेदं[४०] जन्म गच्छेयमहमाज्ञां[४१] ददाति [४२] चेत्। इत्युक्त्वा लक्ष्मणमुनेः पपात पदपद्मयोः[४३] ।।४९।।
यादवार्येण [४४] विप्रेण[४५] प्रार्थितो लक्ष्मणो मुनिः। ददावनुज्ञां गच्छेति मुक्तिं त्यक्त्वा त्विमां तनुम् ।।५०।।
इत्युक्ते लक्ष्मणमुनौ[४६] तां त्यक्त्वा राक्षसीं तनुम् । परमं वैष्णवं लोकं सर्वेषां पश्यतां ययौ ।।५१।।
सम्पूजितस्ततो राज्ञा लक्ष्मणः सहयादवः। पुनः काञ्चीमुपागम्य श्रुत्यर्थाया[४७] ऽर्थवादिनम् ।।५२।।
यादवं तं परित्यज्य[४८] सेवयन् स्वामिनं[४९] सदा। सर्वोपचारैरत्यर्थं तस्थौ रामानुजो मुनिः ।।५३।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
चतुस्त्रिंशो ऽध्यायः ।।३४।।

२८–मन्त्रेश्च मन्त्रयत् –ख
२९–तद् –क, ग, घ,
३०–वेंकटाद्रीशयात्रायै–क, श्रीवेंकटाद्रीशयात्रा–ख,
३१–जनैः– क, तु जनैः– ख,
३२–शुमनोहरे–ख,
३३–तटाक–क, ख, ग, तडाक–घ,
३४–कल्मीके–ख, वाल्मीके– ग,
३५–इद्रसं–क, इदृशं–ख,
३६–मगमन् –ग,
*–मयि पूर्वं प्रकुर्वति महाबुद्धे महाध्वरे–घ
३७–ब्रह्मान् –क,
३८–इंद्रसेन–क, इद्रशेन–ख,
३९–रक्षार्थम् अवतीर्णम् –ख,
४०–त्यक्त्वेह–ग,
४१–गच्छेऽहमयमज्ञाम् –क, ख, ग, घ,
४२–ददा–ख,
४३–पाद–क, ख,
४४–यादवाख्येन–ख,
४५–यतिना–ख,
४६–लक्ष्मणेनैवं–घ,
४७–श्रुत्यर्थायार्थवादिनाम् –ख, श्रुत्यर्थमवदी–क,
श्रुत्यर्थमपवादिनम् –ग,
४८–परीत्यज्य–ख,
४९–स्वापिदम्–ख

पञ्चत्रिंशो ऽध्यायः

श्रीनारायण उवाच

ततः काले गते तस्मिन्[१] लक्ष्मणार्यो महामुनिः। महा[२]-पूर्णमुनेरङ्घ्रियुग्मं तत्समुपाश्रयत् ।।१।।

नर उवाच

महापूर्णमुनिः को नु कस्यांशः[३] को नु सद्गुरुः। एतत्सर्वं[४] ममाख्याहि[५] नारायण कृपालय ।।२।।

श्रीनारायण उवाच

पुरा नारायणग्रामे कावेरीतटसंस्थिते। ईश्वरार्य इति ख्यातो भूसुरो वैष्णवोत्तमः ।।३।।
तस्य पुत्रो महान्[६] जज्ञे विष्वक्सेनस्य मन्त्रिणः। गजाननांश[७] - सम्भूतो नाथनामा [८] महामुनिः ।।४।।
तस्य नाथमुनेर्जातः पृश्निगर्भांशसम्भवः। पुत्र ईश्वरमौनीति धर्मज्ञः परतत्त्ववित् ।।५।।
तेन पुत्रेण सहितो महात्मा नाथसंयमी। विष्णुक्षेत्रेषु सर्वेषु प्रतिक्षेत्रं दिनत्रयम् ।।६।।
उषित्वा[९] यमुनातीरे गोवर्द्धनमहागिरौ। योगनिष्ठामुपास्थाय साक्षात्कुर्वन् बलानुजम् ।।७।।
तद्ध्याननिरतो योगी चिरकालमुवास ह। ततः श्रीशाज्ञया प्राप्य नारायणपुरं पुनः ।।८।।
उद्धर्तुकामो निखिलां विनष्टां द्राविडश्रुतिम्। कुरुकां समनुप्राप्य तिन्तिडी[१०] - मूलमाश्रितम् ।।९।।
उपासयामास चिरं पराङ्कुशमुनिं[११] मुनिः। तदा[१२] पराङ्कुशः सिद्धस्तस्य[१३] प्रादुरभूत्पूरः[१४] ।।१०।।
तं दृष्ट्वा प्रणतो भूमौ नाथयोगी महामतिः। तस्माज्जग्राह नितरामखिलां[१५] द्राविडश्रुतिम् ।।११।।
न्यासं च परमं गुह्यं सर्वपापहरं नृणाम्। सकृदुच्चारणादेव मुक्तिदं शुभदं शुभम् ।।१२।।
गृहीत्वाथ च[१६] शिष्याणामुपदेशं चकार सः। ततः स पुण्डरीकाक्षं जयत्सेनांशसम्भवम् ।।१३।।
कुरुकेशं च नीलांश[१७] - जातं योगविशारदम् । सपुत्रं च समाहूय वाक्यमेतदुवाच ह ।।१४।।
सिंहासनांशजः पुत्रः पुत्रस्ते प्रभविष्यति। तस्य यामुननाम त्वं कुरुष्व सुसमाहितः ।।१५।।
पुण्डरीकाक्ष तस्मै त्वं पौत्राय मम योगिने। उपदेशं कुरु ब्रह्मन् न्यासं च द्राविडागमान् ।।१६।।
कुरुकेश त्वया चापि योगस्तस्मै प्रदीयताम् । एवमाज्ञाप्य तन्मौनी[१८] सप्तवर्षशते गते ।।१७।।
स्वस्य देहं विहायाथ परं[१९] विष्णोः पदं ययौ। ततः स पुण्डरीकाक्षः कुमुदाक्षांशसम्भवम् ।।१८।।
शिष्यं श्रीराममिश्राख्यं समानीय प्रहर्षितः। न्यासं च द्राविडाम्नायानुपादिश्य[२०] रहस्यवित् ।।१९।।

---

१ -वस्मिन्-क, ख,
२- गहा-ख,
३-व स्यां सः- ख,
४-तत् र्वं त्वम् -क, ख,
५-महा: याहि-ख,
६-महाय. -क, महायोगी-ख,
७-गजानन: प सम्भूतो-क, जगाननांशसम्भूतो-ख, गजाननस्यांश तो-ग, गजास्यांशेनसंयुक्तो-घ,
८-नामनाथ-व ग,घ,
९-वसित्वा-क ख,ग,घ,
१०-तिन्तिणी-ग, तिन्त्रिणी-क,ख,घ,
११-पारांकुश-ख,
१२-अथ-क,ख,ग,
१३-सिद्धोस्यापि-क,ख,सिद्धोतस्य -ग,
१४-परः-क,ग, परम्-घ,
१५-निखिलां नितराम्-ख,
१६-त्व-घ,
१७-लीलांशम्-क,ख,घ,
१८-मौनि-क, मौनिः - ख,ग,
१९-त्वरं- क,ख, वरम् - घ,
२०-नुपविश्य-ख,नुपदीश्य-ग.

ईश्वराख्यमुनेः पुत्रो भविष्यति महामुनिः। तस्मै ददस्व न्यासं च द्राविडागममेव च ।।२०।।
इत्युक्त्वा पुण्डरीकाक्षः स ययौ परमं पदम्। ततो[२१]यामुनमुनीन्द्रः[२२] संजातो[२३] भगवत्प्रियः[२४] ।।२१।।
सिंहासनांशजः श्रीमानीश्वरार्यस्य[२५] वेदवित्। तस्मै श्रीराममिश्रार्यः सर्वज्ञाय महात्मने ।।२२।।
ददेश न्यासविद्यां सरहस्यान् द्राविडागमान् । तस्य पञ्चाऽभवंश्छिष्या यामुनस्य महात्मनः ।।२३।।
कुमुदाक्षांश[२६]–सम्भूतो महापूर्णश्च तत्त्ववित् । श्रीशैलपूर्णश्च महान् सुमुखांशो हरिप्रियः ।।२४।।
शङ्कुकर्णांशसम्भूतः[२७] कांचीपूर्णश्च संयमी। गोष्ठीपूर्णश्च विज्ञातः[२८] पुण्डरीकांश[२९]–सम्भवः ।।२५।।
श्रीमाल्यधरनामा च वामनस्यांशजो महान् । एते सर्वे महात्मानः सर्वज्ञास्तत्त्वकोविदाः ।।२६।।
मनुजान् पावयन्तस्ते हरिक्षेत्रेषु संयुताः[३०]। महापूर्णस्तु सततं गुरुमेवानुवर्त्तयन् ।।२७।।
तेन विज्ञापिताशेषरहस्यार्थोऽभवद् बुधः। विजित्य मायिनः[३१] सर्वान् यामुनो योगिसत्तमः ।।२८।।
स्थापयित्वा मतं विष्णोर्भिक्षुकाश्रममाश्रितः। महापूर्णेन सहितो रङ्गक्षेत्रमुवास ह ।।२९।।
तं महापूर्णमनघमाश्रयामास लक्ष्मणः। देवराजेन सन्दिष्टः काञ्चीपूर्णो महामुनिः ।।३०।।
महापूर्णोऽपि शिष्याय लक्ष्मणाय महात्मने। यामुनार्येण निक्षिप्तं[३२] रहस्यमखिलं ददौ ।।३१।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
पञ्चत्रिंशो ऽध्यायः ।।३५।।

२१–ततस्तु –घ,
२२–मौनीन्द्रो–क, मौनीन्द्रः–ख, मुनिः–घ,
२३–संयातो–क,
२४–भागवतप्रियः–क,
२५–श्रीमान्नीशश्वरार्यस्य –क,श्रीमान् ईश्वरार्यस्य–ख,
२६–कुमुदाक्षांसः–ग,
२७–सम्भूतो–ग, घ,
२८–विज्ञाता–क, ख, ग,
२९–पुण्डरीकाक्ष–घ,
३०–संवन– ख,
३१–मायया–क, मायीन् –ख, समयान् –घ,
३२–संक्षिप्तम् –क, ख,

षट्त्रिंशोऽध्यायः

श्रीनारायण उवाच

ततो रामानुजो योगी देवराजस्य सन्निधौ। गुरोर्भगवतो विष्णोरुवास कतिचित्समाः ।।१।।
ततो लक्ष्मणयोगीशमाश्रयितुं[1] सर्ववेदवित् । सुप्रतिष्ठांशसंजातो नाम्ना दाशरथि[2] – र्महान् ।।२।।
श्रीविष्णुचिह्नमिश्रश्च सर्वनेत्रांश–सम्भवः। उभौ काञ्चीमुपागम्य लक्ष्मणं तं यतीश्वरम् ।।३।।
आश्रयामासतुस्तौ[3] च पञ्चसंस्कारसंस्कृतौ। सेवयन्तौ[4] सदा तस्य पादाम्बुजद्वयं[5] मुदा ।।४।।
तत्रस्थं यादवं प्राह तन्माता तनयं यतिम्[6]। शिखोपवीते[7] सर्वेषामाश्रमाणां हि[8] कारणे[9] ।।५।।
ते त्यक्तुं नार्हसि[10] पुत्र त्यागोऽयं शास्त्रगर्हितः। उपवीती शिखी योगी त्रिदण्डी लक्ष्मणो मुनिः ।।६।।
यथा तिष्ठति[11] तद्वत् त्वं भव शास्त्रैः[12] सुपूजितः। इत्युक्तो यादवो मात्रा मोहादेतत्कृतं पुरा ।।७।।
निष्कृतिश्चास्य धरणीप्रदक्षिणामिति श्रुतम् । अशक्तो[13] ऽहं करिष्यामि कथं भूमि[14]–प्रदक्षिणम् ।।८।।
इति संचिन्तयन्निद्रां प्रपेदे भिक्षुकोत्तमः[15]। तस्य स्वप्ने देवराजः प्रोवाचेदं वचः शुभम् [16] ।।९।।
प्रदक्षिणं कुरुष्व त्वं लक्ष्मणार्यस्य[17] योगिनः। तेन त्वं लप्स्यसे भूमिप्रदक्षिणफलं [18] यते ।। १०।।
तच्छ्रुत्वा तत्र गत्वाथ मानं त्यक्त्वा महामुनेः। प्रणिपत्य पदाम्भोजद्वन्द्वे लक्ष्मणयोगिनः ।।११।।
तावकं कुरु योगीन्द्र शरणागतवत्सल । इत्युक्त्वा तं परिक्रम्य मूर्ध्नि बध्वाञ्जलिं[19] यतिः ।।१२।।
स्तोत्रयामास योगीन्द्रं लक्ष्मणं यतिशेखरम् [20]। रामानुजस्तं संस्कृत्य संस्कारैः पञ्चभिः शुभैः ।।१३।।
उपनयनं क्रमाच्चक्रे यादवस्य त्रिदण्डिनः[21]। ततः श्रीरङ्गनाथेन समाहूतः[22] स लक्ष्मणः ।।१४।।
श्रीरङ्गं समनुप्राप्य कावेरीसरितं[23] वराम् । ददर्श लक्ष्मणो योगी पुण्यामृषि[24] –निषेवितम् [25] ।।१५।।
त्रिदश [26] –ध्यानसङ्कीर्णां क्रीडितां देवतैः[27] सदा। देवर्षिगणगन्धर्वकिन्नराद्भुत[28] – जीवनाम् ।।१६।।
निर्मलोत्पलसञ्छन्नामम्भोजवन [29] –सङ्कुलाम् । सौगन्धिकै [30] – र्विकसितैः कुमुदैरुशोभिताम् ।।१७।।
कुसुमप्लवसञ्छन्नां[31] विपुलस्वच्छबालुकाम् । नानाप्रसूनराजीवसमाकीर्णामशैवलाम्[32] ।।१८।।

१–योगीशस्याश्रयः– क,ख, स्वाश्रयं:– घ,
२–दासरथि–ग,
३–तेन– क, ख, ग,
४–सेवयन्तौ–ख,
५–पादाब्जद्वयमुन्मुदा–क, पादाब्जद्वयमुन्मुदौ–घ,
६–सतिः–ख, प्रति–ग,
७–शिखोपवीत–क,
८–तु–क, च–ख
९–कारणम् –क, ख,
१०–नार्हसे–घ,
११–वर्त्तति–क, घ,
१२–सास्त्रै–ख,
१३–असक्तो–ख,
१४–भूमेः–क, ख,
१५–भिक्षुसत्तमः– ख,
१६–शुभाम् –क,
१७–तस्य लक्ष्मण–क, ख, ग,
१८–प्रदक्षणः– क,
१९–बद्धांजलिर् –ख,
२०–शेषरम् –क, सेखरम् –ख, ग,
२१–त्रिदंडिनम्– ग,
२२–समाहृतः–ख,
२३–शरिताम् –क, सरिताम् –ख,ग, घ,
२४–पुण्यां ऋषि–ग, घ,
२५–निषेवितम् –क,
२६–त्रिदशां –क, घ, त्रिदशा–ख,
२७–दैवतैः– घ,
२८–किन्नरोप्सरसेवितम् –क, ख,
२९–वर–क, ख,
३०–सौगन्धकैर–क, ग,
३१–कुशुम–क,
३२–कीर्णमशेवलाम् –क, मशेवलाम् –ख,

मनोज्ञपुलिनां रम्यां सुधारससमोदकाम् । आवर्त्तै[३३]–र्बहुभिः कीर्णां गम्भीरशुभ[३४] –निस्वनाम् ।।१९।।
राजहंसैश्चक्रवाकैः[३५] सारसैरभि[३६] – कूजिताम् । वृक्षैः स्थिररुहैः सर्वैः पुष्पितैरुपशोभिताम् ।।२०।।
मत्स्य–कच्छपनक्राद्यैः सर्वैर्जलचरैर्वृताम् । दर्शनात्स्पर्शनात्स्नानात्सर्वेषामखिलेष्टदाम् ।।२१।।
दृष्ट्वा स्नात्वा च विधिना जप्त्वा तु परमं जपम् । श्रीरङ्गनिलयं[३७] गत्वा ददर्श श्रीनिकेतनम्[३८] ।।२२।।
प्रफुल्लाम्भोजनयं स्फुरन्मकरकुण्डलम् । इन्द्रनीलमणिश्यामं[३९] सूर्यायुत[४०] –समप्रभम् ।।२३।।
किरीट[४१] –हारकेयूरकङ्कणाङ्गदशोभितम् । श्रीवत्सकौस्तुभोरस्कं वनमालाविभूषितम् ।।२४।।
स्फुरत्पीताम्बरधरं दीर्घबाहुविराजितम् । सुप्रसन्नमुखाम्भोजं पुण्डरीकायतेक्षणम् ।।२५।।
सर्वलोकैकशरण[४२]–चरणाम्भोजराजितम् । श्रीभूमिनीला[४३] – सहितं पुराणपुरुषोत्तमम् ।।२६।।
प्रणम्य दण्डवद् भूमौ स्तोत्रयामास लक्ष्मणः। प्रपद्ये रङ्गभूमीशचरणौ शरणं तव ।।२७।।
श्रिय[४४] –श्चिन्तामणिगिरे विभूतिद्वयपालक ! वेदान्तात्मन् नमस्तुभ्यमव्ययाय[४५] परात्मने[४६] ।।२८।।
ज्ञानवीर्यबलैश्वर्यतेजःशक्तिगुणाय ते। आदिमध्यान्तरहितरूपायास्तु नमो नमः ।।२९।।
विभूतयस्ते सर्वेश धरातेजोऽनिलादयः। गिरा तव समुद्भूता[४७] वेदाः पद्भ्यां[४८] च मेदिनी ।।३०।।
प्राणश्च मारुतश्चोभौ जातौ प्राणेन ते विभौ[४९] ! नेत्रेण तव संजातो द्यौश्च भानुर्महेश्वर ।।३१।।
आकाशेन्द्रौ[५०] च संजातौ त्वत्कर्णेन [५१] जनार्दन ! जाता दिक्पतयोऽष्टौ ते चित्तेन कमलेक्षण ।।३२।।
तं तं महत्तमं सीमामुक्तं ब्रह्म प्रचक्षते[५२]। त्वमेव[५३] वह्नि[५४] –रध्वर्युस्त्वमेव च महाव्रतम्[५५] ।।३३।।
त्वामेव गायते[५६] छन्दो वायौ दिव्ये परे[५७] भुवि। वनस्पतिष्वौषधीषु चन्द्रमस्यप्सु खे प्रभो ।।३४।।
नक्षत्रेषु ग्रहेष्वर्के सर्वभूतेषु सर्वतः। संस्थितं परमं ब्रह्म त्वामेवाचक्षते[५८] श्रुतिः[५९] ।।३५।।
हिरण्मयवपुर्यज्ञः शुचिष[६०] –च्छुचिरित्यपि। त्वामेव परमात्मानं प्रशंसति परा श्रुतिः ।।३६।।
ओङ्कारस्त्वं यज्ञस्त्वं वषट्कारः क्रतुर्हविः। सर्वेशस्त्वं हि सर्वज्ञो विश्वेदेवाः सनातनाः[६१] ।।३७।।
त्वमेव पुण्डरीकाक्षः सर्वशेषी सतां [६२] पतिः[६३]। त्वमेव सर्वजगतां पिता [६४] माता सुहृद् विभुः ।।३८।।
त्वमुपास्योऽपि जगतां जीवाः सर्वे ह्युपासकाः। सर्वभूतनियन्ता त्वं भूतभर्त्ता च भूतकृत् [६५] ।।३९।।

३३–आवर्त्तबहुभिः –ख,
३४–सुभनिश्वनाम् –क, शुभनीश्वनाम् –ख
३५–चक्रवाकस्सारसैर–क
३६–विकुंजिताम् –क, बहुकूजिताम् –ख,
३७–नीलयं–ख,
३८–नीकेतनम् –ख,
३९–स्यामम्–ख,
४०–सूर्यषुत–ख,
४ –कीरीट–ग,
४२–शरणम् –ख, ग, घ,
४३–लीला–ग, घ,
४४– पयचिन्तामणिगिरे- ख,
श्रितचि नामणिगिरे- क, ख
४५–अ पाय–क, अव्ययाय–ख,ग,घ,
४६–परम न्मने–क,
४७–समुत् त्रा–क, ख, ग,
४८–पद्या– ,
४९–विभौ–क, विभा–ख,
५०–आकाशेन्द्र –क, आकाश इन्द्र–ख,
आकाशेन्द्रश्च –ग, घ,
५१–त्वत्करुणेन–ख,
५२–प्रचक्ष्यते–क,
५३–ते त्वमेव–क,
५४–वह्नी अध्वर्युस्–ख,
५५–महीव्रतः– क, महाव्रतः –ख, ग,
५६–गायतो–क, ख,
५७–नरे–क, घ,
५८–चक्षते –क, मेवाचक्षत–ख,
५९–श्रुती–क,
६०–शुचिछुचि–क,
६१–सनातनः– क, ख,
६२–शताम् –क,
६३–गातिः– ख, ६४–मातापिता–क,ख,
६५–भूतत् –क, भूतभृत् –ग, घ,

अनन्तार्कप्रकाशस्त्व[६६] –मनन्तगुणसंयुतः। दिव्यरूपोऽसि भगवा[६७] – ञ्छङ्खचक्रगदाधारः ।।४०।।
उद्यदादित्यविकसत्पुण्डरीकनिभेक्षणः। श्रुतयः सविशेषं त्वां वाच्यं चिद[६८]–चिदीश्वरम् ।।४१।।
परात्परं परं ब्रह्म वदन्ति निरुपाधिकम् । त्वं नित्यश्चासि नित्यानां चेतनानां च चेतनः ।।४२।।
बहूनामेक एव[६९] त्वं सन्ददासी[७०]–प्सितान् बहून् । कामांश्च विविधानत्रामुत्र चापि त्वगीश्वर ।।४३।।
पादौ तेऽच्युत प्रपद्यन्ते प्रपन्नास्त्वदुपासकाः । लक्ष्यं त्वामेव कृत्वा त[७१] आत्मानौ[७२] बाण[७३]– रूपिणः।।४४।।
ओङ्कारधनुषायोज्य प्रपत्तिवि[७४] –हितात्मना। लक्ष्ये तद् ब्रह्मणि ब्रह्मंस्त्वयि[७५] सर्वे निवेशिताः ।।४५।।
नमस्ते शेषपर्यङ्कशायिने विष्णवे नमः। श्रीधराय नमस्तुभ्यं पद्मनाभाय ते नमः ।।४६।।
वासुदेवाय कृष्णाय प्रद्युम्नाय नमो नमः। दिव्यभूषणभूषाय नमस्ते पीतवाससे ।।४७।।
दिव्यचन्दनलिप्ताय दिव्यस्रग्धारिणे नमः ।।४८।।

नमस्ते नमस्ते त्रयीनाथ विष्णो
नमस्ते नमस्ते नमो रङ्गशायिन् !
नमस्ते नमस्ते प्रपन्नाघ[७६]–हारिन्
नमस्ते नमस्ते श्रिताभीष्टदायिन् ।।४९।।
प्रसीद रङ्गाधिप देव देव
प्रसीद लक्ष्मीश जगन्निवास !
प्रसीद मां पाहि कृपासमुद्र
प्रसीद भद्रप्रद रामभद्र[**] ।।५०।।

एवं स्तुत्वा रङ्गनाथमाश्रितामरभूरुहम् । रङ्गिणा तेन दत्तश्रीर्विभूतिद्वयवैभवः ।।५१।।
स्थित्वा तत्सेवया कञ्चित्कालं रामानुजो मुनिः। महापूर्णेन सन्दिष्टो[७७] गोष्ठीपुरमनुत्तमम् ।।५२।।
कदाचिल्लक्ष्मणो योगी शिष्यैः परिवृतो ययौ[***] । गोष्ठी[७८] – पूर्णमुनिं तत्र प्रणम्य प्रीतमानसः[७९] ।।५३।।
तस्माद् विज्ञाय तत्त्वार्थं सर्वेषामुपदिष्टवान् [८०]। पुनस्तं समयज्ञं[८१] स वाक्यमाह यतीश्वरः ।।५४।।
गुरो तवाज्ञामुल्लङ्घ्य रहस्यार्थमिदं शुभम् । सर्वेषां तारणार्थाय[८२] प्रकटीकृतवानहम् ।।५५।।
तस्मान्मां दण्डय[८३] क्षिप्रं कृतागसमघाकरम् [८४]। कृपामलौकिकीं [८५] तस्य गोष्ठीपूर्णो विलोक्य सः ।।५६।।

६६–त्वम् अनन्त–घ,
६७–भगवान् शङ्खचक्र – क, ख, ग, घ,
६८–चिदचिदीश्वरी–क,
६९–एवासन् –क, ख, ग,
७०–ददासी–क, ख,*–विविधानि कामानि पादौ ते प्रपन्नास्त्वदुपासकाः– क, पादौ तव प्रपन्ना ये त्वत्पराः त्वदुपासकाः–ख,
७१–ते–क, ख, ग, घ,
७२–आत्माणो–क, आत्मनो–ग, आत्मनः– घ,
७३–प्राणरूपिणः– ग, घ,
७४–प्रतिविहितात्मना–क, प्रमत्तरहितात्मना–घ, प्रपत्तिरहितात्मना–ग,
७५–ब्रह्म स्यमेव–क, ख,
७६–प्रपन्नार्तिहारिन् –क, ख,
**–प्रसीद प्रसीद सदा रामभद्र –क, ख,
७७–संदिष्टम् –घ,
***–रहस्यं कदाचिद् वेदितुं शिष्यैः परिवृतो ययौ –ग,
७८–गोष्ठि–ख,
७९–प्रीतिमानसः–क, ख,
८०–मुपदेशवान्–क, ८१–समयं ज्ञात्वा–क, ख,
८२–तारनार्थाय –क,
८३–डंनय–ख,
८४–मवाकरम– क, मवाककराम्– ख, मथाकरम् – ग,
८५–मलौकिकाम्– क, मलौकिकम्– ख,

सन्तुष्टहृदयो भूत्वा त्वं सर्वजनरक्षकः। इत्युक्त्वा तं परिष्वज्य प्रशशंस[८६] पुनः पुनः ।।५७।।
ततस्तेनाभ्यनुज्ञातः श्रीमाल्यधरयोगिनम् । आश्रित्य तस्मात्सम्प्राप्य रहस्यान् द्राविडागमान् ।।५८।।
पुनः श्रीरङ्गमागत्य[८७] शिष्याणां ज्ञानशालिनाम् । वेदान्तशास्त्रमतुलं स तस्थौ पाठयन्मुनिः[८८] ।।५९।।
ततः काशीपुरवरादेकं दण्डिनमागतम् । यतिं लब्धवरं वाण्या[८९] चाप्रतिद्वन्द्ववादिनम् ।।६०।।
निगमैः सर्वशास्त्रैश्च पाराशर्यो[९०]-क्तिभिर्वरैः। जित्वा त्रिदण्डिनं कृत्वा रहस्यार्थानुवेदिनम् ।।६१।।
शिष्यमात्मसमं चक्रे लक्ष्मणो योगिपुङ्गवः ।।६२।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
षट्त्रिंशो ऽध्यायः ।।३६।।

८६–प्रसंशं च- क, प्रसंशंस- ख, प्रशंस च- ग,
८७–श्रीरंगमाश्रित्य–ख,
८८–पानयन् –क,
८९–वान्या–क,
९०–पारासरयोक्ति- क, पराशर्योक्ति –ग

सप्तत्रिंशो ऽध्यायः

श्रीनारायण उवाच

ततो जयार्थी स मुनिः कर्तुं भूमिप्रदक्षिणाम्[१]। शिष्यैरसङ्ख्यैः[२] सहितो जगाम[३] च यतीश्वरः ।।१।।
स्थानानि सेवयन् विष्णोस्तत्र तत्र जगत्पतेः। नाशयन् कुमतीन्[४] सर्वान् स्थापयन्[५] स्वमतं महत् ।।२।।
काशीप्रयागमथुरायोध्या द्वारावती[६] शुभा[७]। वदरीनैमिषारण्यहरिद्वारगयादयः ।।३।।
ये ये सन्ति[८] हरेर्देशास्तेषु तेषु महात्मनः[९]। स्व[१०] – शिष्यान् स्थापयित्वाथ शारदापीठमाप[११] सः ।।४।।
प्रत्युद्गतः शारदया[१२] तस्या लेभे वरान् मुनिः। स्वकृतं शास्त्रमखिलं ददौ तस्यै [१३] महायशाः ।।५।।
मूर्ध्ना प्रगृह्य[१४] तच्छास्त्रं[१५] भारती प्रशशंस[१६] तम्। ततस्तयाभ्यनुज्ञातो गत्वा श्रीपुरुषोत्तमम् ।।६।।
सर्वेश्वरं जगन्नाथं परात्परमजं विभुम् । नीलमेघनिभश्यामं सहस्रतरणिप्रभम् ।।७।।
भूषणैर्भूषितं दिव्यैः काञ्चनांशुकधारिणम् । दिव्यचन्दनलिप्ताङ्गं वनमालाविभूषितम् ।।८।।
बलभद्रसुभद्राभ्यां समन्वितमजादिभिः। सुरैर्ब्रह्मर्षिभिर्नित्यं सेवितं सनकादिभिः ।।९।।
दृष्ट्वा प्रणम्य तत्पादौ स्तोत्रयामास तं मुनिः। श्रीमन्नीला[१७]–चलाधीशप्रणतार्तिहर प्रभो ।।१०।।
प्रपद्ये चरणौ देव शरण्यौ[१८] शरणं तव। नमो नमस्ते श्रीशाय प्रभवे लोकसाक्षिणे [१९] ।।११।।
सर्वेश्वराय सर्वाय सर्वभूतात्मने नमः। जगच्छरीरिणे तुभ्यं[२०] जगतां क्लेशहारिणे ।।१२।।
जगद्रक्षणशीलाय जगन्नाथाय ते नमः। पुरुषाय नमस्तुभ्यमच्युतायाविकारिणे ।।१३।।
पुरुषोत्तमसञ्ज्ञाय पुराणाय नमो नमः। परमात्मने नमस्तुभ्यं परमानन्ददायिने ।।१४।।
परात्परेशाय नमः परमाय नमो नमः। त्वया सृष्टमिदं सर्वं त्वयि स्थावरजङ्गमम् ।।१५।।
त्वया संरक्ष्यते नित्ये त्वय्येव परिलीयते[२१]। प्राणाः[२२] प्रजायन्ते[२३] त्वत्तो मनः[२४] सर्वेन्द्रियाणि[२५] च ।।१६।।
त्वत्त एव प्रजायन्ते खं वायुर्ज्योतिरेव च। आपश्च पृथिवी विश्वधारिणी[२६] च प्रजायते ।।१७।।
रुद्रश्च जायते त्वत्त इन्द्रश्चैव प्रजापतिः। त्वत्त एव प्रजायन्त[२७] आदित्या वसवस्तथा ।।१८।।
रुद्रास्तद्दासी[२८] शर्वाणी [२९] जायन्ते त्वत्त एव हि। ब्रह्मरुद्रादयो देवा दासाः[३०] प्रियतमास्तव ।।१९।।

१–प्रदक्षिणम्–ग,
२–रशंख्यै–क,
३–यगाम–क,
४–कुमतान्–ख,घ,
५–छापयन्–ग,
६–द्वारामती–ग,
७–शुभाः–घ,
८–शंति–क,
९–महात्मनाः–क,
१०–स–क,
११–पीठमग्रतः–क,
१२–शारदायास्तस्या–क,ग,
१३–तस्य–क, तस्या–ग
१४–गृह्य–क,
१५–ततछास्त्रम्–क,
१६–प्रससंश–क, प्रशसंस–ग,
१७–श्रीमनीला–क,
१८–शरण्यशरणे–घ,
१९–शाक्षिणे–क,
२०–नमः–क,
२१–परिलुप्यते–क,
२२–गुणः–क, प्राणः–ग,
२३–प्रजायते–क,ग,
२४–मणः–क,
२५–यानि–क,
२६–धारिणा–क, धारिणे–ग,
२७–प्रजायन्ते–क,घ,
२८–रुद्राश्चदासी–क, रुद्रादित्याश्च–ग, रुद्राश्चदासा–घ
२९–सर्वाणि–क,ग,घ,
३०–दासः–क,

अधश्चोर्ध्वं च सर्वत्र व्याप्तोऽसि महतो महान्। अणीयांस्त्वमणोश्चापि जन्तूनां हृद्गुहालयः ।।२०।।
निष्कलङ्को निराख्यातः शुद्ध एकः सनातनः। त्वत्तो नारायणाद् देवान्न[३१] द्वितीयोऽस्ति कश्चन ।।२१।।
चतुर्व्यूह नमस्तुभ्यं चतुरात्मन् नमोऽस्तु ते। नमः पञ्चस्वरूपाय पाञ्चकालिकयोगिभिः[३२] ।।२२।।
पञ्चस्वपि च कालेषु[३३] प्रपन्नैः पूज्यसे सदा। अर्थपञ्चकतत्त्वज्ञाः पञ्चसंस्कारसंस्कृताः ।।२३।।
पञ्चावस्थास्वरूपं ते विजानन्ति सदा प्रभो। चतुर्वाक्परिपूर्णानि[३४] ये पदानि विदुस्तव ।।२४।।
ते भूसुराः[३५] सर्वजगद् रक्षन्ति तव किङ्कराः। नमस्ते वायुदेवाय कारुण्या [३६] – मृतवर्षिणे ।।२५।।
विष्णवे त्रिजगद्धाम्ने शुद्धसत्त्वाय ते नमः। जिष्णवे त्रिजगद्धात्रे मुक्तिदायाखिलात्मने ।।२६।।
विश्वरूपाय वेद्याय जगन्नाथाय ते नमः। नित्यमुक्तैकभोग्याय श्रीभूनीला[३७] – धिपाय च ।।२७।।
पुरुषोत्तमदेवाय यादवेन्द्राय ते नमः। नमस्ते सच्चिदानन्दरूपाय परमात्मने ।।२८।।
नित्याय निर्विकाराय नमस्ते हेतुहेतवे। नमो ब्रह्मेशपूज्याय त्रिगुणातीत ते नमः ।।२९।।
नमोऽस्तु शाश्वता[३८] – नन्तमूलकन्दाय योगिने। नमो विनिर्गतोपाधिस्वरूपाय महात्मने [३९] ।।३०।।
नमोऽस्तु जगतां पित्रे यौगिध्येयात्मने नमः। नमो नीलाद्रिनाथाय सुभद्राप्राणबल्लभ ।।३१।।
बलभद्र[४०] –समेताय जगन्नाथाय ते नमः। सकृत्प्रपन्नजनानां[४१] रक्षणव्रतधारिणे ।।३२।।
कोटिकन्दर्पलावण्यनिधये ते नमो नमः। नमोऽस्त्वनन्तकल्याणगुणार्णवाय वेधसे ।।३३।।
विभूतिद्वयनाथाय सर्वशेषिन्नमोऽस्तु ते ।।३४।।

प्रसीद मे श्रीपुरुषोत्तमाथ[४२]

प्रसीद नीलाचलनीलमेघ !

प्रसीद लक्ष्मीश परापरेश

प्रसीद मां पालय ते प्रपन्नम् ।।३५।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
सप्तत्रिंशोऽध्यायः ।।३७।।

३१–देवाः–घ,
३२–योगिनेः–क,
३३–काले च–क,
३४–परिपूर्णाभिर्–ग,
३५–भूरादि–क,
३६–करुणामृत–क,
३७–लीला–ग,घ,
३८–साश्वता–क,
३९–यमात्मने–घ,
४०–बलिभद्र–घ,
४१–जनता–घ,
४२–पुरुषोत्तमाय–क, पुरुषोत्तमालय–ग,घ,

अष्टत्रिंशो ऽध्यायः

श्रीनारायण उवाच

एवं स्तुत्वा जगन्नाथं रामानुजमुनीश्वरः। तेन सम्भावितः प्रीत्या वात्सल्योदधिना भृशम् ।।१।।
ततः श्रीकूर्ममासाद्य कूर्मनाथं प्रपूज्य सः। सिंहाचलं च सम्प्राप्य संसेव्य नृहरिं विभुम् ।।२।।
श्वेताद्रौ[1] श्रीनृसिंहं च काकुलाधीश्वरं हरिम्। नारायणं पारमात्म्ये[2] श्रीनृसिंहमहोबले[3] ।।३।।
संसेव्य वेङ्कटगिरिं जगाम यतिपुङ्गवः। कासारादयस्तु[4] पूर्वे शेषरूपमिमं गिरिम् ।।४।।
नारोहन्तीति विज्ञाय नारुरोह[5] स भूधरम्। सम्प्रार्थितोऽथ तत्रत्यैः स्वशिष्यैश्च मुहुर्मुहुः ।।५।।
समारुह्य महीध्रं तं महाघहरणं नृणाम्। मुनिं श्रीशैलपूर्णाख्यं प्रणम्य विनयान्वितः ।।६।।
स्वामिपुष्करिणीं[6] सर्वमुक्तिदां[7] कल्मषापहाम्[8]। विगाह्य ततटे रम्ये जजाप परमं जपम्[9] ।।७।।
भूवराहं प्रणम्याथ श्रीनिवासस्य मन्दिरम्। परिक्रम्य प्रविश्याथ ददर्श श्रीपतिं हरिम् ।।८।।
कोटिद्युमणिसङ्काशं मदनायुतसुन्दरम्। सुवर्णवसनं[10] दिव्यचन्दनस्रग्विराजितम् ।।९।।
श्रीश्रीवत्समणि[11]–श्रेणिस्फुरत्पीनोरुवक्षसम्। चतुर्भुजं विशालाक्षं शरदिन्दु[12] – समाननम् ।।१०।।
शङ्खचक्रधरं फुल्लरक्ताङ्घ्रियुगलं हरिम्। हारकेयूरमुकुटकुण्डलाद्यैर्विभूषणैः ।।११।।
भूषितं परमात्मानं परमेशं परात्परम्। प्रणम्य हृष्टो[13] ऽक्षिभ्यां स मुञ्चन्नानन्दजं पयः ।।१२।।
कृताञ्जलिपुटो भूत्वा स्तोत्रयामास तं विभुम्। श्रीमच्छेषाचलाधीश श्रीनिवास[14] जगद्गुरो ।।१३।।
नमः पूर्वाय[15] पूर्णाय तेऽकार[16] – रार्थाय ते नमः। नमो नमस्ते श्रीशाय कारणाय नमो नमः ।।१४।।
रक्षकाय नमस्तुभ्यं ज्ञानभक्तिप्रदाय च। अनन्यार्हस्य दासस्य मकारार्थस्य मे विभो ।।१५।।
त्वां विनान्या गतिर्नास्ति नत[17] – कल्पतरो गुरो! अनन्यशरणोऽहं ते चरणौ शरणं परम् ।।१६।।
अहङ्कारविनिर्मुक्तः प्रपद्ये ममतोज्झितः[18]। नाराणां निबहानां त्वं गतिस्तेष्वयनं तव ।।१७।।
सर्वान्तर्यामिने[19] तस्मै नमस्ते भक्तवत्सल! कैङ्कर्यं देहि मे देव नमो वात्सल्यसागर ।।१८।।
मन्त्रमूर्त्ते नमस्तुभ्यं मन्त्रराजाय ते नमः। जगत्सर्वं हि चिदचिद् दृश्यते श्रूयते हि यत् ।।१९।।
तस्यान्तर्बहिरावृत्य संस्थिताय नमो नमः। इदं ग्रसित्वा कल्पान्ते कुक्षौ धृत्वा चिरं[20] प्रभो ।।२०।।
कल्पादौ सृजसि त्वं वै तस्मै देवाय ते नमः। विश्वतश्चक्षुषे[21] तुभ्यं नमो विश्वमुखाय ते ।।२१।।
विश्वतः शुभहस्ताय विश्वपादाय ते नमः। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।।२२।।

१–तोताद्रौ–क,घ,
२–पारमात्म्यम्–ग,
३–श्रीबले च–ग,
४–कासरादयः– क, परकालादयः– ग, कासाराद्या–घ,
५–नारोहत्–क,
६–पुष्करणीं–क,ग,
७–मुक्तिदम्–क,
८–कल्मषापहम्–क,
९–जपः– क,
१०–वशनम्–क,
११–श्रीवत्सकौस्तुभमणिस्फुरत्–क,
१२–सरदिन्दु–क,
१३–संप्रहृष्टो–क*प्रणम्य भूषणैर्हृष्टो मुंचन्नयनजं पयः– ग,
१४–श्रीनिवाश–ग,
१५–पूर्णाय पूर्वाय–क,
१६–अकारार्थाय–क,ग,घ,
१७–नमः– क,
१८–ममतोद्दितः– क ममतोभितः– ग,
१९–र्यामिणे–ग,घ,.
२०–चिरे–क,
२१–विश्वतश्चक्षुषे–क, विश्वतः चक्षुषे–ग,

त्वं लोकान् सर्वतो व्याप्त्वा ह्य[२२]त्यतिष्ठद्दशाङ्गुलम्। उतामृतत्वस्येशानो[२३] यदन्नेनातिरोहति ।।२३।।
यद्भूतं यच्च भाव्यं तत्सर्वं माधव त्वयि। पतिर्विश्वस्य जगत आत्मनामीश्वरः प्रभुः ।।२४।।
हिरण्मयस्त्वं भगवान् परमात्मा जगत्सुहृत्! शास्तासि जगतामेको न्यासिनां परमा गतिः ।।२५।।
यस्त्वं रमेश्वरः प्रोक्तस्त्वकाराख्यः[२४] स्वरो महान्। परो महेश्वरो देवो वेदान्तेषु प्रतिष्ठितः ।।२६।।
विभूतिद्वयनाथस्त्वं परमेशः परात्परः। श्रीभूनीलाधिपः[२५] स्वामी नित्यमुक्तैश्च सेवितः ।।२७।।
यज्ञो यज्ञमयो यज्वा[२६] यज्ञकृद् यज्ञभुग्विभुः। यज्ञभृद् यज्ञपुरुषस्त्वमेव परतः परः ।।२८।।
त्वत्तो यज्ञः सर्वहुत[२७] ऋग्यजुः[२८] – सामानि जज्ञिरे[२९]। अश्वाश्चापि व्यजायन्त गावश्च पुरुषादयः ।।२९।।

ब्राह्मणास्त्वन्मुखाज्जाता बाहुभ्यां क्षत्रियाः[३०] कृताः।
ऊरुभ्यां जज्ञिरे[३१] वैश्याः पद्भ्यां शूद्राः प्रजज्ञिरे[३२] ।।३०।।

त्वत्पद्भ्यामेव पृथिवी शिरसो द्यौरजायत। मनसश्चन्द्रमा जातश्चक्षषो जायते रविः ।।३१।।
मुखादग्निर्महेन्द्रश्च प्राणाद् वायुरजायत। नाभेर्ब्रह्मा च गगनं दिशः श्रोत्रात्प्रजज्ञिरे[३३] ।।३२।।
एवं सृष्ट्वा जगत् सर्वं निजलीला[३४] – समुद्भवम्। त्वमेव ग्रससे भूयस्तान्तवं चोर्णनाभिवत् ।।३३।।
आदित्यवर्णं तमसः परस्ताज्ज्योतिरच्युतः। त्वमेवैकार्णवीभूते जले मायावटच्छदे ।।३४।।
जगत्स्वजठरे कृत्वा तस्मिंछेषे[३५] सनातनः। एकस्त्वमभूः [३६] सर्वात्मा विष्णुर्नारायणोऽव्ययः ।।३५।।
न ब्रह्मा न शिवो देवा ऋषयोऽपि न मानवाः। नेमे द्यावापृथिव्यौ[३७] च न चन्द्रः सूर्य एव वा ।।३६।।
अग्निर्वा नहि लोकाश्च कुतश्चाभासि वा हरे (?)! पुनस्त्वयैव[३८] सृज्यन्ते लोकाः सर्वे यथाक्रमम् ।।३७।।
दासभूतं तवैतद् हि सब्रह्म सकलं जगत्। नावलोकयसे[३९] चेत्त्वमिमांल्लोका[४०]–ञ्छि ्यः पते ।।३८।।
भवितुं नालमेवैते प्रवृत्तिस्तु कुतो भवेत्। त्वमेव श्रीः श्रियो देवः शुद्धसात्त्विक – विग्रहः ।।३९।।
त्वमेव पुण्डरीकाक्षस्त्वमेव पुरुषोत्तमः। तवायुतायुतशत[४१] – भागैकांशे स्थितं जगत् ।।४०।।
त्वं पासि सर्वलोकेश भक्तान् न्यस्तभरान् हरे! सर्वबन्धाद्विमुच्याशु प्रपन्नामरभूरुह ।।४१।।

नमः सकृत्तेऽखिल [४२] लोकनाथ
द्विस्ते नमः श्रीश नमस्त्रिरस्तु।
नमश्चतुस्ते जगदीश पञ्च–
कृत्वो[४३] नमस्तेऽस्तु कृपापयोधे ।।४२।।

२२–अत्यतिष्ठद्–क,ग,घ,
२३–शानः– क, शान– ग,घ,
२४–अकाराख्यैश्वरो –क,
अकाराख्यः– घ, आकाराख्यः– ग,
२५–लीला –ग,घ,
२६–यज्ञ –ग,घ,
२७–सर्वहुतः ग,घ,
२८–सृयस्सामानि–क,
२९–यज्ञिरे–क,
३०–क्षत्रियः– क,
३१–यज्ञिरे–क,
३२–प्रयज्ञिरे–क,
३३–प्रयज्ञिरे–क,
३४–नीला –क,
३५–तस्मिन्छेते–क, तस्मिन्शेषे–ग,घ,
३६एकोभूस्त्वं हि–घ,
३७–द्यावापृथिवी–क,ग,
३८–त्वज्येद्येव–क, त्वययेन–घ,
३९–लोकयते–क,
४०–त्वमिमान् लोकाः– क, त्वं इमान् लोकान्–घ,
त्वमिमान् लोकान्–ग,
४१–सत–ग,
४२–नम –क,ग,
४३–कृतो–क

नमो नमस्ते शतकृत्व आद्य
नमो नमस्तेऽथ सहस्रकृत्वः।
अनन्तकृत्वोऽथ नमो नमस्ते*
पुनश्च भूयोऽपि नमो नमस्ते ।।४३।।

प्रसीद शेषाचलनित्यवास
प्रसीद लक्ष्मीश जगन्निवास!
प्रसीद विश्वाधिप वेङ्कटेश
प्रसीद नारायण सर्वशेषिन्[४४] ।।४४।।

प्रपद्ये शरण्यौ पदाब्जौ प्रभो ते**
सदा[४५] योगिनां मानसाब्जे वसन्तौ।
ममोपायभूतावहं[४६] चान्यमेतौ[४७]
विना रक्षकं नैव जाने कदापि[४८] ।।४५।।

अयमेव परं तत्त्वमिदमेव[४९] परं पदम्। अस्मात्क्षेत्रात् परं नास्ति नास्ति दैवमितः परम् ।।४६।।
इति तं स्तोत्रयामास निगमाद्यैः पुनः पुनः। ततो रामानुजो योगी तत्रोषित्वा दिनत्रयम् ।।४७।।
श्रीशैलेश[५०]–पूर्णाच्छ्रीमद्रामायणरहस्यकम्। विज्ञाय तेनानुज्ञातः प्रययौ सेतु[५१] – मुत्तमम् ।।४८।।
तत्र तत्र स्थितान् सर्वान् संसेव्य[५२] हरिविग्रहान्। विजित्य विमतान्[५३] सर्वान् स्थापयित्वा हरेर्मतम् ।।४९।।
आससाद पुनः श्रीमद्रङ्गेशवरनिकेतनम्। संस्थित्वा तत्र रङ्गेशं सेवयन् सततं विभुम्*** ।।५०।।
सर्वचेतनवात्सल्यात्परिपूर्णकृपाम्बुधिः। पाषण्डैर्बहुभिर्दुष्टैस्त्यक्तवेदैः कुबुद्धिभिः[५४] ।।५१।।
प्राप्तै[५५]–रासुरशास्त्राणि कल्पितानि कुयुक्तिभिः। सर्वतः सङ्कुल[५६] लोकं विनष्टहरिवैभवम् ।।५२।।
उद्धर्तुं लक्ष्मणो योगी कृत्वा श्रीभाष्यमुत्तमम्। पाषण्ड[५७] – बौद्धचार्वाकमायावाद्यार्हतादिकान् ।।५३।।
सम्भित्वा[५८] कुमतान् सर्वान् पारशर्यमुनेर्मतम्।लोकेऽस्मिन् प्रकटीचक्रे विष्णोः प्रियतमं महत् ।।५४।।
ततः स दाशरथ्या[५९]-द्यैरसङ्ख्यैः[६०] शिष्यसञ्चयैः[६१]। सेवितो वाचयंस्तेभ्यः सच्छा[६२]–स्त्राण्यनिशं हरेः ।।५५।।

---

*–नमोनमोऽनन्तकृत्वो नमस्ते –क,ग,घ,
४४–शेषान्–क
**–प्रपद्येशरण्यौ वदान्यौ पदाब्जौ –क,
४५–महायोगिनाम्–ग,
४६–ममोपायमेतावाहं–क, ममोपायमेतावहम् –ग,
४७–चानमेतौ–घ,
४८–न जाने–क,ग,
४९–तत्त्वं इदम्–घ,
५०–श्रीशैलपूर्णादलमेद्रामा –क, श्रीशैलपूर्णात् –घ,
५१–क्षेत्रमुत्तमम् –क,
५२–ससंख्य –क,
५३–समयान् –घ
***–इयं पङ्क्तिः– क मातृकायां नोपलभ्यते।,
५४–त्यक्तवेदैक–बुद्धिभिः– क,घ,
५५–प्राप्तोराशुर–क,
५६–सकलम्–क,
५७–पाखण्ड–ग,
५८–तान् भित्वा–घ,
५९–दासरथ्याद्यैर्–ग,
६०–शंख्यैः– क,
६१–शंचयै– क,
६२–शत्छास्त्रा–क,

कुर्वन्[६३] हि नित्यकैङ्कर्यं संश्रितामरभूरुहः। रङ्गेश्वर[६४] – प्राणतुल्यो ददन्मुक्तिं नृणां सदा[६५] ।।५६।।
सन्तस्थौ[६६] लक्ष्मणो योगी[६७] महा[६८]–योगसमाधिना। एवं नारायणध्यानयोगेन यतिपुङ्गवः ।।५७।।
सुषु[६९] –म्णया विनिष्क्र[७०] म्य परमं पदमाप्त[७१] वान् ।।५८।।

एतां कथां श्रुतिसुखां[७२] निगमान्तभाष्य–[७३]
कारस्य लक्ष्मणमुनेः शृणुयात्पठेद् यः।
सम्प्राप्य भागवतभक्तिमिहोद्यतश्री–
र्गच्छेत्पदं विधिशिवार्चितमच्युतस्य ।।५९।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये–
ऽष्टत्रिंशो ऽध्यायः ।।३८।।

———

६३–कुर्वन्नित्य–क, कुर्वति–ग,
६४–रंगेश–क,
६५–सखा –ग,घ,
६६–तस्थौ –क,
६७–योगीशः– क,
६८–सदा –क,ग,
६९–सुषुम्नानावन् –क,
७०–निष्क्राम्य –क,
७१–माप्नुयात् –क,ग,
७२–श्रुतिसखीम् –ग, श्रुतिशिखा –क,
७३–भाष्य –क

एकोनचत्वारिंशो ऽध्यायः

श्रीनारायण उवाच

एते द्वादशलोकेऽस्मिन् महाभागवतोत्तमाः। ममातीव[१] प्रियतमा नर प्राणसमाहिताः ।।१।।
ब्रह्मरुद्रादिदेवेभ्यः सनकादिभ्य एव च। सर्वब्रह्मर्षिमुख्येभ्यो योगिभ्यस्तेऽधिका भुवि[*] ।।२।।
किं भाषणेन बहुना शृणु वक्ष्यामि सुव्रत[**]! मत्त एवाधिकाः श्रीभूनीला[२]-भ्योऽप्यधिकप्रियाः ।।३।।
मत्पूजायाः परा तेषां पूजा सद्योऽपवर्गदा। आराधयन्ति ये भूमा[३]-वेतान् भागवतोत्तमान् ।।४।।
ते प्राप्नुवन्ति परमं पदं दुर्लभमच्युतम्। न कर्म नहि मे[४] भक्तिर्न योगो ज्ञानमुत्तमम् ।।५।।
तेषामाराधनादेव मुक्तिं यान्ति नराः पराम्। एवमुक्ते महाभागे[५] नरो नारायणे[६] मुनौ ।।६।।
प्रणम्योवाच वचनं श्रोतुं तद्वैभवं महत्।

नर उवाच

महाभागवतान् स[७] – र्वानर्चयित्वा नरा भुवि ।।७।।
ये गच्छन्ति पदं विष्णोस्तान् वदस्व मम[८] प्रभो! भक्तिसारादि[९]– भक्तानां चारित्र्यं मोक्षसाधनम् ।।८।।
तस्मात्तच्छ्रोतुकामोऽहं लोकानां हितकाम्यया[१०] *** ।

श्रीनारायण उवाच

पुरा कश्चिद्विप्रबन्धुर्दुःशील इति विश्रुतः ।।९।।
पापीयान् कामुकः क्रूरश्चौरो[११] हिंसारतः[१२] सदा। सुरापी ब्रह्महा स्तेयी[१३] गोघ्नी स्त्रीघ्नी दुराशयः ।।१०।।
कांचिन्निषादीं [१४] सङ्गम्य निषादैः सह भूतले। चौरवृत्त्याचरं[१५]छेषाचलाध्वनि समागतान् ।।११।।
श्रीवैष्णवान् सन्निरुध्य[१६] जहार धनसंचयम्। तदा ते वैष्णवाः शान्ताः स्मरन्तो हरिमव्ययम् ।।१२।।
चौरं ते[१७] मधुरैर्वाक्यैरूचुर्वि[१८]-ज्ञानकोविदाः। अनित्यस्य शरीरस्य घटकल्पस्य [१९] तस्कर ।।१३।।

१–ममात्यैव –क
*–पडित्तरियं–क मातृकायां नोपलभ्यते।
**–इयं पड़ित्तरपि –क मातृकायां न प्राप्यते।
२–श्रीभूनीलाभ्योश्चाधिकाः प्रियाः– क,
श्रीभूमिकाम्यामपि प्रियाः– ग,
३–भूमौ एतान् –ग,घ,
४–ते –ग,
५–महाभागो –घ,
६–नारायणमुनौ नरः– क, नरो नारायणेन तु –घ,
७–भक्तान् –क, विप्रान –घ,
८–महा –क,
९–भगवद्भक्तभक्तानाम् –ग,
१०–कामया –ग
***–अत्र –क मातृकायां पृष्ठकोणेषु कतिपयश्लोका लिखितास्तेषु पठनीयश्लोका सन्ति –"
नर उवाच – सम्यक् श्रुता महाभाग मया पुण्यकथा शुभा।
श्रीरामानुजाचार्यस्य महापापौघनाशिनी।
भूयः स्यादन्यदर्चायाः कथां वेदमहामुने।
नारायण उवाच–कथयिष्यामि भूयो विचित्रामपरां कथाम्।
महाभाग नर श्रीमन् समाहितमनाः शृणु।
११–चोरो –क,ख,ग,घ,
१२–रतिः– घ,
१३–स्तेयो –क,
१४–कांचीदेशं समागम्य–क,
१५–चोरवृत्त्याचरणशेषा–क,
चोरवृत्त्याचरन् शेषा–ग,घ
१६–सन्निरुध्वा–क
१७–तैर्–क
१८–रुचि–ग,घ
१९–तुल्यस्य–ग

दुःखालयस्य रक्षार्थं पीडयित्वा बहून् जनान्। कथं करोषि दुष्टात्मन् चोरवृत्त्या धनार्जनम् ।।१४।।
करोषि यदि चेन्मोहात्तेन द्रव्येण[२०] सन्ततम्। परकाल इव त्वं च नाकरोर्वै –[२१]–ष्णवार्चनम् ।।१५।।
कथं तरिष्यसे मूढ दुस्तराद् दुःखसागरात्। तच्छ्रुत्वा वचनं तेषां दुःशीलः पुनरब्रवीत् ।।१६।।
भार्यां विहाय सुखदां प्राणेभ्योऽपि गरीयसीम्। पुत्रानात्मप्रियांश्चापि कथं भागवतार्चनम् ।।१७।।
श्रुत्वा मूढस्य तद्वाक्यं महाभागवतोत्तमाः। प्रहसन्तो ऽब्रुवन्[२२] वाक्यं कामुकं मूढचेतसम् ।।१८।।
कथं त्वं दुःखदां भार्यां सुतं त्विष्टं[२३] च मन्यसे। मोहं विहाय पश्यस्व स्त्रियो देहं जुगुप्सितम् ।।१९।।
चर्ममांसास्थिमेदोसृग्विण्मूत्रनखरोमभिः। मज्जाशुक्रादिभिः पूर्णं सामयं व्याधि[२४]–संयुतम् ।।२०।।

वदनं श्लेष्मसदनं नेत्रे तूङ्गीर्णदूषिते[२५](?)। निःश्वास[२६]–निर्गमान्तस्थविट्दुर्गन्धा तु नासिका ।।२१।।
दन्तस्थविड्मला[२७]–जिह्वा व्याप्ताऽशुचियुतो ऽधरः[२८]। कुक्षौ तु पिषितग्रन्थि[२९]–विरहस्वेददूषितौ ।।२२।।
योनिश्च[३०] मूत्रसङ्क्लिन्ना[३१] नितम्बो मलपूरितः। ईदृशेषु[३२] स्त्रियोऽङ्गेषु निन्दितेषु महात्मभिः ।।२३।।
त्वां विना कामुकं लोके को मोहयति बुद्धिमान्। अस्थिमांसादिसङ्कीर्णा व्याघ्रवासगुहा यथा ।।२४।।
तथा कन्दर्पशार्दूलनिवासा[३३] अपि योषितः। तस्मात् स्त्रीषु न मुह्यन्ति[३४] श्रेयस्कामाः कदाचन ।।२५।।
चक्षुषा च न पश्यन्ति मलमूत्रहृदाः स्त्रियः। पुत्रेष्वपि महात्मानः कृतघ्नेषु गुणै:[३५] पितुः ।।२६।।
पूजावमाने कुर्वत्सु दाढ्यर्वार्धिक[३६]–भावयोः। नानुरज्जन्ति दुःशील कदाचिदपि भूतले ।।२७।।
धनेष्वप्यर्जने[३७] नाशे रक्षणे च व्यये तथा। दुःखदेषु न मुह्यन्ति ते त्यजन्त्येषणा[३८]–त्रयम् ।।२८।।
तदा तेषां वचः श्रुत्वा दुःशीलो गतमूढधीः*।। उवाच मधुरं वाक्यं महाभागवतेषु सः** ।।२९।।
प्रशान्तचित्तस्तान् सर्वान् प्रणम्य प्राह[३९] वैष्णवान्। पापिष्ठोऽहं महाभागाः सर्वजीवदयापराः ।।३०।।
पापाब्धेर्दुस्तरादस्मात् तरिष्यामि कथं बत[४०]। वदध्वं हि ममोपायमार्त्तस्याश्रितवत्सलाः ।।३१।।
इति सम्प्रार्थयन्तं तमा[४१]–श्वास्यात्यन्तहर्षिताः। प्रहसन्तोऽब्रुवन्वाक्यमीक्षमाणाः[४२] परस्परम् ।।३२।।
दुः शील[४३] सुमनीषेयं सुशीलोऽस्त्यधुना[४४] भवान्। उपदिशामो[४५] यच्छ्रेयः श्रुत्वा तत्कुरु माचिरम् ।।३३।।
कासारं योगिनं भूतनामानं महदाह्वयम्। भक्तिसारं च योगीन्द्रं शठकोपमुनीश्वरम् ।।३४।।
मुनिं[४६] मधुरकव्याख्यं कुलशेखरयोगिनम्। मुनिवाहनयोगीन्द्रं भक्तपादरजोऽभिधम्[४७] ।।३५।।

२०–द्रव्येन –क
२१–नाकरोद् –क,ख,ग
२२–ब्रुवद् –ख
२३–चेष्टम् –क,ख
२४–बाधसंसुतम् –क,घ, ख्याविधिसंयुतम् –ख
२५–दूषिके –क,घ
२६–निस्वासांगमान्तस्थविदुर्गन्था –क,
निश्वासानिर्गमान्तस्थ –ग, निश्वासोगन्ध अन्तस्थः– ख
२७–जिह्वादन्तस्थ–क,ख, जिह्वादन्तस्य बिंडाला –ग
२८–युतोधरः– घ
२९–विशितगन्धि–क,ख
३०–जोनिश्च–क
३१–शंक्लिन्ना–क
३२–ईद्रशेषु –क
३३–निवासत्रापि–ख
३४–मुह्यन्ते –क,ख,ग
३५–गुणः– क, गुणान् –ख,ग
३६–वर्थिक–क
३७–धनेष्वप्यार्जने–क,ख,ग
३८–तत्यजन्त्युत्तमा जनाः–क, ख, तत्त्यजाहीषणत्रयम्–ग
*–इयं पङ्क्तिः– ग मातृकायां न प्राप्यते
**–एवं ब्रुवाणेषु तदा महाभागवतेषु सः– ग
३९–प्रणम्याह स–क,ख
४०–वद –क,ख
४१–तमास्वास्या –क,ख, तंआश्वास्या –घ
४२–मीक्षयन्तः– क,ख,ग,घ
४३–दुःशीलासीन्मनीषेयम्–क,ख,
दुःशीलासन्मनीषेयम्– ग
४४–सुशीलोऽस्यधुना–क,ख,ग,घ
४५–उपादिशाम–घ
४६–मुनी–ख
४७–भिदम्–क

श्रीविष्णुचित्तं योगीशं परकालं मुनीश्वरम्। त्रिदण्डमण्डितकरं रामानुजयतीश्वरम् ।।३६।।
द्वादशैतान् महाभागान् महाभागवतोत्तमान्। आराधय सदा भक्त्या कृत्वा मृण्मयविग्रहान् ।।३७।।
अर्घ्यपाद्यादिभिः सर्वैरुपचारैर्यथाविधि। नैवेद्यैरर्चस्वैतान्[४८] वन्दनैश्च प्रदक्षिणैः ।।३८।।
एवं तमुपदिश्याथ वैष्णवा भगवत्प्रियाः[४९]। तेन सम्पूजिताः सर्वे प्रययुर्वेङ्कटाचलम् ।।३९।।
ततः स विप्रस्तत्रैव गृहीत्वा मृत्तिकां शुभाम्। कृत्वा प्रतिकृतिं तेषां[५०] द्वादशानां महात्मनाम् ।।४०।।
पूजयामास विधिवद् यथालब्धनिवेदनैः। एतस्मिन्नन्तरे काले बहवः कालकिङ्कराः ।।४१।।
तस्यान्तिके[५१] गताः पाशैस्तीक्ष्णैर्घोरभयङ्करैः। बध्वा तं विचकर्षु[५२] स्ते तथैव[५३] हरिसेवकाः[५४] ।।४२।।
सम्प्राय कुमुदाद्यास्तान् निर्भत्स्यं यमकिङ्करान्। विमोचयित्वा तं विप्रं विमाने सूर्यसन्निभे ।।४३।।
आरोप्याण्डमतीत्याथ त्रिपादभूतिं सनातनीम्[५५]। प्रविश्य हरिसान्निध्यं विनिन्युर्हरिपार्षदाः ।।४४।।
सर्वेश्वरो ऽपि तं दृष्ट्वा भक्तानामिष्टदायकः। सर्वेभ्यो नित्यमुक्तेभ्यश्चक्रे[५६] श्रेष्ठतमं[५७] मुदा ।।४५।।
यमभृत्यास्तथा[५८] क्षिप्रं[५९] गत्वान्तका[६०]ऽन्तिकम्। वेपमानाः प्रणम्योचुः कृतान्ताय महात्मने ।।४६।।
भूलोके भूसुरं कञ्चित्पापिष्ठं पतितं शठम्। गृहीत्वा तव सान्निध्यं वयं नेतुं समुद्यताः ।।४७।।
तदागत्य[६१] च नन्दाद्या विष्णुपार्षदसत्तमाः। कोटिसूर्यप्रतीकाशाः शङ्खचक्रगदाधराः ।।४८।।
पीताम्बरधराः सर्वे[६२] वनमालासमन्विताः। स्फुरत्किरीटकटककुण्डलाङ्गदधारिणः ।।४९।।
चतुर्भुजा विशालाक्षा घनोरस्काः[६३] शुभाननाः[६४]। दिव्यचन्दनलिप्ताङ्गा[६५] मुक्ताहारोपशोभिताः ।।५०।।
अप्रमेया महात्मानः सर्वज्ञाः सर्वरक्षकाः। समागत्य निरस्यास्मान् मोचयित्वाथ भूसुरम् ।।५१।।
विमानं सूर्यसङ्काशमारोप्य[६६] सह तेन वै। तदैवोर्ध्वपदं याता वदस्वैतस्य कारणम् ।।५२।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे
नरनारायणसंवादे महायोगिमाहात्म्ये
एकोनचत्वारिंशो ऽध्यायः ।।३९।।

४८–रच्ययस्यैतान् –क, रर्च्ययस्वैतान् –ग
४९–भागकरप्रियाः– ख
५०–शेषाम् –क
५१–तस्यान्त्यगते –क, तस्याऽपि च गले –ग,घ
५२–चकर्षुस्ते–ख
५३–तदैव–ख
५४–शेवकाः– क
५५–सनातनम् –घ
५६–मुक्तेभ्यो चक्रिणे –क
५७–इष्टतमम् –ख
५८–तदा –ख
५९–गत्वा सर्वे क्षिप्रम् –ख
६०–तदान्तिकम् –क,ख
६१–तदानन्दसुनन्दाद्या –क,ख
६२–शर्वे–क
६३–पीनोरस्काः– क,ख
६४–सुभाननाः– क
६५–दिग्भांगा–ग,घ
६६–शंकाश–ख

चत्वारिंशो ऽध्यायः

श्रीनारायण उवाच

ततस्तेषां वचः श्रुत्वा कालो विस्मितमानसः। बुद्ध्वा श्रीविष्णुभक्तानां सकृदर्चनवैभवम् ।।१।।
प्रणम्य विष्णुभक्तांश्च वाक्यमाह महच्छुभम्। शृणुध्वं तत्प्रवक्ष्यामि पापिष्ठस्य द्विजन्मनः ।।२।।
विमुक्तिकारणं यूयं[१] चित्तैकाग्र्य[२]–समाधिना। अनन्ताद्या महाभागास्त्रिपाद [३]–भूतिनिवासिनः ।।३।।
नृणां नियतमाध्येयाः सुलभाः सर्वरक्षकाः। अवतीर्णा भुवि सर्वे जीवता[४]–रणहेतवे ।।४।।
तेषां भागवतानां स द्वादशानां महात्मनाम्। कृत्वा प्रतिकृतिं भक्त्या पूजयामास भूसुरः ।।५।।
तत्प्रभावादघं तस्य सर्वं नष्टमभूद् भटाः। गतिं च परमां प्राप्त[५] – स्त्रिपाद्भूतिं सुदुर्लभाम् ।।६।।
ये[६] जनास्तान्[७] प्रियान् विष्णोः पूजयन्ति स्मरन्त्यपि। कीर्त्तयन्ति हरेर्गेहे तेषां बिम्बानि भक्तितः[८] ।।७।।
संस्थापयन्ति तान् [९] दृष्ट्वा दूरादेव भयान्विताः। दण्डवत्प्रणमन्तश्च संस्तुवन्तोऽपगच्छत [१०] ।।८।।
इत्युक्ता धर्मराजेन दूतास्ते भयकम्पिताः। करिष्यामस्तथेत्युक्त्वा गताः सर्वे यथागतम् ।।९।।
तेषां श्रीहरिभक्तानां सकृत्पूजाविधानतः। दुःशीलोऽपि पदं प्राप[११] किं पुनः सन्ततार्चनात् ।।१०।।
तेषां पूजा सदा लोके[१२] नाम्नां स्मरणमेव च। गुणानां कीर्त्तनं चापि सर्वाङ्गध्यानमेव च ।।११।।
जन्मनक्षत्रदिवसेष्वाराधनमनुत्तमम्। वैष्णवेभ्यो महात्मभ्यश्चरित्रश्रवणं सदा ।।१२।।
बिम्बप्रतिष्ठापनं च भक्ष्यभोज्य–निवेदनम्। तन्राममन्त्रैः सततं होमश्च घृतपायसैः ।।१३।।
अन्नदानं वैष्णवानां तानुद्दिश्य निरन्तरम्। वस्त्राभरणदानं च पुण्यकर्मफलार्पणम् ।।१४।।
स्नापनं[१३] प्रदक्षिणं च सततं पूत्रवारिणा। सर्वाण्येतानि ये लोके कुर्युस्तेषां स माधवः ।।१५।।
इहाभीष्टानाशु दत्वा ददात्यन्ते परं पदम्। भगवांस्तत्प्रिया श्रीश्च निजपूजापरान् जनान् ।।१६।।
आत्मपूजापरेभ्यश्च मन्येते[१४] परमप्रियान्। तान् [१५] दृष्ट्वा परमाह्लादः पुत्रसन्दर्शने यथा ।।१७।।
भगवद् [१६]–भक्तवात्सल्या[१७]–त्पद्मनाभो जगत्पतिः। क्रतुभिश्चाश्वमेधाद्यैरिष्टापूर्त्तादिभिर्व्रतैः ।।१८।।
गोदानैर्भूमिदानैश्च स्वर्णदानैर्महाधनैः। तपोभिर्नियमाहारैस्तीर्थयात्रादिभिर्व्रतैः ।।१९।।
अष्टाङ्गयोगैरतुलैः साङ्ख्यैः सत्कर्मणां फलैः। वेदैः शास्त्रैः पुराणैश्च ज्ञानमार्गैः सनातन[१७]: ।।२०।।
न तुष्यति जगन्नाथो यथा भागवतार्चनात्। एतेषां सूरिणां[१८] जन्म विष्णोरिव समुद्भवेत् [१९] ।।२१।।
नैव कर्मनिबन्धः स्यादिच्छया[२०] कमलापतेः। स्वरूपरूपसगुणविभूत्याद्यान् जगद्गुरोः ।।२२।।

१–युयम् –ख
२–चित्तैकाग्र्य–घ
३–त्रिपादभूति–क
४–नीवोत्तारण–क,ख
५–परमं प्राप्तः– ख
६–जे –क
७–तान्वया विष्णो–क, तान् वा विष्णुम् –ख
८–भक्तिदः– क,ग
९–ताम् –क,ग
१०–संस्तुवन्नोपगछथ –क, संस्तुतो दूरगछथ –ख
११–प्राप्य–क, प्राप्तः– ख
१२–कार्या–घ
१३–स्नपनम् –ख,ग
१४–मन्यते –घ
१५–ताम् –क,ग
१६–भागवत्–क,भगवत् –ख, भवते –ग
१७–वात्सल्यो–ख
१८–शूरिणाम्–क
१९–समुद्भवः– क,ख,ग
२०–स्थादिक्षया–क,ख

त्रिपादभूतौ विख्यातान् प्राकृतानां नृणां भुवि। उत्पन्नाः प्रकटीकर्तुं सूरिणो मुक्तिदायकाः ।।२३।।
अतस्तान् पूजयेन्नित्यं पण्डितोऽनन्यसाधनः। विष्णुभक्तान् द्विजान् यस्तु मर्त्यभावेन मन्यते[२१] ।।२४।।
स सहस्राणि[२२] जन्मानि तिर्यग् [२३] योनिषु जायते। विष्णुभक्तं [२४] महाभागं[२५] भोजयेद् यस्तु मन्दिरे ।।२५।।
तेन पत्युः श्रियः पूजा कृतैव शतवत्सरैः। निष्कमात्रं सुवर्णस्य[२६] वैष्णवाय महात्मने ।।२६।।
यो दद्यात्तेन हेमाद्रितुल्यं दत्तं भवेद् धनम्। तदीयाङ्घ्रिरजः[२७] प्राप्य कृतकृत्यं न मन्यते ।।२७।।
स नरः पशुरेव स्याद् हरिस्तस्य पराङ्मुखः। यस्तु मार्गपरिश्रान्तं महाभागवतं द्विजम् ।।२८।।
अनन्यश्रद्धया भक्त्या कुर्यात्त[२८]च्छ्रमनाशनम् [२९]। भवमार्गश्रमो नष्टो भवेत्तस्य न संशयः[३०] ।।२९।।
अर्घ्य[३१]–पाद्यादिभिर्यस्तु पूजयेद् वैष्णवोत्तमम्। देवैः सम्पूजितो दिव्यैरर्घ्यपाद्यादिभिः सदा ।।३०।।
सङ्कल्पितं वैष्णवानां पूजादानादिकं नरः। यो निवारयितुं चक्रे मानसे[३२] हीनबुद्धिना ।।३१।।
दिवं[३३] प्रति सुरैस्तस्य गमनं विनिवारितम्। दूषयेद् भगवद्भक्तं यस्तु वाक्यैर्नराधमः ।।३२।।
मूको भवति जन्मानि सहस्राणि शतानि सः[३४]। यस्तु दृष्ट्वा हरेर्भक्तमनुत्थाय स्थितो यदि ।।३३।।
पाषाणत्वमवाप्नोति चिरकालं स मानवः। पूजयेद् भगवद्भक्तं वासोऽलङ्कारभूषणैः ।।३४।।
सम्पद्भिः पुत्रपौत्रैश्च वंशस्तस्याभिवर्द्धते[३५]। तैलाभ्यङ्गाङ्गसंवाह[३६]-ताम्बूलव्यजनादि [३७]भिः ।।३५।।
वैष्णवं तोषयेद् यस्तु यस्य तुष्टो जगत्पतिः। विहाय वैष्णवान् यस्तु हरिमभ्यर्चयेत्सदा ।।३६।।
वृथा स्यात् तस्य सा पूजा न प्रसन्नो हि केशवः। अनधीतो हरेर्भक्तस्त्वधीताद् विप्रपुङ्गवात् ।।३७।।
भृशं श्रेष्ठतमो ज्ञेयो भक्तिहीनाद् [३८] द्विजाद् वरः[३९]। शूद्रो वा भगवद्भक्तो वेदिनो भक्ति[४०]–वर्जितात् ।।३८।।
गरिष्ठः सर्वतोऽभक्तः श्वपचादधमो नृणाम्। भगवद्भक्तिहीनेन यद् यत्कर्म कृतं द्विजाः[४१] ।।३९।।
तत्सर्वं राक्षसैः प्राप्तं[४२] निरयं चाधिगच्छति। विष्णुबिम्बप्रतिष्ठाया[४३] वैष्णवानां महात्मनाम् ।।४०।।
शताधिका प्रतिष्ठेति प्रजगु[४४]–र्ब्रह्मवादिनः। ब्राह्मणादिचतुर्वर्णा भगवद्हेतिचिह्नि[४५]ताः ।।४१।।
समर्पितात्मसर्वार्था यदि लोकगुरौ हरौ। एते भागवताः प्रोक्ता नान्ये वेदविदां वराः ।।४२।।
चिह्नितं [४६] शङ्खचक्राद्यैः श्वेतमृत्पुण्ड्र[४७]–धारिणम्। तुलसीनलिनाक्षाणां दधानं मालिकाद्वयम् ।।४३।।
दृष्ट्वा तं पूजयेत् सम्यग् यथा नारायणं प्रभुम्। अङ्कितं भगवच्चिह्नैर्विप्रं यस्तु न पूजयेत् ।।४४।।
सप्तजन्मार्जितं पुण्यं तत्क्षणा[४८]त् – तस्य नश्यति। अन्वहं भोजयेद् यस्तु वैष्णवं हरिलाञ्छितम् [४९] ।।४५।।

२१–मन्यसे–क
२२–सहस्राणि च–क,ख
२३–निर्यग्ज्ञोनिषु–क
२४–भक्तो–क,ख,ग
२५–महाभागो–क,ख,ग
२६–सुवर्ण च– क,ख
२७–तदीयांघ्री –ख
२८–कुर्याद् भक्त्या–घ
२९–तच्छ्रमानशम् –क
३०–शंशयः– क,ख
३१–अर्घ –ख,ग
३२–मानसम्–ग,घ
३३–दिव्यम्–ख
३४–शः– क
३५–वर्धते–क
३६–संस्य–क, संस्कार–ख
३७–वासनादिभिः– क, वशनादिभिः– ख
३८–भक्तिहीनो–क,ख,ग
३९–द्विजावरः– क,ख, द्विजोवरः– ग
४०–भक्त –क
४१–सदा–क,ख, द्विज–घ
४२–नीतम्–ख
४३–प्रतिष्ठाय–क
४४–प्रजग्मुर्–क,
४५–चीह्नताः– ख
४६–चिन्हिता–क
४७–मृत्पिण्ड–क,ग, स्वेतमृतपुंड्र–ख
४८–तत्क्षणम्–क,ख
४९–लांछनम्–ग, घ,

तद्भुक्ते श्रीपतिः साक्षाद् भुङ्क्त [५०] एव न संशयः। दृष्ट्वा वैष्णवसन्दोहं न नमस्यति यो नरः ।।४६।।
प्रदक्षिणां [५१] न कुर्वीत[५२] हरिस्तस्मै प्रकुप्यति। तुलसीकाननं कृत्वा पोषयेद् यः सनातनः ।।४७।।
तेन सम्पूजितो विष्णुरखिलैरुपचारकैः। माधवं यः प्रतिष्ठाप्य नित्यपूजारथोत्सवैः ।।४८।।
अर्चयेद[५३] –र्चितो देवैरब्जयोनिपुरोगमैः। परमं पदमासाद्य मोदते स परः पुमान् [५४] ।।४९।।
श्रियं भूमिं च नीलां[५५] च सेनेशं[५६] विहगेश्वरम्। अनन्तादीन् पारिषदान्[५७] भक्तानन्यान् महात्मनः ।।५०।।
यः प्रतिष्ठापयेल्लोके रमते[५८] हरिणा समम्। कोमलैस्तुलसीपत्रैर्यः शाल[५९]–ग्राममर्चयेत् [६०] ।।५१।।
तस्य श्रीः श्रीपतिश्चैव तुष्येतामादिदम्पती। गुरुरेव हरिः साक्षात् सन्तुष्टः स्याद् हरिः सदा ।।५२।।
क्रुद्धे[६१] सति सदा क्रुद्धस्तस्मात्सम्पूजयेद् गुरुम्। त्रिदण्ड[६२]–धारिणं दृष्ट्वा यतिं विज्ञानसाधनम् ।।५३।।
प्रणमेत्पूजयेद् यस्तु भगवद्भक्तिमान् भवेत् [६३]। वैराग्यज्ञानभक्त्यादिरूपश्रेयःप्रदायकम् ।।५४।।
महायोगीश[६४]–माहात्म्यमिदं मुक्तिप्रदं नृणाम्। आयुष्यं श्रीकरं भद्रं यशस्यं विजयावहम् ।।५५।।
धर्म्यं पवित्रं पापघ्नं[६५]–मारोग्यकरमुत्तमम्। यः श्रावयेत्सदा नृणां स्नातः पुण्यनदीषु सः ।।५६।।
सर्वयज्ञफलं लब्ध्वा हरेः प्रियतमो भवेत्। यः पठेच्छृणुयाद् भक्त्या माहात्म्य[६६]–मिदमुत्तमम् ।।५७।।
यं यं चिन्तयते[६७] कामं तं तमाप्नोत्यसंशयम् [६८]। मुक्तिकामो लभेन्मुक्तिं श्रीकामो लभते श्रियम् ।।५८।।
सर्वार्थसिद्धिं सम्प्राप्य लभेदन्ते परं पदम्। लिखित्वैतं[६९] त्पुस्तकं यो वैष्णवाय महात्मने ।।५९।।
दद्यात्तस्य गृहे[७०] नित्यं श्रीस्तिष्ठत्यनपायिनी ।।६०।।

महायोगिनां द्वादशानां चरित्रं
परं [७१] धाम नाथस्य विष्णोः प्रियं यत् [७२]।
महादीनकालात्सुलग्नप्रकृत्याः* (?)
सदा श्रोतुकामान् विमुक्तान् करोति ।।६१।।

५०–तदा यागहविर्नतु–ग,घ,
भक्ते व सर्वदा –क, भुक्ते एव न संशयः– ख
५१–प्रदक्षिणम् –क,ख
५२–कूर्वीत –ख
५३–अर्घ्यादानार्चितो–क, अर्घ्यद्यानर्चितो–ख
५४–पुरःसरः– क,ग,घ
५५–लीलां च–ग,घ
५६–शेनेशम् –ख
५७–परिषदो–क,ख, पारिषदो–ग,घ
५८–रम्यते –ग
५९–सालग्राम–ख, सालिग्राम–ग
६०–मभ्यर्चयेत्–क
६१–कुद्धापृति तदा कुद्धस्–क, क्रुद्धो यदि तदा क्रुद्धस्–ग,घ
६२–तृदण्ड–ग,
६३–भक्तिमानसः–क, स वै–ख,ग
६४–महायोगीनाम–ख
६५–पापघ्नं आरोग्य–क,ख,ग,घ
६६–महात्म्यमिद–ख,ग
६७–कामयते चित्तम्–क, कामयते चित्ते–ख
६८–शंसयः– ग, शंशयः– क,ख
६९–लिपित्वैतत्–क
७०–ग्रहे–क,ख
७१–परमम् –क
७२–प्रियं यः– क, प्रियाणाम्–ग
*–महानदीकालसुलग्नप्रकृत्याः– क

इत्येतदाख्यानमनुत्तमं शुभं
योगीश्वराणां[७३] महतां मनोहरम्।
भक्त्या नरो यः शृणुयात् पठेत्[७४] सदा
सौभाग्यवान् गच्छति तत्परं पदम् ।।६२।।

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डयो नरनारायणसंवादे महायोगिमाहात्म्ये चत्वारिंशो ऽध्यायः ।।४०।।

———

श्रीमद्भार्गवोपपुराणं समाप्तम्

— o —

७३–योगीस्वराणाम् –ख

७४–पठेद् वा– क,ख,ग

'श्रीमद्भार्गवोपपुराणम्'

अध्ययनं सम्पादनञ्च

डॉ॰ बृजेशकुमारशुक्लः

प्रवक्ता

लखनऊविश्वविद्यालयस्थसंस्कृतप्राकृतभाषाविभागे

लखनऊ

NAG PUBLISHERS

नाग प्रकाशक

११/ए॰, यू॰ ए॰, जवाहर नगर, दिल्ली-७